
# सागरिका

अङ्कः 51/1-2 (संयुक्ताङ्कः)




डॉ. हरी सिंह गौर विश्वविद्यालय सागर


Come
Make



ISSN : 2229-5577

# सागरिका

**त्रैमासिकी संस्कृतशोधपत्रिका**

अङ्कः 51/1-2 संयुक्तांकः, विक्रमसंवत् 2080 (2023 ई.)
एकपञ्चाशद्वर्षे प्रथमद्वितीयाङ्कः

## वेदविशेषाङ्कः

**संस्थापक**
स्व. रामजी उपाध्यायः

**संरक्षकः**
नीलिमा गुप्ता
कुलपतिः

**प्रधानपरामर्शकः**
राधावल्लभत्रिपाठी

**सम्पादकः**
आनन्दप्रकाशत्रिपाठी

**प्रबन्धसम्पादकः**
शशिकुमारसिंहः

**सम्पादकमण्डलम्**
नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

**सागरिकासमितिः**
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**ISSN : 2229-5577** **UGC Approved JN. No.-42268**

# सागरिका
**SAGARIKA**

Quaterly Research Journal in Sanskrit (Peer Reviwed)

Vol. 51/1-2

Four Issues Every Year-June-Sep.-Dec.-March

अङ्कप्रकाशनं प्रतिवर्षम् आषाढ-आश्विन-पौष-चैत्रमासेषु

**वेदविशेषाङ्कः**

**परामर्शदात्री समितिः**

1. प्रो. मुरलीमनोहरः पाठकः, दिल्ली
2. प्रो. महावीर अग्रवालः, हरिद्वारम्
3. प्रो. रमाकान्तपाण्डेयः, भोपालः
4. प्रो. विष्णुकान्तपाण्डेयः, जयपुरम्
5. प्रो. व्रजकिशोर स्वाइं, ओडिशा

**पत्रव्यवहारसङ्केतः**

**प्रो. आनन्दप्रकाशत्रिपाठी**

अध्यक्षः, संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)

Email : sanskritsagar1946@gmail.com

**प्रकाशिका – सागरिकासमितिः**

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम् - 100 रुप्यकाणि, आजीवनम् प्रतिव्यक्ति - 1000 रुप्यकाणि, आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि

**शब्दसज्जा : अमनप्रकाशनम्,** नमकमंडी, कटरा, सागरम् (म.प्र.)

**मोबा.** : 9826434225

# सम्पादकीयम्

वेदः विश्वस्य प्राचीनतमं वाङ्मयं मन्यते। वेदः सर्वहितकारिणः ज्ञानस्य भण्डारः वर्तते। येषां तत्त्वानां ज्ञानं प्रत्यक्षेण वा अनुमानेन अपि न ज्ञायते तेषां सम्यक् ज्ञानं वेदेन भवितुं शक्यते। ऋग्वेदभाष्यभूमिकायां उल्लिखितमस्ति यत् विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ते लभन्ते विन्दते विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्याः यैर्येषु वा तया विद्वांसश्च भवन्ति ते वेदाः। महर्षिणा मनुना वेदस्य विषये उद्घोषितमस्ति यत् वेदोऽखिलो धर्ममूलम्। वेदः मनुष्याणां धर्मस्य कर्मणः मूलमस्ति। मनुमहोदयेन एव मनुस्मृतौ प्रतिपादितमस्ति यत् चतुर्णां वर्गाणां, चतुर्णामाश्रमाणां, त्रयाणां लोकानां, त्रयाणां कालानां यत् किमपि सिद्ध्यते तत् सर्वं वेदज्ञानात् एव सम्भवति।

वर्तमानसमयेऽपि वेदस्य महत्त्वं मानवजीवनव्यवहारे दरीदृश्यते एव। अद्यापि विविधेषु हिन्दूसंस्कारेषु वेदमंत्राणामुच्चारणं जनैः क्रियते। वेदे प्राचीनभारतीयगणित-ज्योतिष-स्वरशास्त्रादीनां विविधानां शास्त्राणां स्रोतांसि प्राप्यन्ते। वेदस्य एवं महत्त्वं दृष्टौ निधाय गौरवशालिन्याः प्राचीनतमायाः संस्कृतशोधपत्रिकायाः सागरिकायाः वेदविषयानाधारीकृत्य विशेषाङ्कोऽयं संयुक्ताङ्करूपेण 'वेदविशेषाङ्कः' इति नाम्ना डॉ. हरीसिंहगौरविश्वविद्यालयसागरस्य संस्कृतविभागतः सागरिकासमित्या प्रकाश्यते। अंकेऽस्मिन् त्रयोविंशतिः शोधालेखाः प्रकाशिताः सन्ति। तेषु केचन आलेखाः सागरिकायाः पुरातनेभ्यः

अङ्केभ्यः स्वीकृताः सन्ति, केचन आलेखा नवीनाः अपि सन्ति। सागरिकायाः अस्मिन् अङ्के वेदस्य बहुप्रतिष्ठितं ज्ञानं विविधेषु आलेखेषु विद्वद्भिः विवर्णितमस्ति। सागरिकायाः अङ्कोऽयं विदुषां हृदये आह्लादमुत्पादयिष्यतीति आशास्महे-

**- सम्पादकः**

# अनुक्रमः


| | | | | |
|---|---|---|---|---|
| 1. | वैदिकखिलविमर्शः | - | *श्रीकिशोरमिश्रः विद्यावारिधिः* | *07* |
| 2. | वैदिकसाहित्ये अश्विनौ | - | *नेति अनन्तराम शास्त्री* | *20* |
| 3. | वैदिकं देवरहस्यम् | - | *मिताली देव* | *23* |
| 4. | वैदिकवाङ्मये भक्तिः | - | *मिथिलाप्रसादत्रिपाठी* | *29* |
| 5. | वैदिकवाङ्मये मन्त्रचिकित्सा | - | *सञ्जयकुमारः* | *48* |
| 6. | वैदिकवाङ्मये रस-अलंकारयोर्निदर्शनविमृष्टि : | - | *शुभ्रजित् सेनः* | *57* |
| 7. | वैदिकदर्शनं बौद्धदर्शनं च | - | *कमलेशः झा* | *73* |
| 8. | वेदकालीनभारतम् | - | *कैलाशनाथद्विवेदी* | *80* |
| 9. | वैदिकी वर्णव्यवस्था | - | *राधावल्लभः त्रिपाठी* | *83* |
| 10. | ऋग्वेदव्याख्याया उद्भवो विकासश्च | - | *सिद्धनाथशुक्लः* | *88* |
| 11. | ऋग्वेदे पितृस्वरूपम् | - | *दत्तात्रेयबालकृष्णः क्षीरसागरः* | *104* |
| 12. | ऋग्वेदेऽलङ्काराः | - | *प्रह्लादकुमारः* | *108* |
| 13. | ऋग्वेदे प्रकृतिचित्रणम् | - | *वन्दना द्विवेदी* | *121* |
| 14. | वेदानां सामवेदोऽस्मि | - | *परड्डी मल्लिकार्जुनः* | *132* |
| 15. | ऋग्वैदिकसोमस्य प्रत्यभिज्ञान-विमर्शः | - | *कैलाशनाथद्विवेदी* | *136* |
| 16. | भारतीयशिक्षायां वेदस्योपयोगिता | - | *देवेन्द्रनाथपाण्डेयः* | *142* |
| 17. | श्रुतिस्मृत्यनेकान्तवादः | - | *हर्षनारायणः* | *148* |
| 18. | कारकप्रसङ्गे वैदिकभाषामुपलक्ष्य विशेषतः पञ्चपाणिनीयसूत्राणां प्रयोगविमर्शः | - | *कल्याणः पण्डा* | *163* |

| | | | | |
|---|---|---|---|---|
| 19. | अथर्ववेदेऽग्नितत्त्वम् | - | *नन्हेप्रसादद्विवेदी* | *168* |
| 20. | वेदाख्यानव्याख्यानपरम्परायां यमः | - | *धर्मानन्दशर्मा* | *186* |
| 21. | लौकिकच्छन्दःसु वैदिकच्छन्दसां प्रभावः | - | *पारसनाथद्विवेदी* | *195* |
| 22. | अथर्ववेदे वेदान्ततत्त्वम् | - | *राधावल्लभः त्रिपाठी* | *199* |
| 23. | संस्कृते स्तोत्रसाहित्यम् | - | *श्रीकिशोरमिश्रः विद्यावारिधिः* | *207* |

# 1
# वैदिकखिलविमर्शः

*श्रीकिशोरमिश्रः विद्यावारिधः*

वैदिकवाङ्मये खिलशब्देनास्ति कस्यचन वेदांशस्य व्यवहारः। ऋग्वेदे संहितातो बहिरपि कानिचन खिलसूक्तानि मुद्रापितानि दृश्यन्ते। माध्यन्दिनीयायां शौनकीयायां च संहितायां तु संहितान्तर्गत एवास्ति खिलभागः। एवमेव सामवेदेऽपि संहितामध्य एव। तदस्य खिलशब्दस्य किमस्ति प्रवृत्तिनिमित्तं कश्चार्थ इत्यत्र विचार प्रस्तूयते।

**खिलशब्दार्थः**

खिलपदघटितो हि खिल्यशब्दः सर्वतः प्रथममृग्वेदसंहितायां स्थानद्वये दृश्यते। प्रथमं षष्ठमण्डले, ततश्च दशमे। तत्र सायणार्यः ''खिलमप्रतिहतं स्थानम्, तदेव खिल्यम्, स्वार्थिको यत्'' इत्येवमेकत्रार्थापयत्ति[1], अपरत्र च ''(उर्वराणां भूमीनां) सम्बन्धिनः प्रदेशाः खिल्याः, खिलाः प्राणिभिर्गन्तुं योग्याः'' इत्यमुल्लिखति[2]। अथर्वसंहितायां सप्तमकाण्डेऽपि खिलशब्दो वर्तते। तत्र 'खिले व्रजे एकत्र प्रदेशेऽवस्थिताः गाः' इत्येवं सायणेनार्थो विहितः[3]। एवं हि निष्कृष्टं भवति यदप्रतिहतमर्हिंसितं प्राणिभिर्गन्तुं योग्यमर्थात् सर्वोपकारकं समन्वयगुणकं स्थानं खिलं खिल्यं वेति।

वैदेशिकविद्वत्सु राथमहोदयाः क्षेत्रद्वयमध्यवर्त्तिनी अनुर्वरा च भूमिः खिलपदवाच्येति वक्ति। परमृग्वेदीये षष्ठमण्डलस्थले नायमर्थः समन्वेति। तत्र 'अभिन्ने खिल्ये निदधाति देवयुम्' इत्यृग्भागे इन्द्रो देव प्रसन्नः सन्नात्मनो भक्तमभेद्ये अनुर्वरे च स्थाने प्रतिष्ठापयतीत्यर्थे अनुर्वरार्थानुपपत्तिः अत्र अहिंसित इत्येवार्थे युज्यत इति राथमतं नादरणीयं भवति। वैदेशिक एव ओल्डेनवर्गविद्वान् क्षेत्रद्वयमध्यवर्त्तिनी उर्वराभूमिरिति खिलार्थ प्रतिपादयति। पिशेलमनीषी च सुदीर्घा

गोचरभूमिरिति खिलशब्दार्थ परिचाययति[4]। अनेनापि विवेचनेन उभयसंश्लिष्टत्वं, फलप्रदत्वं, सर्वोपकारकत्वं च खिलपदार्थस्य वैशिष्ट्यं परिज्ञात भवति।

भाषायां खिलशब्देन वर्गीभूतस्य कश्चनांश उच्यते, खण्डविरहिते पदार्थे निखिलमखिलमित्यादिदर्शनात्। खिलशब्दोऽयं, कॄ विक्षेपार्थकाद्धातोः ''इगुपधज्ञाप्रीकिरः कः'' इति[5] कप्रत्ययेन संजातस्य किरः शब्दस्यैव विपरिणतं रूपम्। नैरुक्तप्रक्रियया हि किरः इति किलः खिलः एवंक्रमेण विपरिणमितुं प्रभवति। ततश्च खिलशब्दस्यार्थः, विप्रकीर्णतया वर्तमानो भाग इति। वैदिके हि अंशे विप्रकीर्णता नाम श्रौतस्मार्तपौराणत्रितयकर्मशेषभूतत्वम्, क्रमेण विनियोगाभावश्चेत्यादिरूपा। यथा पुरुषसूक्तश्रीसूक्तप्रभृतयः खिलांसाः। तेषां हि श्रौतस्मार्तपौराणत्रितयकर्माङ्गभूतत्वमव्याहतमेव। माध्यन्दिनीयसंहितायां षड्विंशाध्यायमारभ्य चत्वारिंशाध्यार्य यावत् खिलत्वं मन्त्राणामुक्तं भाष्यकृद्भ्याम्। महीधरेण तु भाष्यकर्त्रा क्वचिद्विनियोगानुक्तेः खिलत्वमित्युल्लिखितम्[6]। एतत्तु न युक्तं प्रतिभाति। यतो हि एष्वध्यायेषु सन्ति बहवो मन्त्रा विनियुक्ताः। परं ते पूर्वोपदिष्टकर्मस्वेवेति सम्भवत्येव विप्रकीर्णता। सर्वमेधपुरुषमेधपितृमेधादिषु अत्रत्या मन्त्रा यथाहं विप्रकीर्णता विनियुज्यन्ते, न तु क्रमानुरोधेन। किं बहुना, पुरुषसूक्तेऽपि भाष्यकृता व्याख्यानावसरे मन्त्रविपर्यासः कश्चन उक्तः,[7] स हि विप्रकीर्णतामेव समर्थयति।

अमरकोषे[8] तु ''द्वे खिलाप्रहते समे, त्रिषु'' इति हलाद्यकृष्टभूमौ खिलव्यवहार उक्तः। एतस्य रामाश्रमीटीकायां खिल उन्छे इत्यपाणिनीयेन खिलधातुना कप्रत्ययः[9] कृत्वा निष्पत्तिः प्रदर्शिता। अकृष्टो (न त्वनुर्वरः) भूभागो यथा सर्वार्थो भवति तथैव खिलभागोऽपीत्यस्याशयः। एवं हि सर्वविधः खिलशब्दाशयः सर्वविद्वत्परम्परासम्मतः 'सर्वोपकारको वेदभाग' इति पर्यवस्यति। अतएव खिलापरपर्याया अनारभ्याधीता हि सर्वार्था इति यथाप्रसंगं सर्वत्र सन्निविशन्त इति मीमांसान्यायः[10]। खिलानां विषयस्वरूपमभिप्रेत्य भारतभाष्यकृता नीलकंठाचार्येण[11] 'परशाखीयं स्वशाखायामपेक्षावशात् पठ्यते तत् खिलमुच्यत' इत्येवं प्रायोलक्षणं पारम्पर्यानुमोदितं कृतम्। अतस्तत्तत्सहितोत्तरभागे खिलस्थित्यापि न तत्र वेदत्वव्याघातापत्तिः। एवञ्च हरिवंशादेः सर्वार्थत्वात् खिलत्वं युज्यते।

## खिलविषयकाणि मतानि

आधुनिकविचारकास्तु खिलेषु पौर्वापर्यं ब्रुवते। ऋग्वेदे खिलत्वं हि सर्वतः प्रथमं शौनकीयायामनुवाकानुक्रमण्यामार्षातुक्रमण्यां चोक्तम्। तद्धि खिलत्व तेषां सूक्तानां तासामृचां वा यद्‌गणः शाकलशाखीयर्ग्वेदसंहितापाठे पदपाठे वा अन्तर्भुक्तो नास्ति। अतश्च स मन्त्रगणः सर्वानुक्रमण्यनुवाकानुक्रमण्यादिषु परिगणने न समादृतः। यद्यपि तस्य मन्त्रगणस्य स्थितिः सहितायां मूलसूक्तान्तर्गत बहिर्वा साम्प्रदायिकैनिर्धारिता दृश्यते। ऋग्वेदसंहितानान्तरं यो खिलभागः सातवलेकरादिभिर्मुद्रापितः सोऽपि साम्प्रदायिकाध्ययने ऋक्संहितायां निश्चितेषु तत्तत्स्थलेष्यवधीयते मन्त्रान्तरवत्। स्थलनिर्देशमस्तु सातवलेकरादिभिः कृतः। एतदन्तर्गताश्च मन्त्राः शान्तिमेधाजननादिषु गृह्यकर्मसु विनियुज्यन्ते वह्वृ चैः। परमेतेषां मन्त्राणां पदपाठो विकृतिपाठाश्च शाकलशाखाभिः न विधीयन्त इत्येतेषां शाखान्तरीयत्वं सुवचं भवति। एवं त्ववधेयं यच्छाखापारायणे तत्तत् स्थलेषु खिलान्तर्गता इमे मन्त्रा अवश्यं पठनीया भवन्ति। अन्यथा शाखारपारायणपूर्तिं न मन्यन्ते सम्प्रदायविदः। मैत्रायणीसंहितायाश्चतुर्थकाण्डमपि खिलत्वेनाभिधीयते। परमस्य मूल- भागद् भिन्नत्वमुद्‌घोषयन्तस्तु खिलपदार्थमविचारयित्वैव तथा वदन्ति[12]। तत्पुस्तकामुखोक्तमन्यदपि प्रश्नजातं खिलपदार्थावगमादपास्तं भवति।

खिलानि वैदिकैर्ऋषिभिः एव निबद्धानीति निर्विवादम्। शाखान्तरेषु ब्राह्यणेषु च समुपलब्धेः खिलानि प्राचीनानि यज्ञसम्बद्धानीति सिद्ध्यति। ब्राह्मणेषु नकुलकुन्तापबालखिल्यादिसूक्तानि खिलान्तर्गतानि विषयप्रसंगासम्बद्धान्यपि यज्ञेषु विनियुक्तानि। एतेन खिलानां महत्तवं, मन्त्रान्तरवत्पावित्र्यमाधुनिकदृशापि ब्राह्मणकालात्पूर्वभावित्वं च ज्ञायते। परं सर्वाण्यपि खिलानि एककालिकानीति न पाश्चात्त्यविद्‌वद्‌भिः स्वीक्रियते। तेषु पुरोरुक्प्रैषनिविदादीनि बहूनि प्राचीनर्ग्वेद-कालिकानि, बहूनि च कुन्तापबालखिल्यमहानाम्न्यादीनि ऋग्वेदावसानकालिकानि। कानिचन प्राचीनयजुर्वेदकालिकानि। अतएव प्रत्येकं खिलस्य कालनिर्द्धारणाय तत् पृथगेव समीक्षणीयमिति पाश्चात्त्यमत्तम्। ततश्च खिलानुक्रमण्यां परिगणितानि खिलानि वेदकालिकानि सन्ति, तेष्वपि कानिचन यजुःसामाथर्वसंहिताकालेषु निबद्धानि। ब्राह्मणोत्तरकालिकानि तु खिलान्यल्पीयांस्येवोपलभ्यन्ते। यजुर्वेद-कालिकानि ब्राह्मणकालिकानि च खिलानि प्रायशस्तत्तत्कालप्रचारितयज्ञादीन-धिकृत्यैव निबद्धानि दृश्यन्ते। यथा मेघासूक्तमथर्ववेदीयोपन्यन संस्कारसम्बद्धम्,

श्रीसूक्तं च यजुर्वेदोक्तश्रीलक्ष्मीदेवतयोः सम्बद्धम्। एवमेवृग्वेदे प्रथममण्डले[13] पठनीयानि सौपर्णसूक्तानि सुपर्णगोत्रीयैऋषिभिर्निबद्धानीति खिलानक्रमण्या-मुक्तम्। एवं हि पाश्चात्यानां पौर्वापर्यप्रचारः खिलेषु। गैल्डनर *(Galdner)* मतानुसारमृग्वेदपदकृच्छाकल्पो ब्राह्मणेषु बहुत्रोक्तस्यारुणेर्याज्ञवल्क्यस्य च समकालिक उत्तरयजुर्वेदसमये आसीत्। तन्मते च शाकलशाखा वाजसनेय-संहितातः प्राचीना। ओल्डेनवर्ग *(Oldenberg)* मतानुसारं शाकल्यो ब्राह्मण-कालावसाने आसीदिति वक्तुं शक्यते। परं कीथ *(Keith)*- महोदयो मतमिदं नाभिस्प्रैति।

अधिकतराणि खिलानि शाकल्यात् पूर्वं निबद्धानीति विद्वद्भिरंगीकृतम्। अथ चेत् कथं शाकल्येनैतेषां पदपाठी न कृत इति विचारणीयं भवति। यद्यपि खिलानीमानि ऋग्वेदसंयुक्तानि, संहितावत् समादृतानि, पश्चाच्च पदरूपेणापि पठितानि, अनुक्रमणीषु च परिगणितानि दृश्यन्ते। परमेतानि कथ मन्त्रान्तरवन्न गृह्यन्त इत्ययं विशयः। अत्रैवं समाधातुं शक्यते यत् खिलानीमानि न शाकल्यपरि-गृहीतशाखीयानि, अपितु शाखान्तरोक्तान्यासन्।

पंचाध्यायात्मके ऋग्वेदीयखिलभागे पंचमाध्यायोक्तानि पुरोरुक्प्रैषनि-विदादीनि खिलानि खिलान्तरवन्नर्ग्वेदीयसंहिताक्रमे गृहीतस्थानानि दृश्यन्ते। शेफ्टेलोवित्झ *(Scheftelowitz)*- मतानुसारेणैतानि पुरोरुक्प्रैषनिविदादीनि प्राचीनर्ग्वेदकालिकानि। तन्मतानुसारं कानिचन सूक्तानि निवित्प्रभावितानि दृश्यन्ते। एतेषां निविदादीनां पौर्वापर्यविषये पाश्चात्येषु हिल्लेब्रान्ट *(Hillebrandt)* ओल्डेनबर्गकीथविद्वत्सु महान् मतभेदोऽस्ति। अथापीद सुवचं भवति यद् ब्राह्मणेषु श्रौतगृह्यसूत्रेषु च खिलानि तथैव विनियुक्तानि संकेतितानि च यथा ऋग्वेदीया ऋचः। बाष्कलशाखीयानि कानिचन सूक्तानि शाकलशाखायां खिलत्वेनोक्तानि। एवमेव माण्डूकेयशाखायामपि शाकलखिलानि सम्भाव्यन्ते। कानिचन सामवेदीयसूक्तान्यपि ऋग्वेदे खिलत्वेन दृश्यन्ते। अत्र शौनकीय-प्रमाणान्तरमप्यस्ति यद्बृद्देवतायां[14] नेजमेषसूक्तस्य बाष्कलपाठान्तरमुपैदिष्टम्। तच्च सूक्तं खिलत्वेनास्ति शाकलशाखायाम्।

आरण्यकेषु[15] तु खिलान्तर्गतमन्त्रा न खिलसंज्ञया निर्दिष्टाः। यास्कोऽपि खिलमन्त्रान् निगमत्वेनैवाभिप्रैति। शौनकोऽपि न खिलत्वेन मन्त्रान् व्याहरति। परं

खिलानि ऋग्वेदीयसंहितानुवाकेभ्यो बहिर्भूतानीति तदीयोऽभिप्रायः प्रतिमाति। बृहद्देवतायामृग्विधाने चोक्तानि खिलानि कानिचन साम्प्रतं खिलेषु न दृश्यन्ते, कानिचन चानुक्तानि प्राप्यन्ते। परमेतेन नैतेषां प्रामाण्ये विप्रतिपत्तिर्मन्तव्या। यतो हि बालखिल्यसुभेषसूक्तान्युक्प्रातिशाख्यबृहद्देवतयोरुक्तानि नर्ग्विधाने समुक्तानि। एवमेव शंवतीः इति[16] खिलसूक्तमृग्विधानोक्तं न बृहद्देवतायां परिगणितम्। अतश्चैवंविधो विपर्यासस्तत्तद्ग्रन्थलेखकाभिप्रायविशेषेण प्रमादजो वा भवितुमर्हति। आर्षानुवाकानुक्रमण्योः खिलानि निर्दिष्टानि, तेषामृषिश्च गौतमवामदेव उक्तः। आश्वलायनशांखायनावपि न खिलत्वं वदतः। एवं हि प्राचीनवैदिकग्रन्थेषु खिलानां वेदवाह्यत्वमप्रामाण्यमादरहानिश्च नैवेति सिद्ध्यति।

पाश्चात्तयमात्रविचारोपनेत्रधारिणश्चिन्तामणिगणेशकाशीकरप्रभृतयः परभृतास्तु विद्वांसो धर्मशास्त्रेषु खिलानां महान् निरादरो दृश्यत इति मनुस्मृत्युल्लेखनपुरस्सरं वदन्ति। अत्र विचाराभासनिरासे तावन्मनुवचनमेव तदुल्लिखितं प्रथमं पठामः।[17]

**स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि।**
**आख्यानानीतिहासांश्च पुराणानि खिलानि च।। (म.स्मृ. 3।232)**

इत्येतस्मिन् वचने पितृश्राद्धकाले स्वाध्यायादीनां खिलान्तानां श्रावणमुक्तम्। स्वाध्यायो हि स्वशाखीयो वेद इति नातितिरोहितम्। स्वशाखीयवेदेन सहैव खिलानामपि श्रावणे विधानं वेदसमानत्वमेव तेषां द्योतयति, न तु निरादरणम्। न नु वेदसमानत्वेन वेदभिन्नत्वं खिलानां स्यादिति वाच्यम्। स्वाध्यायो हि स्वशाखीयवेदः, खिलभागस्य कथंचित् परशाखीयत्वादपि स्वाध्यायपदेन परिग्रहो न भवेच्चेदित्याशंकायां तन्निवृत्त्यर्थमत्र मनुवचने खिलानां पृथगुक्तिर्नं तु वेदातिंरिक्तत्वेन। खिलभागस्य सर्वार्थत्वमस्माभिरुपपादितमेव पुरस्तात्। परशाखीयानामपि सर्वाथानां खिलानां फलविशेषाधायकत्वात् पितृकर्मणि श्रावणविधान धर्मशास्त्रेषु तेषां महत्तवमेव प्रतिपादयति। अतः काशीकरादिमतम-विचारितमणीयमेव।

वस्तुतस्तु पाश्चात्त्यैस्तदनुवर्त्तिभिश्च खिलानामनारभ्याधीतत्वादि-प्रवृत्तिमविचार्यैवैतदनुशीलनं प्रस्तुतम्। वयं तु चतुर्वेदीयखिलभागपर्यालोचनेनेदं मन्यामहे यदेते सर्वार्था वेदभागाः संहितासु मध्येऽन्ते च वर्तमाना

विविधवैदिकपरम्परासु वैविध्येनापि संज्ञापिताः। यथा-बह्वृचेषु बालखिल्यनाम्ना, माध्यन्दिनीयेष्वनारभ्याधीताभिधानेन, छन्दोगेषु महानाम्नीत्वेन, आथर्वणेषु च कुन्तापैतशप्रलापसंज्ञया। ऋग्वेद तु खिलभागः पंचाध्यायात्मकः पृथगपि मुद्रितो वर्तते। तस्य वेदत्वं पौर्वापर्यनिरसनं च पूर्वं प्रपंचितमेव। इदं त्वत्रावधेय यन्मुद्रिते ऋग्वेदीये खिलभागे कुत्रचिद् देवाद्युपासनपराणि फलश्रुतिपराणि च यानि वाक्यानि दृश्यन्ते, तानि तु सर्वथैव पश्चात् संयोजितानि इति निश्चप्रचम्। यथा, खिलभागस्य द्वितीयाध्याये 1, 6, 12, 14 सूक्तानि, तृतीये 10, 12, 17 सूक्तानि, चतुर्थे च विंशतितमं सूक्तमित्येवमादिषु सुक्तातिरिक्तमपि यत्किंचिद् विषयसम्बद्धमसम्बद्धं वा संयोजितं दृश्यते श्रद्धोपहितमतिभिः। अतस्तेषां पश्चात् संयोजितानां भागनां तु प्रामाण्यं शंकास्पदमेव। पश्चात् संयोजितानीमानि वाक्यानि अर्वाचीनेष्वेव हस्तलेखेषु वर्तन्त इत्येवमपि एतेषामर्वाचीनत्व स्थितं भवति।

माध्यन्दिनीयसंहितायामपि षड्विंशाध्यायमारभ्य चत्वारिंशाध्यायं यावदस्ति खिलत्वं मन्त्राणाम्। स्पष्टोल्लिखितभागातिरिक्तं बालखिल्या-नारभ्याधीतादिरूपेण परिशिष्टादित्वेन च यत् खिलानां बोधन तत्किंकृत-मित्यनुसन्धित्सूनां विशयो भवति। अतएवास्माभिः प्रत्येकं संज्ञाविशेषस्य प्रवृत्तिनिमित्तं विचार्यते।

**बालखिल्यानि**

ऋग्वेदे शाकलसंहिताया अष्टममण्डले एकादशसूक्तानि ''अभिप्रवः सुराधस'' इत्यादीनि (ऋ.सं. 8।49।56) बालखिल्यसंज्ञकानि सन्ति। एतत्सूक्तान्तर्गताः ऋचः ऋग्वेदीये खिलसंग्रहेऽपि बहुशी दृश्यन्त इत्येतानि खिलानि मन्यन्ते। ऋग्वेदभाष्यकृता सायणेनैतेषां सूक्तानां व्याख्यानं न कृतम्। भाष्याभावे को हेतुरिति विचारणायां सायणदृष्टावेतेषां सूक्तानां वेदबाह्यत्वं वा परशाखीयत्वं वेति हेतुद्वये परशाखीयत्वमेव मन्तव्यम्। यतो हि सम्प्रदा यविद्भिर्गुरूपरम्परया-ध्ययने ब्रह्मयज्ञपारायणादिष्वेतानि सूक्तानि संहितावत् पठ्यन्ते। पदपाठो जटादिविकृतिपाठश्चादि एतेषां भवति। वेदस्वाहाकारे त्वेतेषां प्रयोगे विकल्पः। केचन बालखिल्यान्तर्गतमन्त्रान् स्वाहान्तानुच्चार्य आहुतिप्रदान कुर्वन्ति, केचन च केवलमुच्चारयन्ति। परन्तूभयथापि पाठराहित्यं तु नैवाभिप्रेतम्। अत एवैतानि सूक्तानि संहितान्तर्गतान्येव। बालखिल्यसंज्ञापनमेव ऋग्वेदासम्भिन्नत्वमेतेषां

द्योतयति। नैतानि सूक्तानि बालखिल्यर्षिदृष्टत्वाद् बालखिल्यान्युच्यन्ते, प्रस्कण्वादेरार्षेयत्वात्। बालखिल्यसंज्ञा त्वभिप्रायविशेषेण। बालखिल्यशब्दार्थः शतपथब्राह्मणे एवमुक्तः[18]- "प्राणा वै बालखिल्याः... यद् वा उर्वरयोरसम्भिन्नं भवति खिल इति वै तदाचक्षते, वालमात्रादु हेमे प्राणा असम्भिन्नास्ते यद् वालमात्रादस- म्भिन्नास्तस्माद् बालखिल्याः' एवं हि ऋग्वेदासम्भिन्नो विशिष्टः प्राणरूपो भागः बालखिल्याख्यः। अतो नायमृग्वेदबहिर्भूतः अपितु ऋग्वेदस्य, सर्वैशाखीयानामुपकारकत्वात् प्राणरूपो विशिष्टो भागः। आश्वलायनेन सत्रेषु बाल खिल्यसूक्तानां विनियोग उक्तः[19]। अथापि नैतेषु विनियोगसंकोचो वक्तव्यः एतेषां सर्वार्थत्वादित्ययमभिप्रायो बालखिल्यसंज्ञायाः प्रतिभाति।

अत्रैदमवधेयं यद् वैदिककोषानुवादकेन डॉ. सूर्यकान्तवर्येण शतपथ-ब्राह्मणोक्तस्य सन्दर्भस्य "उर्वरयो रसं भिन्नं भवति" इत्येवमुट्टंकयत।[20] पदच्छेद-त्रुटिद्वारेणार्थवैपरीत्यमेव कृतम्। तदीयलेखे च शातपथश्रुतिप्रसंगे सर्वथा अनुपपत्ति-र्भवति।

**परिशिष्टम्**

प्रयोगरत्नरुद्रयामलादिग्रन्थेषु केषुचित् श्रीसूक्तप्रसंगेन ऋग्वेदीयः खिलभागः परिशिष्टसंज्ञयाप्युक्तः। साम्प्रतिकव्यवहारभाषायां तु मूलग्रन्थ-बहिर्भूतोऽशः परिशिष्टपदेनोच्यते। मन्ये अमुमेव साम्प्रतिकपरिशिष्टार्थं मनसि निधाय सातवलेकरबलदेवोपाध्यायादिमिर्महानाम्न्य ऋचः गानमन्त्राश्च केचन सामवेदेऽपि परिशिष्टत्वेनाभिहिताः[21]। परिशिष्टपदेन कोऽभिप्रायः पारम्पर्योपास-कानामित्यत्र सम्भ्रान्ताः परिशिष्टभागस्य प्रक्षिप्तत्वमृग्वेदाद्यसम्बद्धत्वमपि केचन प्रलपन्ति। वस्तुतस्तु खिलापरपर्याय एवं परिशिष्टशब्दः। पूर्वं खिलत्वेन प्रसिद्धस्य वेदभागस्यैव परिशिष्टपदेनाभिधानात्।

परिशिष्टपदार्थस्तु श्रीसूक्तभटभाष्यसमीक्षणे याज्ञिकपीयूषपादैः स्फुटीकृतः[22]। तथा हि, परिशब्दो व्यापकार्थः, शिष्टश्चोपदिष्टार्थः, सतिशिष्टस्वर-बलीयस्त्वादिषु पाणिनीयानुशासने तथाप्रयोगदर्शनात्। एवं हि-शाखाबन्धन-विरहितः सर्वविधाभिलषितसाधकः प्रत्येकमपि वेदाधिकारिणः जनस्य कृते व्यापकत्वेनोपदिष्टो वेदभागः परिशिष्टाख्यः।

अयं भावः-श्रीसूक्तानि खलु चतुर्ष्वपि वेदेषु सन्ति। यथा-

हिरण्यवर्णामिति ऋग्वेदे, रथे अक्षेषु वृषभस्य बीजे इति सूक्तं चतुर्ऋचं यजुर्वेदे, श्रायं तीयमित्यादि सामवेदे, श्रियं धातुर्मयि धेहीत्यादि चाथर्ववेदे। परमेषु चतुष्वंपि सूक्तेषु स्वशाखापरिग्रहनैरपेक्ष्येण सर्वशाखीयोपकारकं श्रीसूक्तमृग्वेदीयमेवेति परिशिष्टपदाभिप्रायः। अथ च पूर्णशाखाध्ययनाभावेऽपि व्रतमात्रस्नातकानां वेदाधिकारिणां कृते सर्वार्थसाधको वेदभागः श्रीसूक्तादिरूपः परिशिष्टत्वेनोक्तः।

एव हि परिशिष्टपदमपि खिलाभिन्नमेवार्थं धारयतीति न खिलपरिशिष्टयोर्विरोधः। खिलांशस्यैवाभिप्रायविशेषेण परिशिष्टोक्तिराचार्याणाम्। अतएव श्रीसूक्तादेः सर्वशाखीयपरिग्रहो विविधग्रन्थेषूपदिष्टो दृष्टश्च। एव परिशिष्टानां वेदबाह्यत्वं प्रक्षिप्तत्व वेति सर्वमपास्तम्।

**अनारभ्याधीताः**

माध्यन्दिनीयसंहितायां कश्चन मन्त्रगणोऽनेकत्र अनारभ्याधीतसंज्ञया महीधरोव्वटाभ्यामुक्तः। किं तात्पर्यमस्याभिधानस्येति विचार उपस्थाप्यते। महीधरस्तु ''अनारभ्याधीता श्रौतकर्मण्यविनियुक्ता ब्रह्मयज्ञार्हाः'' इत्येवमनारभ्याधीतपदार्थ स्पष्टयतिः[23]। परमेतन्न युक्तिसहं प्रतिभाति। यतो हि माध्यन्दिनीयसंहितायां द्वादशाध्याये द्वादशमन्त्राः[24], त्रयस्त्रिंशाध्याये त्रिचत्वारिंशन्मन्त्राः[25], कृत्स्नश्च चतुस्त्रिंशोऽध्यायः; अनारभ्याधीतत्वेन निर्दिष्टाः। एतदन्तर्गता नैके मन्त्रा माध्यन्दिनीयसंहितायामेवान्यत्रोक्ताः श्रौतकर्मसु विनियुक्ताश्च। यथा, यज्ञो देवानाम् मन्त्रः[26] संहितायामष्टमाध्याये पठितस्तत्र विनियुक्तश्च[27]। उप गावः इति[28] त्रयस्त्रिशाध्याय एव विनियुक्तः[29]। दैव्यावध्वर्यू मन्त्रो[30]ऽनारभ्याधीतान्तर्गतस्त्रयस्त्रिशाध्याय एव विनियुक्तः[31]। चतुस्त्रिंशाध्यायोक्तश्च आ कृष्णेन मन्त्रो[32]ऽन्यत्र विनियुक्तो[33] दृश्यते।

एवमेवानारभ्याधीतेषु केचित् प्रतीकोक्तमन्त्रा अप्पन्यत्र विनियुक्ताः सन्ति। यथा त्रयस्त्रिशाध्याये[34] त्वं प्रत्नथा अयं वेनः इति प्रतीकोक्तं मन्त्रद्वयं सप्तमाध्याये विनियुक्तम्[35]। चतुस्त्रिंशाध्याये[36] य इमा विश्वा, विश्वकर्मा विमना, यो नः पिता, अन्नपतेऽन्नस्य, इत्येते प्रतीकोक्ता मन्त्राः क्रमशः सप्तदशाध्याये[37] एकादशाध्याये[38] च विनियुक्ताः सन्ति। अतएवेदं स्फुटं भवति यच्छ्रौतकर्मण्यविनियुक्तत्वादनारभ्याधीतत्वमिति महीधरपरिभाषणं न तेष मन्त्रेषु समन्वेति। तत् परिभाषणं तु संहिताक्रमानुरोधेन। अतोऽत्रास्माकमयं विमर्शः-

आरम्भः प्रवृत्तिः। मन्त्राणां प्रवर्तनं नाम कर्मण्युपयोगः। अनारभ्य कर्मविशेषे विनियोजनमकृत्वैव अधीताः संहितायां पठिता मन्त्रा अनारभ्याधीताः। अर्थादेकस्मिन् श्रौते कर्मणि विनियोजनसंकोचमन्तरा अन्यत्रापि कर्मसु यथायथं विनियोगार्हा मन्त्रा अनारभ्याधीताः सर्वार्याः। ततश्चानारभ्याधीतान्तर्गतानां मन्त्राणामन्यत्र विनियोगोपलब्धौ न विप्रतिपत्तिः सम्भवति।

अनारभ्याधीता इमे खिलरूपा एवेति सर्वानुक्रमणीभाष्यकृद् देवयाज्ञिकोऽभिप्रैति[39]। तथा हि-''खिलशब्देन अनारभ्याधीताः क्वचित् कर्मण्यविनियुक्ताः मन्त्रगणा उच्यन्ते, प्रवायुमच्छ[40] मुंचन्तु मा शपध्यात्[41] अग्निश्च पृथिवी च[42] इत्येवामादयः।'' एतेन अनारभ्याधीतत्वं खिलत्वं चानभिप्रायान्तरमिति फलति।

**महानाम्न्यः**

सामसंहितायां पूर्वार्चिकावसाने महानाम्न्य ऋचो दश पंचपुरीषपदसहिताः पठिताः। इमा महानाम्न्य ऋचः शाकलसंहितायां न सन्ति। ताश्चेमाः विद्वद्भिः खिलरूपेणोच्यन्ते। सातवलेकरमहादयेनात्र महानाम्न्य ऋच इत्येवं वक्तव्ये महानाम्न्यार्चिकः उल्लिखितः। तदेतदाधृत्य वासुदेवशरणाग्रवालवर्येणापि स स्वीकृतः। परमेतौ लेखौ भ्रममूलकावेवेत्यस्माकं विमर्शः। न हि सामसंहितायामार्चिकत्रयं मध्यमार्चिकं वा कुत्राप्युल्लिखितचरम्। वस्तुतस्तु अग्न आयाहीत्यारभ्य पुरीषपदान्तो भागः पूर्वार्चिकस्तत्र च महानाम्न्यादिकं सर्वमन्तर्भवतीत्येषु शिष्टसम्मतः सम्प्रदायविदनुगृहीतः पन्थाः।

महानाम्नीनामृचां गानमप्यारण्यकाण्डे महानाम्नीपर्वत्वेनान्तर्भुक्तं दृश्यत इति न तासां संहितातिरिक्तत्वम्। केचन एतसां परिशिष्टत्वमभिप्रयन्ति। उपनिदानसूत्रादिषु[43] नैतासां परिशिष्टत्वमुक्तमिति तन्मतं विचारणीयमेव भवति। अथ च आरण्यगाने तु भारुण्डं साम, उद्वयमुखं भारुण्डं साम, चतुष्पदागायत्रीयोनिकं सप्तव्याहृतियुत तवश्यावीयं साम चेत्येतानि सातवलेकरमहोदयेन मुद्रापितानि परिशिष्टरूपेणोक्तानि च। परशाखीयत्वादेतेषां परिशिष्टरूपेणोल्लेखः सम्भवति। महानाम्नोनामृचां तु स्थितिर्भिन्ना।

अथ चेत् कथं महानाम्न्यो दश ऋच संहितान्तर्गता अपि सविशेषमुक्ता इत्यत्रोच्यते। महानाम्नीनामृचां वैशिष्ट्यं ब्राह्मणेषु बहुशो दृश्यते। तथा हि, ऐतरेयब्राह्मणे[44]- इन्द्रो वा एताभिमैहानात्मानं निरमिमीत तस्मान्महानाम्न्यः,

कौषीतकिब्राह्मणे[45]- महानाम्नीभिर्वा इन्द्रो वृत्रमहन्, षड्विंशे[46]-वज्रो वै महानाम्न्यः, तांड्यश्रुतिषु च[47]-महान् घोष आसीत् तस्मान्महानाम्न्यः, इत्येवं सामसमहे महानाम्नीनां फलविशेषाधायकत्वात् सर्वशाखीयोपकारकत्वधिया संज्ञाविशेष उक्तः। स चास्मदभिप्रेतखिलक्षणानुकूल एव।

## कुन्तापसूक्तानि

शौनकशाखीयाथर्वसंहितायां विशे काण्डे सप्तविंशत्यधिकशततमसूक्तादारभ्य षड्विंशदुत्तरशततमसूक्तपर्यन्तानि दश सूक्तानि कुन्तापनाम्ना व्यपदिश्यन्ते। एव हि शौनकसंहितानुसारं सप्तचत्वारिंशदुत्तरशतर्चात्मकः संग्रहः कुन्तापाख्यः। पैप्पलादशाखीयसंहितायां नैतानि सूक्तानि दृश्यन्ते। ऋग्वेदीये खिलापरपर्याये परिशिष्टभागेऽपि कुन्तापाध्याये चतुःसूक्तात्मकस्यैतशप्रलापस्य[48] षट् पदानि; 134 संख्याकस्य सूक्तस्यर्गद्वयम्, 136 सूक्तस्याष्टावृचश्च विहाय शिष्टाः सर्वेऽपि कुन्तापमन्त्राः समुपलभ्यन्ते। तेषां च 'नाराशसीः शंसति' इत्यादिकुन्तापोपभागप्रदर्शनपुरस्सरं क्वचिच्च मन्त्रोपन्यासपुरस्सरं निरूपणमैतरेयब्राह्मणे समुपलभ्यते[49]।

गोपथैतरेयशांखायनब्राह्मणेषु वैतानाश्वलायनशांखायनश्रौतसूत्रेषु चापि कुन्तापसामग्री कुन्तापोपविभागानां, नाराशंसीः शंसति, रैभीः शंसति, इत्यादिरूपेण प्रतीकोपन्यासपूर्वकं व्याख्याता विद्यते। अथर्वसंहितायां दशसूक्तात्मकस्य कुन्तापस्योपविभागाः नाराशंसी-रैभी-पारीक्षिती-कारीव्य-दिशां-क्लृप्ति-जनकल्पेन्द्रगाथै-तशप्रलाप-प्रवह्लिका-जिज्ञासेन्य-प्रतिराधप्रतिगरातिवाद-देवनीथ-भूतच्छेदा-हनस्याख्याः सन्तीति गोपथे वैतानसूत्रे च प्रतिपादितम्[50]। परं गोपथ-ब्राह्मणश्वलायनशांखायनवैतानसूत्रशांखायनब्राह्मणादिषु परस्परं कुन्तापोपविभागेष्वृक्संख्यायां च भेदो दृश्यते। स तु स्वस्वसम्प्रदायानुमतो ग्राह्यः।

ऐतरेयब्राह्मणभाष्ये त्वथर्वसंहितायाः सप्तविंशत्यधिकशततमस्याष्टाविंशत्यधिकशततमस्य च सूक्तद्वयस्य त्रिंशद्वात्मकः पदसमूह एव कुन्तापशब्देनाभिधीयत इति सायण आचष्टे। परमेतत् सूक्तद्वयान्तर्गतानामृचां कुन्तापाख्योपविभागनिर्देशाभिप्रायेण, न त्वैतशप्रलापादीनां कुन्तापत्वनिषेधतात्पर्येण, सायणेनैव ''कुन्तापाख्यं सूक्तं खिले कुन्तापनामके ग्रन्थे समाप्नातम्'' इति तत्रैव कुन्तापग्रन्थस्याप्युल्लेखात्।

कुन्तापपदं हि कुयोपपदात् तप् धातोः कर्मण्यण् इत्यणि उपधावृद्धौ कुयशब्दस्य छान्दसे यलोपे उपपदसमासे छान्दसत्वान्नुमागमे सिद्ध्यति। अस्यार्थो विवेचितो गोपथब्राह्मणे[51]- कुयं ह वै नाम कुत्सितं भवति, तद्यत्तपति तस्मात् कुन्तापाः, तत् कुन्तापानां कुन्तापत्वम्, तप्यन्तेऽस्मै कुयानिति तप्तकुयः स्वर्गे लोके प्रतितिष्ठति, इति।

एतेनेदं स्पष्टं भवति यद् कुन्तापमन्त्रा विशेषेण पापोपतापका दुरितनिवारकाश्चेति। कुयशब्दः कुत्सितां योनि याति प्रापयति इति व्युत्पत्त्या पापबोधकः। कुन्तापमन्त्राणां पापापनोदनात्मकफलविशेषाधायकत्वादिमे खिलरूपेणोपनिबद्धाः सर्वार्थत्वाच्च। सर्वोऽपि जनः कुन्तापमन्त्रैः स्वाभिलषितं प्राप्नोति। शांखायनश्रुतावपि, ''अथेतत् कुन्तापं यथाच्छन्दसं शंसति सर्वेषामेव कामानामाप्त्यै''-इत्येवं कुन्तापानां सर्वार्थत्वमुपदिष्टम्[52]।

## संस्थापनम्

पूर्वोक्तशास्त्रानुशीलनेनेदं स्फुटं भवति यत् प्रक्षिप्तः परवर्ती विनियोग-विरहितः साम्प्रदायिकाध्ययनासमादृतो विशृंखलितो वा वेदभागः खिलाख्य इत्येवमुक्तयोऽस्मत्पर्या लोचनेन निरादरणीया भवन्ति। तथा च सर्वशाखीयौ-पकारकः सर्वार्थः सर्वविधफलविशेषसंसावको वेदभागः खिलरूप इति पूर्वाचार्यसम्मतो सिद्धान्त इति शिवम्।

**संदर्भ :**


1. *ऋ.सं. 6।28।2*
2. *अ.सं. 7।115।14*
3. *ऋ.सं. 10।142।3*
4. *वैदिककोशे पृ. 123*
5. *पा. 3।1।135*
6. *मा.सं. 26।1*
7. *मा.सं. 31।14 महीधरः*
8. *अ.को. 2।1।5*
9. *पा. 3।1।135*

10. द्र. अनारभ्यविधानात्तु नाङ्गं कस्यचिदाहितः । जै.न्या.मा. 3 ।6 ।4
11. म.भा.शा. 323 ।10
12. हिन्दीमैत्रायणीसंहिताभूमिका पृ. 7
13. ऋ.ग. 1 ।73 अनन्तरम्
14. वृ.दे. 8 ।85
15. यथा तै.आ. 2 ।9 ।10
16. 2 ।13
17. खिलभूमिका पृष्ठम् 907
18. श.ब्रा. 8 ।3 ।4 ।1 तु.कौ.ब्रा. 30 ।8
19. आ.श्रौ. 2 ।2 ।2 ।3
20. वै.को.पृ. 124
21. वै.सा.सं. पृ. 153
22. श्रीसूक्तेभेडमाष्ये पृ. 12-13
23. भा.सं. 33 ।55 भाष्ये
24. भा.सं. 12 ।90-101
25. भा.सं. 33 ।55-97
26. भा.सं. 33 ।68
27. भा.सं. 8 ।4
28. भा.सं. 33 ।71
29. भा.सं. 33 ।19
30. भा.सं. 33 ।73
31. भा.सं. 33 ।33
32. भा.सं. 34 ।31
33. भा.सं. 33 ।43
34. भा.सं. 33 ।73
35. भा.सं. 7 ।12, 16
36. भा.सं. 34 ।58
37. भा.सं. 17 ।17, 26, 27

38. भा.सं. 11 ।83

39. 1 ।1

40. भा.सं. 33 ।55

41. भा.सं. 120 ।90

42. भा.सं. 26 ।1

43. उप.सू. 6 अध्याये

44. ऐ.बा. 5 ।7

45. कौ. ब्रा. 23 ।2

46. ष.ब्रा. 3 ।11

47. ता.ब्रा. 13 ।4 ।1

48. अ.स. 20 ।129-132

49. ऐ.बा. 6 ।32-36, 30 ।6-10

50. गो.ब्रा.उ. 6 ।12-15 वै.सू. 6 ।2 ।19-31

51. गो.ब्रा.उ. 2 ।6 ।12

52. शां.ब्रा. 30 ।5

# 2

# वैदिकसाहित्ये अश्विनौ

*नेति अनन्तराम शास्त्री*

ऋग्वेदे महत्वपूर्ण देवतासु इन्द्राग्नि सोमानामनन्तरं अश्विनौ स्थानं लभेते। पंचाशत्सूक्तेषु समग्रतया केषुचित् अन्येषु सूक्तेषु इतराभिः देवताभिः सह एतौ आहूतौ। अश्विनौ कौ इति प्रश्नस्य समाधानर्थं प्रचुरा सामग्री लभ्यते। एकत्र तौ अहोरात्राविति, एकत्र दयालू राजानौ इति, एकत्र उषस्सन्ध्ये इति, एकत्र मिथुन नक्षत्र रूपतया च, वर्णितौ।

एतौ दिवः पुत्रौ। वेदेषु दिवोनपाताः इति अनयोः व्यवहारः। केषुचित् स्थलेषु इमौ विवस्वतः तवष्ट्र-दुहितुः 'शख्यू' नामिकायाः जाताविति वर्णितौ। 'पूषा' अनयोः पुत्रः। उषा अनयोः भगिनी।

एतत् युग्मं प्रकाशदेवते। इमौ मिथुनदेवी। एकतरं आभ्यां पृथक् कर्तुमशक्यम् सदा अश्वारूढत्त्वात् अनयोः अश्विनौ इति नाम। इमौ सूर्य-मित्रे। सूर्याश्विनां मैत्री सूर्यपुत्री विवाहेन दृढतरा अभवत्। सूर्यदुहितुः चन्द्रमसा विवाहसमये एतौ चन्द्रमसः संबन्धिनौ इति वर्णितौ। अनेन ज्ञायते इतराभ्योऽपि देवताभ्यः अनयोः सूर्येण संबन्धः अधिकतरः इति। अनेनैव कारणेन एतौ सूर्येण सह सदा संचरतः।

मधुरसः अनयोः प्रियतरः। माध्वी मधु इति विशेषणे इमं तथ्यं द्रढयतः। आभ्याम् धृतं चर्म पात्रं सदा मधुपूर्णम् भवति। एकदा एतौ शत-घटमितं मधु भुवि स्यन्दयामासतुः। एतौ भ्रमरेभ्यः मधु दत्तः। भ्रमरैः सह अनयोः सादृश्यं वर्तते। यद्यपि मधु अनयोः प्रियतरं तथापि सोमपाने अस्ति अभिनिवेशः। सोमरसं एतौ सूर्यया, उषसा च, मिलित्वा पिबतः। अस्मिन् प्रसङ्गे उदाहृता मधुकणाः प्राथशः उषसि तुहिन बिन्दवः। अनयोः रथमपि मधु विभर्ति। एष रथः सूर्यं इव स्वर्णः। एषः

ऋभुभिर्विनिर्मितः। नानाजन्तवोऽमु नयन्ति। क्वचिन्महिषौ क्वचिद् गर्दभौ, क्वचिच्च पक्षिणौ नयतः। एषः रथः द्यावापृथिव्योश्चतुर्दिक्षु च एकेन अह्ना प्रदक्षिणं कुरुते।

अश्विनौ मनुष्याशां मित्रे। बहुषु स्थलेषु एतौ नरौ इति व्यवहृतौ। एतौ मनुष्याणां सहायतां कुरुतः। अत एव भक्ताः अमू-

''उपायातं दाशुषे मर्त्यायि। रथेन वाममर्श्विना वहंन्ता। युयुतमस्मद-निरामनीवां दिवा नक्तं माद्वीं त्रासीयांनः''।

इति आह्वयन्ति। एतौ उदारौ दानवंती इति ''सुदानू'' 'मखबाना' इति विशेषणाभ्यां ज्ञायते। अनयोः 'नासत्यौ' इति विशेषणमेतौ नित्यसत्यस्वरूपौ इति बोधयति। एतौ आश्चर्यमयौ इति दस्रा इति विशेषणेन ज्ञायते। इमौ बलशालिनौ। अतः न कोपि आभ्यां अपराध्यति। अतः ''तुविष्मा अद्रिद्रगू'' इति अनयोः व्यवहारः। एतौ मध्यस्थाननिवासिनौ सिनौ, समुद्रनिवासिनी सर्वव्यापिनौ युवानौ अपि एतौ पुरातनौ अत्यन्तं सुन्दरौ कान्तिमन्तौ, पद्ममालाधारिणौ, मेधाविनौ, अनयोः हिरण्य वर्तानि इति विशेषणेन एत वोः मार्गः स्वर्णमयः इति ज्ञायते।

उषषि सूर्योदयात् प्राक्, अग्नेः उषसश्च अनन्तरं सूर्यस्य ग्रीष्मरूप प्राप्तेः प्राक् च, अपू उदातः। एतौ अन्धकारमयात् अशुभान् च आत्मनः दूरी कुरुतः।

मनुष्यः मनुष्यं माद्विषत् इति जीवित- संघर्षे उत्पन्नाः दोषा अपसरन्तु इति आधिव्याधयः निवारिताः भवन्तु इति च इच्छया भक्ताः अमू पूजयन्ति। अश्विनौ भिषजौ सर्वरोग निवारकौ च। एतौ कष्टेभ्यो मनुष्यमुद्धरतः। मनुष्याणां युद्धेषु विजयेच्छयापि अमू पूज्यौ, तथापि स्वेषां जीवितं शान्तिमयं भूयादिति अभिप्रायेणैव जनाः अमू पूजयन्ति। सुखमय दीर्घायुषः प्राप्तये दम्पत्योः गृह-प्रवेश समये अश्विनौ प्रार्थितौ भवतः।

बह्वीषु कथासु अनयोः दातृत्व वर्णितम्। भुज्यनामानं स्वभक्तं प्रबहण भंगेन समुद्रे निमज्जन्नतम् एनौ उद्धृतवन्तौ। अनेनवै प्रकारेण अनयानपि जनान् कष्टेभ्यः मोचयामासतुः।

''अनारम्भणे तदवीरये धाम नास्थाने अग्रभणे समुद्रे। यदश्विना ऊह्वुः भुज्युंमस्तं शतारित्रां नावमातस्थिवंसम्''।

ग्रीक पुराणेषु द्वौ अश्वरूढौ दिवः (zens) यमौ पुत्रौ वर्तते। एते हेलन

सोदरयोः इष्टकस् नामकयोः सादृश्यं विभ्रतः। अपि च लाटिक देवता द्वितयेन सहाप्यनयोः साद्दश्यमस्ति।

अश्विनो नामान्तरं 'दिवोनपाता' इति लाटिक् wewal weli पदेन, लिथिवेनिया 'Devo Seueli' पदेन, च सादृश्यं विभर्ति। अनयोः पत्न्याः सूर्यायाः लाािटक देवतायाः zuaes नामकायाः देवतायाः साम्यमस्ति। अनयोः व्यवहारः कोलकाक्षरेषु शासनेषु दर्शनात् एतौ इन्डोयूरोपियन् कालिनौ इति ज्ञायते।

# 3

# वैदिकं देवरहस्यम्

*मिताली देव*

वैदिकानि तत्त्वानि पञ्चधा विभज्यन्ते। ऋषयः, पितरः देवाः, असुराः गन्धर्वाश्चेति। एतेषां समष्टिरेव सूक्ष्मं जगदित्याख्यायते। सूक्ष्मं जगदेव देवानां मुख्यं प्रतिपाद्यम्। एषां पञ्चानां विज्ञानेन सर्वं वैदिकं तत्त्वं सुविज्ञातं भवति। वैदिकं सर्वमपि विज्ञानं प्राणतत्त्वमाधारीकृत्यैव प्रवर्तते। आधुनिकस्य विज्ञानस्याधारभूता यथा विद्युच्छक्तिः तथा वैदिकस्य विज्ञानस्य मूल आधारः प्राणतत्त्वमिति प्रतीयते। प्राणश्च रयिश्चेति द्वे मूलतत्त्वे। तत्र प्राणो मुख्यः, रयिस्तु तदधीन। तदुक्तम्-

''प्रजाकामो वै प्रजापतिः, स तपोऽतप्यत स तपस्तप्त्वा मिथुनमुत्पादयते। रयिञ्च प्राणञ्चेत्येतौ मे बहुधा प्रजाः करिष्यत इति। आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः। रयिर्वा एतत्सर्वं यन्मूर्तञ्चामूर्तञ्च, तस्यान्मूर्तिरेव रयिः।'' प्रश्नोपनिषद् 1/4-5

अनया हि श्रुत्या सर्वेषां प्राणानामायतनं सूर्यः रयेश्चायतनं चन्द्रमा इति दर्शितम्। सर्वाश्च मूर्तयः पिण्डरूपा रयिनामकात्तत्त्वाज्जायन्ते। प्राणरयी स्थूलताप्राप्तिक्रमेणाग्नीषोमौ भवतः। अग्नीषोमाभ्यां च सर्वं जगदुत्पाद्यते-

''अग्नीषोमातमकं जगत्'' बृ. जा. 2/4 प्राण एव सर्वस्यादिः स एव स्थूलामवस्थां गतो रयिपदवाच्यां भूतभौतिकावस्थां गच्छतीत्यप्यन्यत्रोक्तम्।

असद्वा इदमग्र आसीत् तदाहुः किन्तदसदासीदिति, ऋषयो वाव तेऽग्रेऽसदासीत्, तदाहुः के त ऋषय इति प्राणा वा ऋषयः। शत.प. ब्रा. 6/1/1/1।

अत्र हि पूर्वमसत्पदेन प्राणरूपाणामृषीणामभिधानं कृतम्। प्राणा एव सत्तारूपेण सर्वत्रानुप्रविशन्ति। प्राणेषु किञ्चिदन्यत् तत्त्वं सत्तारूपेण न प्रविशतीति तेषामसत्वमुक्तमिति।

शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्यकोपनिषत्पदाऽभिधेये जनक-सभायामृषीणां परस्परं ब्रह्मोद्ये शाकल्यस्य प्रश्नानां याज्ञवल्क्येनोत्तरेण देवानामपि प्राणरूपता सुस्पष्टमाम्नाता। एवं हि तत्र शाकल्ययाज्ञवल्क्ययोः प्रश्नोत्तराणि श्रूयन्ते-

''कति देवा याज्ञवल्क्येति। स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच। कत्येव देवा याज्ञवल्क्येति। त्रयस्त्रिंशदित्योमिति होवाच'' बृहदारण्यकोपनिषद् 3/9/1

अनन्तरं पुनः पुनः प्रश्ने षट्, त्रयः, द्वौ, अध्यर्ध, एक इति क्रमेण देवसंख्या भगवता याज्ञवल्क्येन निर्दिष्टा। विवरणप्रश्ने च अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः, इन्द्रश्च प्रजापतिश्चेति त्रयस्त्रिंशत्। तेषां संक्षेपेण- अग्निश्च पृथिवी च वायुश्चान्तरिक्षं च द्यौश्चादित्यश्चेति षट्, तेषामपि संक्षेपे तत्रापि लोकदेवयोरेकीकरणेन त्रयः, तत्राप्यनुस्यूततया अन्नं प्राणश्चेति द्वौ।

ततश्च कतमो अध्यर्थ इति प्रश्ने - ''योऽयं पवत इति। तदाहुर्यदयमेक इवैव पवते। अथ कथमध्यर्ध इति। यदस्मिन्निदं सर्वमध्याध्नोंत्तेनाध्यर्ध इति।'' एवमुत्तीर्य ''कतम एको देवः'' इति प्रश्नः ''प्राणः'' इति समाहितः, तस्यैव च बृंहणात् सर्वमिदं जातमिति तस्यैव ब्रह्मत्वमुक्तम्। ''अमृतः पुरूषः'' इत्यपि तस्य विवरणं तत्रैव कृतम्।

तदेतत्प्रकरणपर्यालोचनेन प्राण एव मुख्यो देवः। स च यद् भूतभौतिकमुत्पादयति तत्तस्य वशगत्वादर्धं गण्यत इत्यध्यर्धो देवो निर्दिष्टः।

''यो यं पवते' इत्युक्तया च वायुरूपता तस्योक्ता। वायुरयं न भौतिकी वायुर्मन्तव्यः, अपि तु तस्य परिचालक आन्तरिक्ष्यः प्राणविशेषो वायुपदेन निर्दिष्टः। तस्यैकस्यैवाग्निः, वायु, आदित्य इति त्रीणि रूपाणि स्थानभेदेन प्रतिष्ठितानि। स्थानानां पृथिव्यन्तारिक्षादिवामपि स्थानिभिः सह परिगणने तु षड् देवाः। अग्न्यादीनामेकैकस्य पृथक् पृथगवस्थागणने, केन्द्रस्थस्येन्द्रस्य सर्वमण्डलव्यापकस्य प्रजापतेश्चापि सह गणने त्रयस्त्रिंशद् देवाः सम्पद्यन्ते। एषां चैकेकस्यानन्तकार्यकारित्वात् त्रयस्त्रिंशच्छतानि त्रयस्त्रिंशत्सहस्राणीत्यादि देवानां संख्या आख्यायते। इदानीन्तु पुराणाद्याधारेण त्रयस्त्रिंशत् कोटय इत्यपि प्रसिद्धिः।

सेयं सर्वाऽप्यनन्तकार्यकारित्वाद् बोध्या। पृथक् पृथङ् नामग्रहणं तु त्रयस्त्रिंशत एव श्रुतिपुराणादिषु दृश्यते। त्रयस्त्रिंशत् संख्याया विवरणं तु ऋङ्मन्त्रेष्वपि श्रूयत-

इति स्तुतासो असथा रिशादसो येस्थ त्रयश्च त्रिंशच्च।

मनोर्देवा यज्ञियासः - ऋक् 8/30/2

शाखान्तर मन्त्रे वस्वादिविवरणमपि श्रयूते-

**अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभिरभि रक्षुतुत्मना।**

**इन्द्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैनो वरुणः शर्म संयत्।।**

**आश्वलायन श्रौत सूत्र 2/11**

संक्षिप्त देवतात्रयं तु भगवान यास्कोऽपि देवतकाण्डे देवतानिरूपणे सिद्धान्तयति - ''तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानः, वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः''

निरुक्त देवतकाण्ड। अ. प्रथमः

अत्र निरुक्तकृता स्थानिनः प्राण विशेषा एवं मुख्यतया देवपदवाच्या उक्ताः। अग्निवायु चेमौ निरुक्तकृता निरूप्यमाणौ न भौतिकौ, अपि तु प्राणरूपौ देवविशेषावेव।

**''यत्किञ्चिद्दार्ष्टिविषयामग्निकर्मैव तत् या च**
**का च बलकृतिरिन्द्रकमैव तत् यत्किञ्चित्**
**प्रवह्णीतमादित्यकर्मैवतत्। (निरु. दै.का. 1अ.)**

इति तेनैव तद्देवतास्वरूपव्याकरणाद् अन्तरिक्षे वायुर्वा इन्द्रो वेति विकल्पो य आख्यातस्तस्याशयमेवं भाष्यकारः श्रीदुर्गाचार्य आह् यद् येषां कार्य प्रत्यक्षं दृश्यते, त एव देवा अत्रोक्ताः। भूम्यामग्निकार्यम् दिवि चादित्यकार्य प्रत्यक्षं दृश्यते। अन्तरिक्ष इन्द्रकार्यं विद्युदादि तु सदा न दृश्यते, कदाचिद् वर्षादावेव दृग्गोचरीभवतीति सदा दृश्मानकार्यो वायुरेव समुचिततयाऽत्रोपात्तः। किन्तु यस्य स्तुतिर्वेदेषु शतशस्सूक्तैस्समाम्नायते स देवराज इन्द्रोऽपि नोपेक्षामर्हतीत्यन्तरिक्षे द्वावपि देवावुपात्तौ। सदा दृश्यकार्यत्वाद् वायुः सर्वदेवप्राध्यान्यान्तु इन्द्र इति।

तदितत्थमृषयो देवाश्च प्राणविशेषा एवेति सम्यक् प्रमाणैः प्रसाधितम्। तत्र ऋषय आद्याः देवास्तु तज्जन्या इत्यपि शतपथप्रमाणेन संकेतितम् भगवान् मनुरप्येषां जन्यजनकभावमाह-

**ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः।**
**देवेभ्यस्तु जगत्सर्व चरं स्थाण्वनुपूर्वशः।।**

**(मनु. सं. 3/201)**

देवाश्च असुराश्चेति द्विविधाः प्राणाः पितृभ्य उत्पद्यन्ते। तत्र प्रकाशे देवानां प्राधान्यम् तमसि त्वसुराणाम् प्राधान्यम् केचित् मन्यन्ते। अत एव रात्रिमासुरीमाहुः। ब्रह्मसूत्रेष्वपि देवताधिकरणे भगवता बादरायणेन देवानधि-कृत्योक्तम्- ''ज्योतिषि भावाच्च'' 1/3/32 इति ज्योतिषि संसक्ता एव देवा न तु शरीरभृतः। तेषां ब्रह्मविद्यायामधिकारः कथं संभवेदिति तदभिप्रायः। एतत् सूत्रं व्याख्यातं श्रीशंकराचार्यपादैः शारीरकभाष्य - ''यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बभ्रमज्जगदवभासयति, तस्मिन्नादित्यादयो देवतावचनाः शब्द प्रयुज्यन्ते, लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च, न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते मृदादिवदचेतनत्वावगमात् एतेनाग्न्यादयो व्याख्याताः''

तेन सूर्यमण्डलसंसक्ततैवादित्यादीनां देवानां स्फुटीकृता। मण्डले संसक्ताश्च तत्परिचालकाः प्राणविशेषा एव देवपदवाच्या इत्युक्तं भवति। यत्वग्रिमसूत्रे देवानामप्यधिकारः प्रतिपादितौ यच्च तत्र भाष्यकृद्भिर्व्याख्यातम्- ''ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति, मन्त्रार्थवादादिषु तथा व्यवहारात्। अस्ति ऐश्वर्य योगाद्देवतानां यथेष्टं च तं तं विग्रह ग्रहीतुं सामर्थ्यम्'' ।।

तदेतद् द्वैविध्यं देवानामग्रे व्याख्यास्यते। इह तु एतावदेव वक्तव्यं यत् प्रकाशभागो देवैः सम्पाद्यते, तत्रैव च त आवर्तमानास्तिष्ठन्ति। तमस्त्वसुरप्राणैः, सम्पादितम्, तत्रैव चासुराणां स्थितिः। एते देवा असुराश्च पितृप्राणेभ्य आविर्भवन्ति, एभ्यश्चाग्रे गन्धर्वप्राणः। तत्र ऋषयः सप्त, पितरोऽष्टौ, देवास्त्रयस्त्रिंशत्, असुरा नवनवतिः, गन्धर्वाः सप्तविंशतिरिति।

मानवास्तु मनोः प्राणादुत्पद्यन्ते। स चार्द्धेन्द्ररूपः। प्राणरूपा देवास्तत्संख्या त्रयस्त्रिंशच्च पूर्वं प्रतिपादिता। तेऽप्यध्यात्मादिभेदेन नानाविधत्वं प्रतिपद्यन्ते-

अग्निर्वाग् भूत्वा मुखं प्राविशत् वायुः भूत्वा नासिके प्राविशत्,
आदित्यश्चक्षुर्भुत्वा अक्षिणी प्राविशत्। (ऐ.उ.द्वि.क.4)

श्रुतिषु इन्द्रियाणां देवत्वमाध्यात्ममाम्नातम्। अधिदैवतं तारामण्डलेऽपि देवा विव्रियन्ते। सूर्यस्य तु सर्वदेवसमष्टित्वं प्रतिपादितम्-

"चित्रं देवानामुदगादनीकम् (ऋ.1/115/1) इति सर्वत्र सुप्रसिद्धे सूर्योपस्थानमन्त्रेऽपि देवानां चित्रमनीकं सूर्य इति स्पष्टीभवत्येव। एवं चन्द्रमा देवता, नक्षत्रादि देवता, इत्याद्यपि रुद्राध्यायादिषु समाम्नायते, तेषु तेषु नक्षत्रेषु तद् योगतारानाम्ना ज्योतिर्विद एकां तारां व्यवहरन्ति। सा देवरूपैव मन्यते। तामाश्रित्यैव च तत्तन्नक्षत्रदेवानां यागस्तैत्तिरीयब्राह्मणे तृतीयाकाण्डे सुविस्तृतं वर्णितम्-

**स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वदेवाः।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्त नो बृहस्पतिर्दधातु।।**

**(यजु. सं. 24/19)**

अस्य पर्यालोचने क्रियमाणे संशयोऽयमुदेति यदिन्द्रस्य, पूष्णः, तार्क्ष्यस्य, बृहस्पतेश्च कः परस्परं सम्बन्धो येन ते मिलिता अत्र निर्दिष्टा। द्विविधो हि देवानां सम्बन्धो निरुक्तकृपा व्याख्यातः - संस्तविकश्च, एकहविभक्तित्व च। उभयविधोऽपि नैष क्वाप्यन्यत्र दृष्टः। नैषां सम्मिलितानामुद्देश्येन क्वापि हविर्दानं विहितम्, नाप्येकस्थानस्थिताः, न चाप्यन्यत्र सहस्तुतिरपि श्रूयते।

यथा प्राणरूपा देवा वेदे प्रसिद्ध्यन्ति तथा प्राणिरूपा अपि ते वेदेषु समाम्यनायन्ते।

"अन्वाख्याने त्वदुद्यते, इतिहासे त्वत्" शतपथ ब्रा. 11/1/6/9 अत्र शतपथब्राह्मण उत्पत्याख्याने सृष्टिप्रक्रियायां देवा अन्ये भवन्ति, इतिहासे त्वन्य इति स्फुटमुक्तम्। इतिहासस्य संबन्धः प्राणिरूपैदेवैरिति तदाशयः संकेतितम्-

**सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम।**
**दिवं पृथिव्या अध्यारूहामाविदाम देवान् स्वर्ज्योति।।**

**(यजु. सं. 8/52)**

अत्र द्युलोकारोहणान्तरं देवानां ज्ञानमाम्नातम् तेन द्युलोके प्राणिभूता देवा निवसन्तीति संकेत्यते। सृष्टिक्रमे विकासवादो वेदपुराणादिष्वपि वर्णितः। आधुनिकेवैज्ञानिकैरापि च स एव सिद्धान्ततेन मन्यते। तत्र वैदिकदृष्ट्या पार्थिवेषु प्राणिषु प्राणिषु सूर्याकर्षणं यावद्वर्धत स एव प्राणिनां विकासः। प्राणिषु बुद्धिः सौरप्राणेभ्य एव प्रादुर्भवति वर्द्धते चेत्यस्मादाराध्येन ब्रह्म गायत्रीमन्त्रेणैव

सुप्रसिद्धयति। यावदधिकं च यस्मिन्प्राणिनि सौरप्राणजनितं सूर्याभिमुखमाकर्षणं तावदेव स पृथिव्या आकर्षणाद् विमुच्यते बुद्धौ च तस्य प्रागल्भ्यं प्रवर्धते।

दैवसर्गान्तर्गताः प्राणिनस्तु स्वाभावादेव पृथिव्या आकर्षणाद् विमुक्ता अन्तरिक्षे दिवि च सदैव विचरणशीलाः। तेषां शरीरस्य सूक्ष्मभूतजन्यतया विद्याप्रभावेणान्तर्धानशीलतया च तेऽस्मत्प्रत्यक्षा न भवन्ति। लोकान्तरस्था देवा अपि द्विविधाः शास्त्रेष्वाख्यायन्ते- (1) अजानदेवाः (2) कर्मदेवाश्च। सर्गारम्भ एव ये देवत्वं प्राप्तास्ते अजानदेवाः। ये तु मनुष्या यज्ञादिबलेन देवत्वं प्राप्नुवन्ति ते कर्मदेवाः। कर्मणा देवलोकप्राप्तिरपि श्रुतिषु बहुधाऽम्नायते- ''दिवं पृथिव्या अध्यारुहाम'' इति मन्त्रे 'मर्तासः सन्तो अमृतत्वमानशुः'। ऋ.1/110/4।

**पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।**
**स त्वैतेभ्यः परिददत् पितृभ्योऽग्निर्देवेभ्यः सुविन्त्रियेभ्यः।।**

**(10/17/3)**

इत्यत्रापि चाग्नेर्देवेषु प्रापणं मृतानां श्रूयते।

एवं बहुषु मन्त्रेषु द्रष्टव्यम्। एत एव देवाः ''अष्टविकल्पो देवः'' इति सांख्यकारिकायां चतुर्दशविधभूतसर्गो व्याख्यातः। इतोऽन्येऽपि पृथिवीस्था अपि देवाः श्रुतिष्वेवं श्रूयन्ते। तदुक्तं वाजसनेयश्रुतौ - ''द्वया वै देवा देवाः अहैव देवाः अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः'' शतपथ2/2/2/26 पृथिवीस्थेष्वप्यस्ति द्वैविध्यम्। उत्तरस्यां दिशि शर्यणावतः पर्वतस्योत्तरभागे प्रकृतिरचितां देवसंस्थामुपजीव्य पुरा पृथिव्यामपि देवसंस्था प्रकल्प्यते स्म - ''देवविशः कल्पयितव्यास्ता अनु मनुष्यविशः कल्प्यन्ते'' ऐ.ब्रा. 2/32 इत्याद्यासु ब्राह्मणश्रुतिषु तत्संकेतः स्पष्टमुपलभ्यते।

तदित्थं सङ्कलनया सप्तविधा अत्र देवा मया दिग्स्वरूपेण प्रदर्शिताः मुख्याः (1) प्राणरूपा देवाः (2) तेषामाध्यात्मरूपं (3) अधिदैवतं तारामण्डलादिषु रूपम् (4) अधिभूतमग्निवाय्वादि (5) लोकान्तरस्था प्राणिनो देवाः (6) भूमण्डलस्थाः सुमेरुप्रान्तवासिनो देवाः (7) भारतस्या विशिष्टा विद्वांसो वीराश्चय देवाः। एतेषां सर्वेषां परस्परं कः सम्बन्ध? कुतश्चैकस्यैव देवशब्दस्य तद्विशेषवाचकानामिन्द्रवरुणादिशब्दानां च विभिन्नेषु प्रवृत्तितिरत्येवं वैदिकं देवरहस्यम्।

# 4

# वैदिकवाङ्मये भक्तिः

*मिथिलाप्रसादत्रिपाठी*

भारतीय-मनीषा-संवलित-चेतसां विदुषाङ्कृते कल्पवृक्षायते वैदिकं साहित्यम्। तत्र ज्ञानोपासनाकर्ममूलका विषया प्रामुख्येण वरीवर्तन्ते। ज्ञानस्य मूलं तत्त्वं बुद्धिरेव। कर्मणः तपः। उपासनायाश्च श्रद्धा-विश्वासौ। बुद्धिस्तपः श्रद्धाविश्वासाश्च परस्परं संबद्धा एव सन्ति। यथा ज्ञानाय कर्मणः (तपसः) उपासनायाश्च आवश्यकता भवति; तथैव कर्मणे ज्ञानस्य उपासनायाश्च। एवमेव उपासनार्थं कर्म-ज्ञानयोः सहभागितावश्यकी भवति।

जगतः नियामिका शक्तिस्सर्वैरङ्गीक्रियते। तस्या अमूर्तरूपं यथा संकल्प्यते; मानवैस्तथा रागात्मिकया भावनया स्वरूपचयनं क्रियते। अनादि कालादेव मानवेषु स्वेष्टताभिव्यंजकाय भावादृतः स्वरूपं किमपि स्वीकृतम्। भावघनत्वं रागाकुलत्वं च तां शक्तिं यया भगवान् इति शब्दयते सैव 'भक्तिः' नारदेन ''सा त्वस्मिन् परमप्रेमरूपा'' तथा च शाण्डिल्येन 'सा परानुशक्तिरीश्वरे' इति सूत्रधिया भक्तिः परिभाषिता।

वैदिक-मन्त्राणां देवता ऋषयो विनियोगादयश्च प्राप्यन्ते। प्रत्येकेषां मन्त्राणामियं पद्धतिरेव भक्तिरूपेण कालान्तरे परिणता। आनन्दमूर्तः सदाभास-चिदाभासौ तोषदशायां शृङ्गारपरायणौ भवतः। मनसि परितुष्टे जगतः सापेक्षता निरस्ता भवति। एतादृशो जन एव निवातस्थदीप इव आचरितुं क्षमः। तोषाय संपादिताः प्रयासा एव मन्त्रसृष्ट्यै हेतवो जाताः। देवस्वरूपाणि अपि मानवैः स्वशान्त्यै निष्पादितानि।

स्तुति-मन्त्रमयानि सूक्तानि ऋग्वेदः, यज्ञार्थमभिप्रवर्तनम् यजुर्वेदः, देवानां सांगीतिकमाह्वानम् सामवेदः प्रस्तौति। एवमेतेषु स्तुतिः प्रार्थनोपासना च वितताः।

शक्तेः स्वरूपकार्ययोर्वर्णनपुरस्सरं नमनमेव स्तुतिः। कामनया कृता प्रकृष्टा याचना प्रार्थनेति प्रथिता। स्वकीयभीष्टमुद्दिश्य तदनुकूलनाय श्रवणकीर्तनादयः क्रियाः प्रभोरनुग्रहलाभार्थं तन्मयत्वेन संपाद्यन्ते, 'उपासना' व्यपदेशेन बोधिताश्च भवन्ति। ज्ञानकर्मोपासनानां मार्गत्रयसंगमरूपा त्रिवेणी भक्तिरीति। ज्ञानस्य बुद्ध्या सह कर्मणः हृदयेन चेतना शक्त्या च सह संबन्धः प्रतीयते। ज्ञानकर्मणोः प्रभोरनुग्रहेण सार्धं सामञ्जस्य लाभो वैदिकी-भक्तेरादर्शः ज्ञान-भारती, कर्म-कालिन्दी, उपासना-गङ्गा च सम्मिल्य भक्तिप्रयागे स्वात्मसमर्पणं कुर्वन्ति महारसत्वञ्चाप्नुवन्ति। भक्तेः ज्ञानकर्मोपासना स्वरूपा त्रिवेणी भक्तिविहारिणः प्रभोः सदा शाश्वतं संयोगं संसूचयति। ज्ञानमेवास्त्याहारः मानवमस्तिष्कस्य। तस्य प्राणश्री कर्मनाम।

भारतस्य प्राक्तनम् साहित्यम् वेद एवास्ति। तत्र भक्तेरुत्सः गुप्तः व्याप्तश्च। वैदिके युगे यज्ञानां प्रधानतासीत्। यज्ञार्थमेव मन्त्राणामुपयोगः प्रसृतः। तत्रापि सर्वातिशायिनी शक्तिरीशस्य स्वीकृतासीत्। तद्यथा-

**यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषोऽस्तीत्येनम्।**
**सो अर्यः पुष्टीर्विज इव आमिनाति श्रद्धस्मै धत्त स जनास इन्द्रः।।**[1]

यं भयङ्करं देवं जनाः पृच्छन्ति; वच गतोऽसौ केचन इत्थं वदन्ति यदयं नास्ति स उद्वेजक इव शत्रुधनं बलाद्धरति। तस्मिन्निन्द्रे विश्वासं दधत। जनाः! स इन्द्रः। तस्याखण्डशक्तिहेतोः काङ्क्षते वैदिकः-

**अनुत्तमा ते मधवन्न किन्तु न त्वावां अस्ति देवता विदानः।**
**न जायमानो न शते न जातो यानि करिष्या कृणुहि प्रवृद्ध।।**[2]

वैदिकयुगेऽप्यासीदीश्वरस्य सत्ता स्वीकृता। एतदवश्यम् यद्वेदेषु नैतादृशो देवो वर्ण्यते तत्र सर्वे देवाः समाहिताः स्युः। देवागारे प्रकोष्ठे वा संस्थितास्सन्तो वन्दनापरायणा भक्तिरता वा भूत्वा सर्वमवसितं स्याद्यथा तथाविधमायोजनन्तत्र न प्राप्यते। अनुसमयं विविधा देवा वन्द्यमाना बभूवुः। तेषां नामानि-देवो, द्युरापोऽन्तरिक्षमोषधिर्वनस्पतिर्वाणौ गिरिरग्निरिन्द्रपवनमेघादयः सर्वव्यापिनः तथा सर्वमया इति मत्वा वन्द्यन्ते स्म तदानीन्तनम्। नामजपार्थमोङ्कार एवासीत्। नासीदवतारविशेषस्य प्रतिष्टातो नामजपक्रियासमीचीनाऽपि। पूजनाय शिवलिङ्गस्य कल्पिता परम्परा भास्यते। लिङ्गस्य तात्पर्यन्तु प्रतीकं चिह्नं वा भवति। शिवस्यापि तात्पर्यं कल्याणमिति भवति। केचन विद्वांसः ब्रह्माण्डस्य प्रतीकं शिवलिङ्गम्

शालिग्रामपूजनमौषधिपरकं मन्यन्ते। यज्ञस्य हवनकुण्डे प्रज्वलिताऽग्निशिखेव शिवलिङ्गस्य पूर्वरूपतां व्यनक्ति। वैदिककालानन्तरं भक्तिशास्त्रे नवधाभक्तिरथ च पंचोपासना लभ्यते। वेदेष्वस्याः स्वरूपमस्पष्टम्, परन्तु वैदिका ऋषयः काले काले उदात्तदृष्ट्या शक्तिसंपन्नान् विभूतीः दृष्ट्वा तदनुभाविताः तमीश्वरमिति संकल्प्य स्वकीयेन श्रद्धामयेन जीवनतत्त्वेन विराट्पुरुषमनन्तशक्तिसंपन्नं मूर्तरूपमाहुः। शक्तिस्वरूपश्चासौ प्रभुमयो भूत्वा ऋषिभिः ध्यानविषयोभूतं सीमितञ्च भमकारि।

संहितासाहित्ये मूर्तिप्रतिष्ठाया अभावः प्राप्यते, तदानीमासीन्निराकारेश्वरस्य प्राधान्यमिति चेन्मन्यते कोऽपि। तत्तु मन्त्रभाष्यानुसारेण संदिग्धमेव यतो हि प्रकृतेः महनीयानि तत्त्वानि विविधेषूपलक्ष्येष्वाहूताबभूवुः। अनेन प्रभुरसौ साकारनिराकाररूपे निष्पन्नः। ऋषिकल्पनासु निर्णीतो देवः श्रद्धायुतैः स्तवनैः प्रत्यक्षीकृतस्तैरतोऽप्युभयात्मकः। वेदप्रतिपादितः प्रभुः सृष्टेर्व्यवस्थापकः, शासकः, राजा, दंडदाता, जीवकर्मफलप्रदः, न्यायी, स्वामी, पिता, माता, बन्धुः सखादि- रूपेणोपवर्णितः। यथा-

**सृष्टिव्यवस्थापकः -**

(1) योभूतञ्च भव्यञ्च सर्वं यश्चाधितिष्ठति। अथर्व 23/4/1

(2) यो भूतानामधिपतिः यस्मिंल्लोका अधिश्रिताः।
य ईशे महतो महांस्तेन गृह्णामि त्वामहम्।। यजु. 20/32

**शासकः -** पतिर्जज्ञे वृषक्रतुः- ऋग्वेद 6/45/16।

**स्वामी -** 1. तमीशानं जगतस्तस्थुषस्पतिं धियं। जिन्वमवसे हूमहे वयम्।
यजु. 25/18।

2. इन्द्रमीशानमोजसा अभिस्तोमा अनूषत। ऋग्वेद 1/11/8।

3. मा नोनिदे च वक्तये अयेरिन्धीरराळे।
त्वे अपि क्रतुर्मम ।। 7/31/57।

**राजा -**

1. निषषाद धृतव्रतो वरुणः पस्त्यासु आ।
साम्राज्याय सुक्रतुः।। ऋ. 1/23/10।

2. चित्र इद्राजा राजका इदन्यके यजे सरस्वतीमनु।
पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत।। ऋ. 8/21/28।

3. यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशेऽस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।। यज. 23/3।
4. यस्तिष्ठति चरति यश्च वंचति यो निलायं चरति यः प्रतंकम्।
द्वौ संनिषद्य यन्मंत्रयेते राजा तद्वेद वरुणस्तृतीयः।। अथर्व. 4/16/2।
5. उत यो द्यामति सर्पात् परस्तात् न स मुच्या तै वरुणस्य राज्ञः।
दिवः स्पशः प्रचरन्ती दमस्य सहस्राक्षा अति पश्यन्ति भूमिम्।।
अथर्व. 4/16/4।

**न्यायी -**

1. मा पृणन्तो दुरितमेन आरन् मा जारिषुः सूरयः सुव्रतासः।
अन्यस्तेषां परिधिरस्तु कश्चित् अपृणन्तमभिसंयन्तु शोकाः।।
ऋ. 1/125/7।
2. यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेतत्सत्यमङ्गिरः।।
ऋ. 1/1/6।
3. सोऽर्यः पुष्टीर्विज इव आमिनाति। ऋग्वेद 2/12/5।
4. मायाभिरिन्द्रमायिनं त्वं शुष्णमवातिरः।
विदुष्टे तस्य मेधिराः तेषां श्रवांसि उत्तिर।। ऋ. 1/11/7।
5. शन्नो भवन्त्वर्यमा। यजुर्वेद 36/9।

**दयालुः**

1. यो मृळयंति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः। ऋ. 7/87/7।
2. अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम्।
प्रेमन्धः ख्यत् निःश्रोणो भूत।। ऋग्वेद 8/79/2

**आत्मीयः**

1. त्वयेदिन्द्र युजा वयं प्रतिब्रुवीमहि स्पृधः।
त्वमस्माकं तव क्ष्मसि।। ऋ. 8/92/32
2. ते स्याम देव वरुण ते मित्र सूरिभिः सह।
इषं श्वश्च धीमहि।। ऋ. 7/66/9

**पितृरूप -**

शिक्षेयमिति महयते दिवेदिवे राम आ कुहचिद् विदे।

न हि त्वदन्यत् मघवन् न आप्यं वस्यो अस्ति पिता च न।।

ऋ. 7/32/19

**त्राता माता च -**

1. त्वं हि नो पिता वसो त्वं माता शतक्रतो बभूविथ।
अथा ते सुम्न मीमहे।। ऋग्वेद 8/98/11

2. त्वं माता तरणे चेत्यो भूः पिता माता सदस्मिन् मानुषाणाम्

ऋग्वेद 8/98/11

3. ईश्वरः पितृतमः पितृणाम् इति। 4/17/17

**बन्धुर्जनिता विधाता च -**

स नो बन्धुर्जनितास विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धमन्नध्यैरयन्त।।

यजु. 32/10

**मित्रम्-**

(क) इन्द्रस्य युज्यः सखा। ऋ. 1/27/12

(ख) त्वं जामिर्जनानामग्ने मित्रोऽसि प्रियः। सखा सखिभ्य ईड्यः।

ऋ. 1/75/4

(ग) देवो देवानामसि मित्रोऽद्भूतो वसुर्वसूनामासिचारुरध्वरे।
शर्मन्स्याम तत्त्व स प्रथस्तमेऽग्नेसख्ये मा रिषा मावयं तव।।

अथर्व. 1/94/13

(घ) प्रास्त्राक् बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महा अजमस्य राजा।

ऋ. 4/53/4

**औदार्यम्-**

(क) अग्निः सप्ति वाजम्भरं ददाति अग्निर्वीरं श्रुत्यं कर्मनिष्टाम्।
अग्नी रोदसी विचरत् समञ्जन् अग्निर्नारीं वीरकुक्षिं पुरान्धिम्।।

ऋ. 10/80/1

(ख) सहस्रं यस्य रातयः उत वा सन्ति भूयसीः।। ऋग्वेद 1/11/8

**सौन्दर्यकेन्द्रम्-**

(1) राजा हि कं भुवनानामभिश्रीः।। ऋ. 1/7/61

(2) त्वद् विश्वा सुभग सौभगान्यग्ने वियन्ति बनिनो न वयाः।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टि रीड्यो रीतिरपाम्।।

ऋग्वेद 6/13/1

ईश्वरस्येमानि स्वरूपाणि तत्प्रभावं व्यञ्जयितुं पूर्णतः क्षमाणि। गुणान् प्रभावान् वा प्रति आकर्षणम् स्वभावसिद्धमेव भवति। प्रभोः गुणान् प्रति यद्वा प्रभावं प्रति श्रद्धायुतो जीवः स्वात्मीयतां कामयमानः तद् घनिष्ठतां प्रार्थयमानः सायुज्यं भजते। भक्तेरियमेवेयत्ता नास्ति। ईश्वरस्यान्तिके वासः तद्वदाचरणम्, तत्सायुज्यम् तदैश्वर्यसमन्वितत्वमित्यादयः सामीप्यम्, सारूप्यम्, सालोक्यम्, सार्ष्टि प्रमुख-भक्तयः कथ्यन्ते। परञ्चैतेभ्योऽत्युत्कृष्टतरं भवति भक्तेराराधकः। जीवोऽपूर्ण-स्ततोऽयं पूर्णतायै पूर्णतमं भगवद्रूपं चिन्तयन् यापयति कालम्। अणुषु हृदये च प्रभुं ध्यायन्ध्यायमसौ सामीप्यमेव प्रस्तौति। स्वेष्टदेवस्याराधनामन्दिरं प्रविश्य स्वेष्टानुकलां वेशभूषामङ्गीकृत्य पंचसंस्काराभिहितान् मुद्रादीन् संधार्य जीवोऽयं लभते सारूप्यम्। तस्येश्वरस्य प्रभावे प्रकाशे च रतः पार्श्वयोरभितश्च ध्यायन् सालोक्यतां भजते जीवः। अनुक्षणं तच्चिन्तनं भजनञ्च कृत्वा विदेहावस्थां प्राप्नोति, तन्मयं भूत्वा भक्तं स्मरति, वस्तुतस्तल्लीलायामेव मग्नो भवति। प्राप्तचेतनस्त्वयमेव ब्रवीति-

**''माऽहं ब्रह्म निराकुर्याम्। मा मा ब्रह्म निराकरोत्।**
**अनिराकरणमस्तु।।''**

अहं ब्रह्मणः पृथक् न स्याम्। ब्रह्म मां पृथक् न करोतु। ब्रह्मणोस्मदीय-मैक्यञ्च स्यात्। तथा च प्रार्थयते-

**उप त्वाग्ने दिवे दिवे दोषावस्तर्धियावयम्।**
**नमो भरन्त एमसि।। ऋग्वेद 1।1।7**

भो तमःप्रकाशक! अग्निदेव! वयं कर्म स्तुतिञ्च कुर्वन्तः तवान्तिकमा-गच्छामः। साधकः प्रार्थनासंरंभविह्वलः स्फुटीकरोति-

**मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम्।**
**मन्ये त्वा सत्त्वानामिन्द्रकेतुं मन्ये त्वा वृषभश्चर्षणीनाम्।।**

**ऋग्वेद 8।96।4**

वैदिकयुगे यज्ञ-प्राधान्यम् वरीवर्ति स्म। याज्ञिकाः तदानीन्तनं पूज्या

आसन्। यज्ञे देवपूजा, तन्महत्त्वप्रभावयोः वार्ता सङ्गतिस्तदुद्दिश्य कृतं दानञ्च प्रामुख्येण निष्पाद्यते स्म। यज्ञीयाः देवाः शक्तेरेकस्या एवाधिष्ठातारो भवन्तीति। सर्वशक्तिमयोऽपि वैदिको देवो विविधरूपः। एवमेतेषां सत्कर्मणां बलाद्यदि श्रेष्ठतमा पदवी लभ्यते, सा च स्यादच्युता तन्तत्र गर्वदम्भयोर्वा प्रवेशः सन्दिह्यते। अयमहम्भावः संवर्हितः सन् विशीर्णतामेष्यति। यतो हीश्वरस्य सत्तास्वीकरणे प्रभावानुभूतौ सत्यां तदस्तित्वस्वीकरणक्षण एवाहंकारस्य कलऽपचीयते। ईश्वरानुभवपूर्णिमैवाहंकारस्याऽमा। अतो 'च्यवनमच्युताना' मिति स्मर्यते। 'च्यवन' इति पदं क्रिया व्यापारावबोधकम्। क्रियाव्यापार एव शक्तिद्योतकः। उद्देश्यन्तु सदा मूर्तिमत् रूपवच्च भवति। यद्वा भवति पुरुषमयः क्रिया च तस्य प्रकृतिरिति। क्रियैव तस्य महत्त्वाभिव्यंञ्जिका शक्तिरस्ति। अतः सर्वविध उपास्य आराध्योऽर्घ्यश्च प्रभुरेव। स एव क्रियाहंकार-नरक-पंकादुद्धृत्य स्वानुभवगङ्गोदकेन स्नापयन्नच्युतस्य वैकुण्ठ-लोकं प्रति नयति जीवान्। सूक्ष्मैक्षिकयावलोकनेन तदेव शक्तीनां स्रोतः। यथा नृपतिवाहिनीं सूचयति पताका। यथा च कस्यापि राष्ट्रस्याभिव्यक्तिस्तस्य राष्ट्र-ध्वजतो भवति। ध्वजमधोऽधो देशविशेषस्तरङ्गायते। तद्वदेव प्रभुः 'सत्त्वानामिन्द्र-केतुः' वर्तते। एवंविधैश्वर्यमण्डिता सा पताका शक्तिवाहिन्या अनुशंसनम् कुर्वती समुल्लसन्ती स्थिता च भवति निरन्तरम्।

'वृषभं चर्षणीनाम्' इत्येतेनापि भक्तभगवतोरान्तरिकं दुर्बोध्यञ्च रहस्यं चकास्ति। यः प्रभुं याचते कामनाम्। प्रभुनं केवलं तत्प्रदातापि च वर्षणं विद्धाति। तत्र सर्वाः कामना वा घनीभूताः। प्रभुरेवंविधो जलदः यः प्रार्थना-निदाघावसाने कृपासारपरायणः प्रार्थनाभूमिं तर्पयति। भक्तस्तु तृप्तः सन् निष्कामोऽकामो वा भवति। भक्तिरतं प्रभुरेव लालयति अनिच्छन्तमपि भूयो प्रददाति। तदीशः निभृत-वर्णकृत्वान्तरात्मानं पूर्णतमं सान्द्रं कुर्वन्निच्छापूर्तिं विदधाति।

ईश्वरस्य सत्ताभासः घनीभूतो भवति प्रसक्त्यानुप्रसक्त्या। जीवः स्वान्तरात्मनि दृढतरं गृहीतं तत्प्रभावसञ्चयं कृत्वा एतादृशीं सीमामाप्नोति या तदनुभवनिष्णातधारामभिव्यक्तये व्याकुलयति। शब्दसहकृता सा धारा यदाविर्भवति तदा स्वात्मत्वप्राकट्यमथ च प्रभोः प्रभाविकं वर्णनमेकत्र मणिकाञ्चनसंयोगवल्लभते। धारेयं प्रार्थना स्रोतस्विनीति रूपेण परिणमिति असयास्तत्त्वद्वयं निश्चीयते-

(1) आत्मतत्त्वम् (2) परमात्मतत्त्वम् (प्रभुतत्त्वम् वा) भक्तानां गुणवल्लर्यः प्रभुतत्त्वेऽभिनिविष्टा भवन्ति। यदा यदा त्वसौ जीवः स्वदुर्गुणानभावान् कुत्सादिकांश्चाभिध्यायन् जीवो बुद्धेर्देवं प्रभुं प्रति हठधर्मितया विनीतस्वरेण गायति-

**यन्मे छिद्रं चक्षुषो हृदयस्य मनसोवाति तृण्णं बृहस्पतिर्मे तद्दधातु।**

**शन्नो भवतु भुवनस्य यस्पति यजुर्वेद 36/3**

नेत्र-हृदय-मनःप्रभृतीनां बाह्यान्तःकरणानां परिष्कारः कथं क्रियेत? भावनयानया संवलितोऽयं मन्त्रः स्वात्मप्राकट्यं प्रस्तौति। वेदाभिमते सुख-शान्ति, प्रीत्यभीष्टी च जीवसापेक्षे स्तः। कणादमतेन जीवस्य निःश्रेयसाभ्युदयौ लोकपरलोकौ च सिद्धिप्रदौ भवेताम्। कदा त्वयं वैदिकर्षिः सुखाय शान्तये च सार्वत्रिकं कामनां कर्तुमारभते-

**शन्नो देवीरभिष्टय आपो भवन्तु पीतये।**

**शं योरभिस्रवन्तु नः।। यजु. 36/2**

कदाऽपि स्वास्थ्यमायुर्बलमन्नञ्च प्राार्थ्यते, कदापि दुःखस्य लोभस्य च निवृत्तये व्यग्रो भवति; कदा तु वीर्याय कदाऽपि वर्चस्वितायै चायं ऋषिः कामयमानो भवति तथा यदा कदा वित्ताय पुष्ट्यै च तोषमनुभवति-

**अग्न आयूंषि पयस आ सुयोर्जविषं च नः।**

**आ रे वाधस्व दुच्छुनाम्।**

**अग्ने पयस्व स्वपा अस्मे वर्चः सुवीर्यम्।**

**दधद्रयिं मयि पोषम्।।**

कदाऽप्यसौ मुनिः विद्वेषाद् पलायितः सन् स्वस्ति तरणिमधिरुह्य भवाब्धिं तितीर्षति।

**स नः पप्रिः पारयति स्वस्ति नावा पुरुहूतः।**

**इन्द्रो विश्वा अतिद्विषः।। ऋग्वेद 8/16/11**

एवंविधा अन्येऽपि मन्त्रा लभ्यन्ते[3] कदा तु मेधायै निवेदयन् रोरवीति मुनिः।

**यां मेधां देवगणाः पितरश्चोपासते।**

**तया मामद्य मेधयाग्ने मेधाविनं कुरु।। यजु. 32/14**

**मेधामहं प्रथमा ब्रह्मण्वतीं ब्रह्मजूतां ऋषिष्टुताम्।**

**प्रपीतां ब्रह्मचारिभिः देवानां अवसे हुवे।। अथर्व. 5/10/8/1**

वैदिकर्षेस्तथाविधं प्रार्थनास्वरं यत्र कर्तुमकर्तुमन्यथाकर्तुमिति भावम् व्यक्तम् तद्विश्वाससंवलितमेवेति। यथा-

**त्वं महिंमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम्।**
**अरमयो नमसेजवर्णः सुतरणां अकृणोः इन्द्रसिन्धून्।।**

**ऋग्वेद 4/18/6**

ऋषिरसौ तपसा समाधिना दीक्षया चार्जितां पदवीं प्राप्तुं प्रार्थनया यतते। यथा-

**यत्र ब्रह्मविदो यान्ति दीक्ष्या तपसा सह।**
**ब्रह्म मा तत्र नयतु ब्रह्मा दधातु मे।। अथर्व. 19/43/8**

यत्र कुत्रापि सुखमयमजस्रम् ज्योतिष्मन्तममृतमक्षितं लोकं प्राप्तुमभ्यर्थना लभ्यते।[4] क्वचित्तु भक्तार्तिहारकमानन्दसंकुलमक्षरं लोकं प्राप्त्यै कृता प्रार्थनोपलभ्यते।[5] क्वचित्तु सर्वतो प्रभुसिन्धौ मत्स्यवदात्मानं कल्पितं वैदिकै ऋषिभिः।[6] एवमेव भक्तिभावनाः संवलिताः सन्ति मन्त्रा अनेकशः।[7]

मंत्रेष्वेतेषु स्वात्मनिवेदनेन सार्धं विरहपीडा, विनयः, गृहं प्रति जिगमिषा, भक्तदैन्यम् उत साधनाक्षमत्वम्, कुत्रापि तु विचारणा, व्याकुलत्वम् पश्चात्तापश्च प्राप्यन्ते। क्वचित्प्रभोरौदार्यम्, क्षमत्वम्, सौन्दर्यम्, शरणागत-वात्सल्यम्, आश्वासनम्, स्वकृतपापस्मरणम्। कुत्रचिदुद्बोधनम् समर्पणञ्च लभ्यते। भागवतधर्माचार्यैः प्रपत्तिरात्मात्मनिवेदनं यद्वा शरणागतिः षोढा निरुच्यते। मंत्रेषु स्थितिरेवमत्रोदाह्रियते-

1. अनुकूल्यस्य संकल्पः ऋ. 8/63/10 अथर्व. 9/2/11
2. प्रतिकूल्यस्य त्यागः ऋ. 4/18/2
3. गोप्तृत्ववरणम् ऋ. 1/57/1, 8/66/13
4. रक्षिष्यतीति विश्वासः ऋ. 6/45/3, 1/30/8, 2/41/10
5. आत्मनिक्षेपः ऋ. 10/21/4, 7/29/3
6. कार्पण्यम् ऋ. 2/33/7, 10/33/3

परवर्तिभिरपि शरणागतिरेवमेव स्वीकृता। तद्यथा-

**अनुकूल्यस्य संकल्पः प्रतिकूल्यस्य वर्जनम्।**
**रक्षिष्यतीति विश्वासो गोप्तृत्वरणं तथा।।**

**आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।**
**आसां मूलं तु वेदेषु दृश्यते।।**

षोढा शरणागतिस्तु लक्ष्मीतंत्रसंहितायामर्हिर्बुध्न्यसंहितायां[8] च वर्णिता, परन्तु केचनाचार्यास्त्वस्या सप्तधात्वं मन्यन्ते। यथा-दीनता, मानमर्षणम् (ऋ. 8/70/5, 1/145/2); मनोराज्यम् (ऋ. 7/8/1), भयदर्शनम् (अथर्व. 7/52/2, 4/19/6) भर्त्सना (ऋ. 10/82/7) आश्वासनम्, विचारणा (ऋ. 6/9/6, 7/89/5) च। परन्त्वत्र दीनतायाः परिगणनम् कार्पण्ये, आश्वासनस्य च ''रक्षिष्यति इति विश्वासः'' इत्यत्र संभवति। स्वकृतपापानि क्षमापयितुं स्मारं कृतं पश्चात्तापरव भवत्यत्र प्रायश्चित्तम्। नारदर्षिप्रोक्ता आसवत्तयोऽपि वेदे प्राप्ता उदाहृताः। ताश्चैकादशधा भवन्ति। यथा-''गुणमाहात्म्यासक्तिरूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-कान्तासक्ति-आत्मनिवेदना-सक्ति-तन्मयतासक्ति-परमविरहासक्ति-रूपाणि एकधा अप्येकादशधा भवति।''[9]

तत्र गुणमाहात्म्यासक्तिः (ऋ. 9/46/44) पूजासक्तिः (ऋ. 10/50/1) रूपासक्तिः (अथर्व. 10/7/32) स्मरणासक्तिः (ऋ. 8/44/19) दास्यासक्तिः (ऋ. 7/25/4, 7/86/7) सख्यासक्तिः (ऋ. 9/61/4, 8/61/11, 8/45/2, 8/45/3) कान्तासक्तिः (ऋ. 10/43/1, 1/62/11) प्रभृतिनामुदाहरणम् प्राप्यते। परमविरहभावम् (ऋ. 4/1/5, 8/44/23) तन्मयत्वभावम् (ऋ. 10/43/1, 8/2/17, 8/1/5) संप्राप्यतेऽत्र। यद्यप्येयं विधा एव सन्त्यन्या भावना अपि परवर्तिषु संप्रदायेषु नोल्लेखः। यथा-साधनम् (यजु. 17/72, ऋ. 1/50/10) आत्मनः ज्ञानम् (ऋ. 4/2/1, 1/84/10) जगतः ज्ञानम् (यजु. 32/11-12 अथर्ववेद 2/1/4-5, ऋग्वेद 8/92/3) शरीरस्य दमनम् (ऋग्वेद 8/44/15, 9/72/5, 9/83/1) कर्मज्ञानं प्रेम च (ऋ. 8/43/14, 6/7/4 यजु. 40/2) कर्महीनस्य निन्दा (ऋ. 10/22/8) जाग्रतकर्मकाण्डवेत्तृप्रशंसा (ऋ. 8/2/18) सच्चारित्र्यम् (यजु. 4/28 ऋग्वेद 10/50/1, 10/33/9) संकल्पनम् (अथर्व. 9/2/25) तपोदीक्षा च (अथर्व. 9/2/25) व्रतं श्रद्धाश्च यजु. 20/24) ब्रह्मचर्यम् (अथर्वं. 11/5/19) सत्यम् श्रद्धातपश्च (ऋ. 9/133/3) विवेकः (यजु. 19/77, ऋग्वेद 7/104/92, व्रतदीक्षा दक्षिणाश्रद्धा च (यजु. 19/30) दानम् (10/107/2, अथर्व. 3/24/5) अनृणभावना (अथर्व. 6/117/3) यज्ञभावना (यजु. 18/29, ऋ. 1/26/6) योगः (यजु. 11/1) सत्सङ्गः (ऋ. 5/51/15) मैत्री पूर्णोव्यवहारः (यजु. 36/18) निर्भयता (अथर्व.

19/15/6) समत्वम् (ऋ. 5/60/5) मुदितत्वम् (ऋ. 6/52/5) करुणा (ऋ. 10/117/5) पावितत्रा (ऋ. 10/18/2, यजु.12/12) परमात्मज्ञानम् (यजु. 31/18, ऋ. 1/64/39) मनसः बुद्धेश्च योगः (यजु. 11/4) ज्ञानकर्मयोगः (अथर्व. 17/1/27, यजु. 40/16) मूर्धाहृदययोर्योगः (अथर्व. 10/2/26) वास्तविकं ज्ञानम् तथा कर्मरहितो जीवः सहते संसृतिजं कष्टम् (ऋ. 1/164/32) कुशाग्रबुद्धिः विपुलानुभवयुक्तः पापशून्यो ज्ञानी जनोऽमृतमयं प्रभुं प्राप्नोति (ऋ. 10/63/4) सुकृतेन स्वर्गः यज्ञेन नाकः ज्ञानाग्निना द्युलोकश्च प्राप्यते (अथर्व. 10/2/26) परिरक्षणीयं ज्ञानं साधनैः (ऋ. 4/50/9) ज्ञानपूर्वकं त्यागः (ऋ. 5/19/2) प्रेमा भक्तिः (ऋग्वेद 4/25/2, 7/22/3, 1/67/27, 5/81/1, 1/18/7, 2/12/9, 1/53/11, 6/47/8) सिद्धिः (ऋ. 1/131/16, 8/6/10, 1/50/13, 19/52/3, 8/48/3 अथर्व. 6/124/1, ऋ. 10/43/2)।

ऋग्वेदे इन्द्रस्य सूक्तानि सार्द्धद्विशतमितानि अग्नेः द्विशतमितानि शतसंख्याकानि वरुणसोमपरकाणि सन्ति सूक्तानि। तथा चान्येषां विंशतिदेवानां कृते त्रीणि त्रीणि सूक्तानि। वरुणस्य महत्त्वपूर्णस्थानमस्ति सूक्तेषु तथा च सर्वतोऽधिका वरुणे भक्तिभावनाऽपि प्रवर्तितात्र। डॉ. मुग्धानलः बेनीप्रसादश्च ऋग्वेदे एव भक्तिसंप्रदायानां मूलं मन्येते।[10]

एतेन प्रतीयते यत्प्राचीनकालादेव भारते मनोषिणां त्रिविधं चिन्तनमासीत्। आधिदैविकाधिभौतिकाध्यात्मिकरूपेण जडभौतिकशक्तेर्नियन्त्रणाच्चेतनशक्तिं मन्यतेऽधिष्ठातृरूपेण। यज्ञमानवस्य शक्तिसीमानमतिक्रम्य कर्तव्यपरायणाः शक्तयो दैवीति कथ्यन्ते। आसामेव स्तुतिः प्रशंसा प्रभृतयो ऋग्वेदस्य वर्ण्या भवन्ति। आर्याणां संकल्पना प्रकृतिजान् दृश्यानि विलोक्य देवत्वेन परिणता। प्रकृतिप्रतिनिधिभूतान् देवान् संकल्प्य वैदिकर्षयः परिवर्तिनि संसारे व्याप्तां सत्तां पूर्वमेवान्विष्य परमात्मेति शब्देन अवोचन्। विविधा विवुधा अपि सर्वव्यापिनः परमात्मनः प्रतीकतया स्वीकृताः। संहितासाहित्यात्परं मन्त्रव्याख्यानात्मका ग्रन्था विनिर्मिताः। यत्र याज्ञिककर्मकाण्डस्य प्रसरः। मन्त्रसंबद्धतया वैदिका एव विषया अत्रोपवर्णितास्सन्ति। देवताया आत्मा एक एवेति यास्काचार्यः=महाभाग्यात् देवताया एक एव आत्मा बहुधा स्तूयते एकस्याऽत्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति।[11]

ऋग्वेदस्यैतरेयोपनिषदेव भक्ति-विषयिणीं सामग्रीमुपस्थापयति यथा-

1. ब्राह्मणग्रंथेषु येऽपि यज्ञसंबंधिनो वर्णनास्सन्ति ते तु परमाया एकस्याः सत्ताया एवाभासमुपस्थापयन्ति। इन्द्रोऽग्निश्चचन्द्रः वरुणश्च देवविशेषाः स्तस्यैव परमतत्त्वस्य स्वरूपभेदा एव।

2. 'ओ3म्' इत्येतस्य व्यापकं वर्णनम् परिपूर्णा व्याख्या, महत्त्वञ्चात्र प्राप्यते। अस्य जपनियमः यज्ञेषु मंत्राणामारंभेऽस्योच्चारणमपि विधिस्वीकृतः।[12] भक्तिधारायां जपविधेरत्यन्तं महत्त्वं विद्यते। भक्तस्तु 'तज्जपस्तदर्थ-भावनम्' इति धिया तन्मयत्वं लभते।

3. 'आहुतयो वै नाम एता यदाहुतय एताभिर्वै देवान् यजमानो ह्वयति तदाहुतीनामाहुतित्वम्'-इति वाक्येन प्रतीयते यत् आहुतिभिर्यजमानः दिव्यशक्तीनामाह्वानं करोति यद्वा भवति दिव्यताभ्य आकृष्टः। पदे पदे आहुतिप्रयोगः भवति यज्ञकर्मणि। एवमेव भक्तिपराधीनो भक्तोऽपि प्रभुप्राप्त्यै तद् ध्यानाग्नौ (विरहाग्नौ वा) स्वेच्छादीन् सर्वस्वमपि जुहोति एव।

4. हविग्राहकस्य ध्यानानुभूत्यग्नावेव हवनं भवति युक्तम्। यतः="यस्यै देवतायै हविर्गृहीतं स्यात् ताम् ध्यायेत्।"[13] जपस्यावश्यकत्वमपि वर्ण्यते यथा- 'होतृजपं जपति, उपांशु जपति।[14] अत्र भाष्यकारः सायणः स्पष्टयति-होतुः कर्तव्यो यो जपः तमनुतिष्ठेत्। ओष्ठस्पन्दनमेव परैर्दृश्यते न तु शब्दः श्रूयते, तादृशमुपांशुत्वं तस्य जपस्य शों सावोम्। इत्येतस्माम् आहावात् पूर्वभावित्वं विधत्ते।"

एवं चेद्वयं कथयामः यज्जप एव सा क्रिया यतो भगवतोऽभिव्यक्ति-रनिवार्यतया भवति तन्नातिशयोक्तिरिति। एवमेव गीतायामपि- 'यज्ञानां जप यज्ञोऽस्मि"[15] इति कृष्णेनार्जुनायोपदेशः। जपमहिमा कालान्तरे प्रकटितेत्थम्-

**जकारो जन्मविच्छेदः पकारो पापनाशकः।**
**तस्माज्जप इति प्राहुर्जन्मबन्धविमोक्षकः।।**

वेदोऽयं ज्ञानकाण्डस्य। तद्वद् ब्राह्मणमपि भक्तिभावनायास्तथ्यानि प्रस्तीति। स्वल्पामपि भक्तिविषयिणीं सामग्रीमुपस्कुर्वन् जप-प्रतिष्ठायामस्य ब्राह्मणस्य स्थानमद्वितीयमस्ति। भक्तिक्षेत्रे जपक्रियायाः प्रमुखं स्थानम्।

यजुर्वेदस्य ब्राह्मणेषु प्रतिष्ठिततमः शतपथब्राह्मणं, तत्रापि भक्तियुताः सङ्केता एवं निर्दिष्टाः-

1. ''मेध्या वा आपः। वज्रो वा आपः। योषा वा आपः। ज्योतिर्वै हिरण्यम् अमृतं हिरण्यम्।''[16] अत्र यास्केन भक्तिपदं व्याहृतम्। भक्त्या यथेश्वरस्य भगवतो वा नामानि संकल्प्य वंदितानि भवन्ति तथैवाऽत्र गुणावलीयम्। गुणकल्पनामूले भक्तित्वमेव कार्यकरमस्ति चेदियं शब्दभक्तिस्तदपि जपतो व्यापकभूतैव।

2. व्रतोपायनस्य पवित्रीकरणस्य चोपदेशं शतपथब्राह्मणस्य हविर्यज्ञकाण्डं प्रददाति। यज्ञेष्वनुष्ठानेषु च व्रतोपायनस्य पवित्रीकरणस्य च रहस्य-मूर्ध्वगमनं यद्वा दैवीशक्तेः सान्निध्यलाभः। एवमत्र भक्तिमार्गस्य दृढी-भवति पृष्ठभूमिः।[17]

3. 'देव्यायकर्मणे शून्धवम्'[18] इत्यस्यापि तात्पर्यम् यज्ञे भक्तौ वा घटितुं शक्यते। अनिष्टेभ्यस्त्राणमिष्टेभ्योऽभ्यर्थनञ्च सर्वत्र व्याप्तम्। अत्र तु स्वस्त्ययनजपस्यापि विधानं वर्ततेऽतो भक्तेरङ्गभूतं यज्ञमपि मन्यन्ते केचन् विद्वांसः।[19]

4. 'अथ यद् वीक्षितः अव्रत्थं वा व्याहरति क्रुध्यति वा तन्मिथ्या करोति व्रतं प्रमाणाति, अक्रोधो ह्येव दीक्षितस्य।[20]

दीक्षित-याज्ञिकस्यैताः क्रियाः सर्वा भक्तस्यापि भवन्ति। शतपथब्राह्म-णेऽस्मिन् आत्मनः विषयेऽपि सम्यक् वर्णनं लभ्यते।[21] गायत्र्या जपः[22] ॐकारस्य वर्णनम्[23], ब्रह्मणो मन्त्रजपः[24], मैत्रावरुणस्य मन्त्रजपः[25], प्रजापतेश्चापि[26] जपोऽत्र वर्णितः। इमे विषया भक्तिभावनाया रहस्यबोधकाः सन्ति। अनेन प्रतीयते यत् शतपथब्राह्मणं याज्ञिकं व्याख्यानमुपस्कुर्वन्नपि भक्तेरावश्यकीं सामग्रीमुपस्थापयति।

सामवेदस्य ब्राह्मणेषु भक्तेर्विकसिता परम्परा अवबुध्यते। आर्षेय-ब्राह्मणस्य प्रथमे प्रपाठके वर्णिताऽस्ति महिमा ओंकारस्य। साम एवास्ति भक्तिकाण्डस्य वेदः। अत्र संवर्ण्य ओंङ्कारमहिमानं तमेव वेदत्रयीति कथ्यते। भक्तिपरके आर्षेयब्राह्मणे ओंकारमेवोद्गीथ इति कथयित्वा वर्णितम् यत् ''अथ खलु थः उद्गीथः स प्रणवः स उद्गीथः इति असौ वा आदित्यः उद्गीथः एष प्रणवः ओ3म् इति ह्येष स्वरन्नेति।''[27]

उल-उत्थानम प्राणाः वा-स्वर्गः-आदित्यः-सामः

गीः-वाणी-- -- अंतरिक्षम्-वायुः-यजुष

थ-अन्नम् स्थितिवत्-भूलोकः-अग्निः-ॠक्

सामवेदस्य प्रायशः सर्वे मन्त्रा उपासनासंबंधिनो वर्तन्ते। कतिपयास्तु सृष्टिविषयका अपि सन्ति। 'साम' इत्यर्थः=

सा-पृथ्वी यद्वाऽन्तरिक्षं द्युलोकं वा-नक्षत्रमण्डलम्

अम्-अग्निर्वायुर्वा यद्वा सूर्यः-चन्द्रमा

साम गीतिः। सामवेदस्य सर्वेपि मन्त्राः सुगेयाः। वेदस्यास्य 'हु' 'हौआ' 'हि' प्रभृत्युच्चारणानामपि रहस्यमत्र प्राप्यते। सस्वरं सानुरागं वा मंत्रान् गायन्तः गानक्रियाया अनुरागपूर्णानन्दे देहज्ञानमपि विस्मृत्य या तन्मयतायाः स्थितिर्भवति सैव स्वप्रभोर्भजनान्दे लीनस्य विदेहभक्तस्याऽवस्था। यथा भागवते-

**एवं व्रतः स्वप्रियनाम कीर्त्या जतानुरागो द्रुताचिन्तउच्चैः।**

**हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकवाह्यः।।**[28]

अत्र सामगायकस्य भक्तस्य च स्थितिसाम्यम् दृश्यते। गायत्री वेदानां सारभूता। तस्या गानमात्मारक्षकमिति। यथा-'सा हैषा गयांस्तत्रे। प्राणा वै गयांस्तत्र प्राणांस्तत्रैतद् गयांस्तत्रैततस्माद् गायत्री नाम।[29]

''गायत्री गायते स्तुति कर्मणः।''[30]

''गायत्री या इदं सर्वभूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदं सर्वभूतं गायति वा गायते।[31]

गानक्रियायां चित्तस्य सान्द्रीकरणमेकाग्रता च सहैव भवति तथा च गेयपदानां वैखरीवाण्यां जपोऽपि। हृन्मनसोर्वाण्या च सम्मिलनमपि भवति तत्र कार्यस्य यद्वा वाद्ययन्त्रस्य स्वराणामुपयुक्तसामञ्जस्यमपि भवति। मनसा गाता, वाण्या गेयम् कर्मणा ध्येयम् तस्य शब्दब्रह्मणः क्रोडेऽधिष्ठितस्य भावमूर्तैरीश्वरस्य भजनमेव भवति।

भक्तेरिदं स्वरूपम् 'सा त्वस्मिन् परमप्रेमरूपा' यद्वा 'सा परानुरक्तिरीश्वरे सूत्राभ्यां परिभाषिता।

अथर्ववेदस्य प्रणयनञ्चा परत एव। एतस्य ब्राह्मणग्रन्था अपि परवर्तिनः। तत्र गायत्रीजपः[32], ओङ्कारमहिमा[33] स्तोत्रपाठः[34] आत्मिकः[35], यज्ञ इत्यादयो विषया

वर्तन्ते। एते गोपथब्राह्मणस्य त एव विषया येषु भक्तेरुपासनाया वा सम्यग्वर्णनं लभ्यते।

मुग्धानलाभिमतेन ब्राह्मणारण्यकयोः कालः ख्रीष्टाब्दात्पूर्वं (800 तः 500 वर्षपर्यन्तम्) स्वीकृतः। आरण्यकग्रन्थेषु न केवलं कर्मकाण्डज्ञानं प्राप्यते तत्र तु एकान्तिकी उपासनापद्धतिरपि प्राप्यते। ब्राह्मणग्रन्थानां विषया एवं ज्ञेयाः-

* विधिभागः-यज्ञसंबन्धिन प्रयोगिका नियमाः

** अर्थभागः-कथोपाख्यानप्रयोगाः सूक्ष्मरहस्यञ्च।

*** उपनिषद्भागः-आध्यात्मिकदार्शनिका विषया।

वैदिककर्मकाण्डस्य जटिला परम्परा सामान्यमानवानां कृते नासीत् सुगमा। कर्मकाण्डप्रक्रियासु व्यस्तम् मनः मानवान् दैवशक्तीनां निश्चितोपलब्धये धारणानिष्ठो भवति। तदासौ व्यापकस्य सत्यब्रह्मणोऽतिरिक्तः सर्वमसदचिदानन्द-रहितञ्च मन्यते। तथा च सर्वविधं स्वीकार्यं ध्येयं गेयं प्रेयः स्मरणीयञ्च तत्त्वमेव सच्चिदानन्दमिति स्वीकरोति। तस्य परमात्मनोऽखण्डज्ञानालोके समुपविश्य प्रदत्तानि व्याख्यानान्येवोपनिषद् पदवाच्यानि संजातानि। तत्रोपनिषद्विद्यायां ज्ञानस्य प्रधानता वरीवर्तते। अत्रापि भक्तितत्त्वानि प्राप्यन्ते। यथा-

1- यथा भक्तिक्षेत्रे भगवतो स्थानन्तथात्र आत्मनः श्रेष्ठता स्थितिश्च।[36]

2- आत्मा वै रस इति अस्यानन्दरूपत्वं वर्ण्यते।[37] अनेन सूच्यते माधुर्योपासनायां प्रभावः।

3- उपासकस्य भावनानुसारेणोपास्यस्य स्वरूपवर्णने भक्तिमार्गस्य भगवतो विग्रहावबोधः भवति।[38]

4- भक्तिसंप्राप्त्यै श्रद्धाविश्वासौ सहायकौ वर्तेते। आत्मप्राप्त्यै श्रद्धाया महत्त्वमुपनिषत्साहित्येऽपि बहुशः वर्ण्यते।[39]

5- गुरोः स्थानं भक्तिमार्गेऽपि उपनिषत्सु यथैव समाहृतो विद्यते।[40]

6- शिष्यस्य लक्षणानि गुणाश्चात्रापि प्राप्यन्ते।[41]

7- भक्तेरङ्गानि स्वाध्याय-तपस्त्यागादीनि च वर्णितानि सन्ति।

8- ओङ्काररूपः जपः वर्ण्यते। अस्य महिमा छान्दोग्य-तैत्तिरीयेश-केन-कठ-प्रश्न-मुण्डकोपनिषत्सु लभ्यते। अनेन नाममहिमात्र स्फुटीभूत इति सूच्यते।

वैदिकभक्तेरुपासनाया वा प्रसङ्गे नामजपस्य महिमा त्वासीत्परं तद्रहस्यं ''एकं सद् विप्रा बहुधा वदन्ति''[42] इति रूपेण तत्र लक्ष्यते। नाम्नः द्वौ भेदौ-वर्णात्मक-ध्वन्यात्मकाविति आस्ताम्। यदा योगिनां प्राणाः सुषुम्नायां प्रविश्य मूलाधारतो ऊर्ध्वं यान्ति तदा नादानुभूतिरिति। अयमेव ध्वन्यात्मकोऽनुभवः। नादमनुसृत्य संभूतसकारात्मको ध्वनिरेव प्रह्वीभावं शब्दत्वं चोपस्थापयति। अनेन नामानुभूतिर्भवति। ॐ कारस्यानुभूतिवर्णात्मिका नैव चानुच्चार्या। एतत्तु परमानन्दस्य चिच्छायामात्रम्। तन्नादोऽनुभवगम्योऽवर्णनीयश्च।[43]

यतः-सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो, ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।
यद्वा-प्रणवो धनुः शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।। (मुण्डक)
नादस्य सूक्ष्मरूपमप्यत्र लक्ष्यते-
चत्वारि वाक् पारिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणिनिहितानेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।[44]
सहस्राक्षरावाक् वर्णने शब्दाभिधेयार्थमभिव्यनक्ति श्लोकोऽयम्--
शब्दस्य हि ब्रह्मण एव पन्था यन्नामभिर्ध्यायति धीरपार्थैः।
परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः।।[45]

केचित् 'यावद्ब्रह्म विषितं तावतीवाक्',[46] इति स्वीकुर्वन्तो मायाशबलितं ब्रह्म वेदश्चार्थद्वयं मन्यन्ते। वाच्यवाचकयोरभेदतया ईश्वरः परावाक् चाभिन्नौ स्वीकृतौ। प्रणव एव सर्वमिति-

**ऋचो अक्षरे परमे व्योमेन् यस्मिन् देवा अधि विश्वे निषेदुः।**
**यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।।**[47]

स्फोटोऽस्ति नादमूलकः। तत एव जगतः समुत्पत्तिरिति। अकारतोहकार-पर्यन्तं प्राप्या वर्णाः स्फोटस्यासंख्यान् गुणान् ख्यापयन्ति। एवं ध्वन्यात्मकता वर्णात्मकं नाम न्यूनमिति। वैदिक-मंत्राणां परिशीलनादीश्वरस्य नामजपस्य स्थितिः सुस्पष्टा भवति।[48]

समग्रे वैदिके साहित्ये 'भक्ति' पदस्योल्लेखः श्वेताश्वतरोपनिषदि 'यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ।' इति श्लोके प्राप्यते परन्तु भक्तिविषयिणी

सामग्री सर्वत्र वितताास्ति। मंत्रसाहित्ये भक्तिसाधनायाः प्राणभूता श्रद्धा (प्रार्थना) प्राचुर्येण प्राप्यते। मंत्राणां रहस्योद्घाटनधिया विदुषां व्यक्तिरजायत ब्राह्मण-ग्रन्थमयी यत्र यज्ञप्राधान्येऽपि भक्तिसाहित्यं नास्ति। आरण्यकग्रन्थेष्वपि बहिर्यागा-पेक्षयाऽन्तर्यागस्य श्रेष्ठता प्रतिपाद्यते। उपनिषत्-साहित्यमपि सर्वशक्तिसंपन्नाम-ज्ञातां सत्तां जिज्ञास्यमानं गवेषणात्मकतथ्यं प्रस्तौति। अत्र गुरु शिष्यपरम्परा-विर्भूता।

एतेनेत्थं प्रतीयते यत् यज्ञीयानुभूतिः मांत्रिकं रहस्यञ्च संस्कारजां धारणां शक्तिमतः निर्मातुमलंचकार। तस्य न केवलमभिधानमपितु गुणाः कर्माणि च निर्मितानि सदैव निवासनाय स्थानमपि कल्पितमभूत। तं रंजयितुं नालमासीत् याज्ञिकी कर्मबहुलता अपितु श्रद्धानिविडतालमभूत्। अयं धर्मः 'भागवतधर्म इति' व्यपदेशभाक् जातः। विष्णुगायत्रीमेव भागवतधर्मस्य मूलरूपमिति सर्वैः स्वीक्रियते। सा तु आरण्यकग्रन्थे प्राप्यते-

**ऊँ नारायणाय विद्महे वासुदेवाय धीमहि।**
**तन्नो विष्णुः प्रचोदयात्[49] ।।**

**संदर्भ :**


1. *ऋग्वेदः 2/13/5।*
2. *ऋग्वेदः 1/165/9।*
3. *ऋग्वेदः 10/177/1, 6/45/6, 6/47/13*
   *अथर्ववेदः, 18/14/1, 19/15/6*
4. *ऋग्वेदः 9/113/7-11*
5. *" 6/47/8*
6. *" 7/89/5*
7. *ऋग्वेद 7/86/6, 7/88/6, 8/45/20, 10/73/11, 1/76/102, 1/25/19, 2/27/11*
8. *अहिर्बुध्न्य-संहिता 37/122/9, 28, 29*
9. *नारद-भक्तिसूत्रौ पञ्चमेऽध्याये*
10. *संस्कृत साहित्य का इतिहास- ए.ए. मैक्डालन अनु. चारुचन्द्रशास्त्री पूर्वार्द्ध वैदिक भाग हिन्दुस्तान की पुरानी सभ्यता- डॉ. बेनी प्रसाद, पृष्ठ 42।*

11. निरुक्तम् 7/4/8

12. एतरेय ब्राह्मण-पञ्चविंशतमेऽध्याये सप्तमखण्डे

13. एतरेयब्राह्मणम् 11/8

14. ए.ब्रा. 10/6

15. श्रीमद्भगवत्गीता 10/25

16. निरुक्तयास्क 7/7/24

17. शतपथब्राह्मण 3/2

18. शतपथब्राह्मण 1.13

19. डॉ. शर्मा, मुशीरामः भक्ति का विकास, पृष्ठ 205

20. शतपथब्राह्मण, 3.2.1.24

21. शतपथब्राह्मण, 4.2.1.2

22. ''  '' 4.2.3.21

23. ''  '' 4.2.6.12

24. ''  '' 4.5.8.6

25. ''  '' 4.5.8.8

26. ''  '' 4.8.2.6

27. आर्षेय ब्राह्मण 1.5.9

28. श्रीमद्भागवत-महापुराण 11.2.40

29. शतपथब्राह्मण 14.8

30. निरुक्तम् 7.5.3

31. छान्दोग्योपनिषद् 3,12.1

32. गायत्री वेदजननी गायत्री ब्राह्मणप्रसूः ।
गातारं त्रायते यस्मात् गायत्री तेन गीयते । । स्कन्दपुराण खण्ड 30.53
गायत्री वेदजननी गायत्री लोकपावनी ।
गायत्र्या न परं जाप्यं एतद्विज्ञाय मुच्यते । । पद्मपुराण खण्ड 53.5
दुर्लभा सर्वमंत्रेषु गायत्री प्रणवान्विता ।
गायत्र्या नाधिकं किंचित् त्रय्यां च परिणीयते । । स्कन्द. काशीखण्ड 9.1
गायन्ते त्रायते यस्मात् गायत्रींति स्मृता बुधैः । । भारद्वाजस्मृतिः

33. *गोपथब्राह्मण 1.22,33*

34. *''        '' 3.12*

35. *प्रपाठक 5.8.5.12,14*

36. *बृहदारण्यकोपनिषद् 3.32, कठोपनिषद् 2.3.4, 1.3.15, 2.23, 2.20 श्वेतश्वतरोपनिषद् 3.20, मुण्डकोपनिषद् 3.2.3*

37. *तैतिरीयोपनिषद् 7.2.9.2*

38. *छान्दोग्योपनिषद् 7.25.2 बृहदाकरण्यकोपनिषद् 3.5*

39. *कठोपनिषद् 2.3.12, 1.2.9, मुण्डकोपनिषद् 1.2.11, छान्दोग्योपनिषद् 1.1.10*

40. *कठोनिषद् 1.2.7.10*

41. *मुण्डकोपनिषद् 1.2.12.13, छान्दोग्योपनिषद् 6.14*

42. *ऋग्वेद 1.164.46*

43. *कल्याणवर्ष 39, पृष्ठ 30 पर सम्पूर्णानन्द का लेख*

44. *ऋ. 1.164.15*

45. *श्रीमद्भागवत 2.2.2*

46. *ऋ. 19.115.8*

47. *ऋग्वेद 1.164.39*

48. *कल्याण-39 तयोऽङ्क पृष्ठ 60-61, 87-187 पृष्ठे प्रकाशिता लेखाः*

49. *तैत्तिरीय आरण्यकस्य दशमे प्रपाठके*

# 5

# वैदिकवाङ्मये मन्त्रचिकित्सा

*सञ्जयकुमारः*

वैदिकवाङ्मये संहिता-ब्राह्मण-आरण्यक-उपनिषद्-सूत्रादीनां समवायो भवति। परं सामान्यतः सर्वे संहिताभागविषयमेव सरलसुबोधरीत्या प्रतिपादयन्ति अतः सर्वे वेदशब्देनैवावधीयन्ते। वेदशब्दं विचारयन् ऋग्वेदप्रातिशाख्ये अभिहितम् - 'विद्यते ज्ञायते लभ्यते यैः धर्मादिपुरुषार्थ इति ते वेदाः' अर्थात् ये धर्मादिपुरुषार्थज्ञापकाः सन्ति ते वेदा उच्यन्ते । सायणाचार्यः वेदशब्दमधिकृत्य वदति- 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' अर्थात् यः ग्रन्थः अभीष्टवस्तुनः प्राप्तये, अनिष्टवस्तुनश्च नाशाय अलौकिकंम् उपायं बोधयति स एव वेदः। एवं च दीर्घजीवनेन पुरुषार्थचतुष्टयसिद्धिः, दीर्घजीवनाय च अलौकिकम् उपायम्, उभयमेव वेदद्वारा ज्ञायते। कविकालिदासोऽपि 'कुमारसम्भवे' महाकाव्ये 'शरीरमाद्यं खलु धर्मसाधनम्'[1] अर्थात् शरीर एव सर्वधर्माचरणानां साधनमिति वक्ति। यदा मनुष्यः स्वस्थो भवति तदैव सः पुरुषार्थसाधनानि सम्पादयति। स्वस्थशरीराय च वेदः अलौकिकमुपायं वेदयति। लौकिकोपायरूपे जलचिकित्सा, शल्यचिकित्सा, मृदाचिकित्सा, वनस्पतिचिकित्सादीनामुल्लेखः क्रियते अलौकिकोपायरूपे मन्त्रचिकित्साया उल्लेखः दृश्यते। मन्त्रचिकित्साया अभिप्रायोऽस्ति यन्मन्त्रद्वारा कस्यापि रोगस्योपचारः। एषा चिकित्सा वैदिकायुर्वेदस्य सा चिकित्सापद्धतिरस्ति यया विविधरोगाणां विशेषरूपेण कष्टसाध्यरोगाणां आगन्तुकरोगाणां च चिकित्सा क्रियते, आचार्यचरकोऽपि एतत्समर्थयति। आचार्यचरकः प्रथमगणसहितभगवदुद्रस्य आराधनया (रुद्राष्टाध्यायीपाठेन) विष्णुसहस्रनामभिः मूर्द्धानमित्यादिमन्त्रद्वारा च वेदमन्त्राणां जापादिभिः, होमादिभिश्च विविधानां कठिनानां रोगाणां सद्यःमुक्तेरुल्लेखं करोति। केषुचित्स्थलेषु पापजन्यव्याधिनाशार्थं तत्रोच्यते-

**त्रिति देवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु ममृजे।**
**ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु।।'**[2]

अर्थात् देवताभिः पापानि त्रिते स्थापितानि । ततः त्रितेन तन्मनुष्येषु स्थापितम्। हे रोगिन्! यदि तत्पापकारणेन त्वं ग्राहिनामकपापरोगं प्राप्नोः तर्हि तत्पापं देवताः मन्त्रद्वारा नाशयेयुः।

मन्त्र इति शब्दः अतिव्यापकः, शब्दोऽयं मन्त्रणया, विचारेण, परामर्शेन सह प्रार्थनापरकवेदमन्त्रार्थानामपि प्रतिनिधित्वं करोति। वैदिकपरम्परायां मन्यते यत् ऋषिभिः ध्यानावस्थायां मन्त्राणां दर्शनं कृतम्। मन्त्रशब्दस्य कृते 'ऋक्' शब्दस्यापि प्रयोगः दृश्यते। एता ऋचः स्तुतिपरकाः सन्ति। एतच्चिन्तनमननेन मनुष्यस्य सर्वाधिकं कल्याणं भवति। मन्त्राणां प्रयोगः दुःखनाशाय भवति। मन्त्रचिकित्सायाः महत्त्वं वैदिकवाङ्मये पौराणिकवाङ्मये च उभयत्र आसीत्। मन्त्रेषु कापि अद्भुता शक्तिर्भवति या मनुष्येषु ऊर्जायाः संचारं करोति। तासामूर्जानां सकारात्मकसंचारः मनुष्यस्य शरीरमानसाभ्यां प्रभावुकं भवति परिणामतः शरीराभ्यन्तरे तत्तत्त्वस्य स्वतः निर्माणं भवति येन व्याधिनाशः जायते। शरीराभ्यन्तरे अनेकाः क्रियाः भवन्ति। मन्त्रप्रभावेण तासु क्रियासु रोगप्रतिरोधकक्षमतायाः विकासो भवति। मन्त्रः एकः ध्वनितरंगः विद्यते। तरंगश्च किरणरूपेण भवति यः शरीरे प्रविशति तत्प्रवेशनेन व्याधीनां नाशो भवति। वर्तमानसमयेऽपि अनेके व्याधयः किरणमाध्यमेन शम्यन्ते। अतः ध्वनितरंगोऽपि चिकित्सायां सहायको भवति यद्विषये डॉ. कपिलदेप द्विवेदिनोक्तम्- मन्त्रैः ये व्याधयः उत्पद्यन्ते ते तरंगरूपेण ऊर्ध्वगतिमन्तो भवन्ति अपि च सूर्यस्य सूक्ष्मशक्तिमात्मसात्कृत्य साधकशरीरे प्रविशन्ति एतासां शक्तीनां प्रभावेण शरीरस्य रोगाः व्यपगच्छन्ति। संगीतेऽपि एषा एव शक्तिर्भवति। आधुनिकवैज्ञानिका संगीतसाहाय्येन मनुष्याणां पशूनां च अनेकान् रोगान् दूरीकृतवन्तः'[3]। एतादृशानां महनीयमन्त्राणामुच्चारणं ध्वनितरंगेषु आधृताः सन्ति। मन्त्रपाठकरणसमये अनेके तरंगाः मस्तिष्कं प्रभावयन्ति। भाषावैज्ञानिकैर्मन्यते यद्यदा मनुष्यः स्वमुखात् किंचिद्वदति तदा मुखेन वदनकाले ध्वनेः (175) एकशतोत्तरपंचसप्तति-प्रकारस्य स्पन्दनं कम्पनम्भवति यदा च कोकिला कूजति तदा तस्याः ध्वनेः स्पन्दनं कम्पनं (500) पंचशतप्रकारस्य भवति। एभिः स्पन्दनैः कम्पनैश्च एका ऊर्जा जायते। एषैव

ऊर्जा व्यक्तेः व्याधेः समूलनाशं करोति। भाषावैज्ञानिकानुसारं इयं स्वरतन्त्री कथ्यते। स्वरतन्त्री एव ध्वन्युत्पादनस्य प्रमुखोऽवयवो भवति। एषैव फुफ्फुसेषु आयातनिर्यातनिःश्वासस्वरयन्त्रमध्यादेव आयाति निर्याति वा। एषा श्वासनलिकायाः 'ट्रेकिया' इत्यस्योपरिभागे कार्टिलेज इति मांसपेशिना निर्मिता अपि च झिल्लिकाभिः निर्मिता मिश्रिता रचनास्ति। सर्वेषां वयस्कवृद्धदुर्बलपुरुषाणां कण्ठे बहिर्भूतभाग एव स्वरयन्त्रमस्ति, नाम्ना एव ज्ञायते यत् स्वरस्य यन्मुख्यं यन्त्रं तदेव स्वरयन्त्रं विद्यते। स्वचालितयन्त्र इव तीव्रगत्या एतन्यन्त्रं कार्यं करोति। एषा स्वरयन्त्री एकस्मिन्निमेषे एव अष्टशतधा (800) निर्मेषोन्मेषा भवति। वैज्ञानिकाः यन्त्राणां साहाय्येन स्वरयन्त्र्याः गणनां कुर्वन्ति। अस्य कम्पनं प्रतिनिमेषं न्यूनातिन्यूनं 42 द्विचत्वारिंशच्चक्रं अधिकाधिकं च 2048 द्विशतोत्तर-अष्टचत्वारिंशच्चक्रं प्रतिनिमेषं भवितुं शक्यते। सामान्यतः पुरुषाणां संभाषणकाले कम्पनगतिः 109 नवोत्तरैकशतात् 163 त्रिषष्ट्युत्तरैकशतं चक्रं भवति। स्त्रीषु च सा गतिः 216 द्विशतोत्तर-षोडशप्रतिनिमेषात् 324 चतुर्विंशत्युत्तर-त्रिशतचक्रं भवति'[4]। अतः पुरुषाणां तुलनया स्त्रीणां ध्वनिः कोमला भवति। अहमिह स्वरतन्त्रिविषये विस्तेरेणातः चर्चयामि यतोहि उच्चारणे तस्याः महत्त्वपूर्णा भूमिका भवति तयैव चानेकाः क्रियाः भवन्ति। एता एव क्रिया रोगोपचारे सहायिकाः मन्यन्ते यासामुल्लेखं वैदिकवाङ्मयं करोति। शब्दानां राशिरेव मन्त्र इत्युच्यते। शब्दश्च ज्योतिस्वरूपः विद्यते, शब्द एव च वृक्षः इत्यादिकथनमस्माकं शास्त्रेषु विद्यते। आचार्यः पतञ्जलिः कथयति - एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके कामधुग्भवति'[5]। अर्थात् एकोऽपि शब्दः सम्यक् रीत्या ज्ञायते , तथा सुप्रयुज्यते तर्हि सः अस्मिन् लोके, स्वर्गे लोके च कामधेनुरिव सर्वान् कामान् पूरयतीति। कथनाभिप्राय एषः यत् यदि कश्चन व्यक्तिः केनापि सह प्रेमपूर्णं व्यवहरति, मधुरवार्तालापं करोति तर्हि उभावेव प्रसन्नौ भवतः यदि च कश्चनापशब्दं प्रयुङ्क्ते तर्हि स्वतः क्रोधमयं वातावरणं सम्पद्यते। तत्र शारीरिकप्रयोगाभावेऽपि अपशब्दकारणात् प्रतिक्रियारूपेण अन्योऽपि अपशब्दप्रयोगं कर्तुमुद्यते। एषा प्रतिक्रिया शब्दशक्तिप्रभावेण संघटते। अत एव मन्त्रः शब्दराशिः, अत्र एका अपूर्वा शक्तिर्भवति अनेनैव रूपेण मन्त्र द्वारा रोगनिदानोपायसंकेतः प्राप्यते। अथर्ववेदस्य मन्त्रचिकित्साक्षेत्रे अत्यधिकम्महत्त्वं भवति। अत्र ऋषिः मन्त्रद्वारा अनेकव्याधीनां

निदानं कर्तुं प्रयतते। अथर्ववेदस्य प्रथमकाण्डस्यैकादशसूक्ते नारीसुखप्रसूतये नैकाः देवताः स्तूयन्ते। एते स्तुत्यात्मकमन्त्राः अनेकान् रोगान् नाशयन्ति। एभिः मन्त्रैः सम्बन्धितदेवता दुःखिनं सुखयति। सुखपूर्वकप्रसूतिकरविषयकदेवतां निवेदयति एषा ऋक्-

**वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः।**
**सिस्रतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ।।'**[6]

अर्थात् हे अखिलविश्वपोषक! श्रेष्ठजनहितैषिन्! पूषन्! देवते! वयं स्वहविषा विधेम। भवान् प्रसूतामिमां रक्षतु तस्याः साहाय्यं विदधातु। एषा सावधानतया अंगानि सज्जितानि कुर्यात्, प्रसवाय शिथिलानि कुर्यात् । तदर्थं हविरूपे तिलतण्डुलादीनां अग्नौ आहुतिर्दीयते। सुखप्रसूतिसम्बन्धे उच्यते -

**चतस्रो दिवः प्रादिशश्चतस्रो भूम्या उत।**
**देवा गर्भं समैरयन्तां व्यूर्णुवन्तु सूतवे।।**[7]

अर्थात् द्युलोकः भूमिश्च च चतसृभिः दिग्भिः आवृतास्ति पंचभूतैश्च गर्भ आध्रियते ताः आवरणात् विमोचयन्तु, येन सुखपूर्वकं प्रसवः स्यात्। क्रमशस्तत्र गर्भसम्बन्धे निवेदनमस्ति-

**सूषा व्यूर्णोतु वि योनिं हापयामसि।**
**श्रथया सूषणे त्वमव त्वं बिष्कले सृज।।**[8]

अर्थात् हे प्रसवसहायक देव! भवान् गर्भान्मोचयतु। गर्भमार्गं प्रसरामः, अंगानि शिथिलयामः, भवान् गर्भमधः प्रेरयतु। एवं च वैदिकवाङ्मयं मनुष्यकल्याणाय सदैवाभिधानं करोति। यजुर्वेदे अग्निदेवतां प्रार्थयन्नुच्यते- हे अग्निदेव! भवान् स्वभावत एव होतॄणां शरीररक्षकाः सन्ति। अत एव अस्माकं शरीरस्य पालनं करोतु। हे अग्निदेव! भवान् आयुःप्रदाता अस्ति अस्मभ्यमायुषं प्रददातु। भवान् वैदिकानुष्ठानेन प्राप्ततेजःप्रदायकोऽस्ति, अतोऽस्मभ्यं वर्चः प्रददातु। हे अग्निदेव! अस्माकं कायांगानामपूर्णतां व्यपनीय सर्वांगसम्पन्नानस्मान् विदधातु'[9]। अजः शतवर्षं यावत् अग्निप्रज्वलनकामना अग्निदेवतांयाः क्रियते-

**इन्धानास्त्वा शतं हिमा द्युमन्तं समिधीमहि।**
**वयस्वन्तो वयस्कृतं सहस्वन्तः सहस्कृतम्।।**
**अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्।**
**चित्रवसो स्वस्ति ते पारमशीय।।'**[10]

अर्थात् दीप्तिमत्! धनसम्पन्न! अहिंसक! न केनापि बलाद्विरम्यमाण अग्निदेव! भवत्कृपया आयुष्मन्तः अदम्यमाणाः वयं यजमानाः भवन्तं प्रदीप्य वर्षशतं जाज्वल्यमानं स्थापयिष्यामः। हे रात्रि देवि! वयं याजकगणाः कल्याणप्राप्तये भवत्समीपं भवेम। यतोहि ईशावास्योपनिषदि जिजीविषेच्छतं समाः मनुष्याः इति प्रार्थनास्ति।'[11]

अथर्ववेदस्य मूत्रमोचनसूक्ते पर्जन्य-वायु-वरुण-चन्द्र-सूर्यादिदेवताभ्यः मूत्रमोचनाय प्रार्थना विद्यते। सूर्यस्तुतिविषये अथर्ववेदे उक्तम् -

**विद्मा शरस्य पितरं पर्जन्यं शतवृष्ण्यम्।**
**तेना ते तन्वे शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।।**[12]

अर्थात् वयं जानीमः यत् विशेषशक्तिसम्पन्नः पवित्रतादायकः सूर्यः शरस्य पालकोऽस्ति। ते तव कल्याणं कुर्वन्तु। तेभ्यस्तुभ्यं पोषणं प्राप्नुयात्। विकाराश्च अपसरेयुः। अथर्ववेदे मन्त्रचिकित्सारूपे ज्वरनाशसूक्तस्यापि उल्लेखः प्राप्नोत्येव। यत्र देवतानां स्तुत्या ज्वरनाशस्य मार्गः प्रशस्यते, यथा -

**यदग्निरापो अदहत् प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि।**
**तत्र त आहुः परमं जनित्रंस स नः सविद्वान् परिवृङ्ग्धि तक्मन्।।'**[13]

अर्थात् यत्र धर्माचारिणः सदाचारिणः नमस्यन्ति यत्र चाग्निदेवः प्राणधायकान् जलतत्त्वान् दहन्ति तत्रैव भवतः(ज्वरस्य) वास्तविकं स्थानं विद्यते इति भवद्विषये उच्यते। हे कष्टदायक ज्वर! एतज्ज्ञात्वा भवान् अस्मान् रोगान्मोचयतु। अग्निदेवतायाः स्तुतिरूपे ज्वरनाशनमन्त्रोऽपि तत्रैवोल्लिखितोऽस्ति-

**यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम्।**
**हूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन्।।**[14]

अर्थात् हे जीवनं कष्टयत् ज्वर! यदि भवान् दाहकतागुणेन सम्पन्नोऽस्ति तथा शरीरसन्तापकोऽस्ति, यदि भवतः जन्म इन्धनं कामयमानात् अग्निदेवाज्जातमस्ति तर्हि भवान् हुडूनामाभिधः विद्यते। हे पीतवर्णोत्पादक ज्वर! भवान् निजकारणेन अग्निदेवं जानतः अस्मान् मोचयतु। यजुर्वेदस्य च अनेकैः मन्त्रैः दीर्घजीवनविषये उत्तमस्वास्थ्यविषये चर्चास्ति -

**भेषजमसि भेषजं गवेश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै।।**[15]

अर्थात् हे रुद्रदेव! भवान् कष्टनिवारकमौषधमिव सकलामापदां दूरयसि।

अत एव अस्माकं पशुभ्यः पुरुषेभ्यश्च सर्वव्याधिचिकित्सिकामौषधीं प्रददातु। अस्माकं सर्वान् पशून् पोषयतु। प्रसिद्धस्य रुद्रदेवस्यापि अत्राह्वानमस्ति। यः महामृत्युंजयमन्त्रेण परिचीयते। प्राणरक्षायै दीर्घजीवनाय च मन्त्रमिमं आभीक्ष्ण्येन उच्चार्यते।-

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
**उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।।**
**त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्।**
**उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः।।**[16]

अर्थात् आधिभौतिक-आधिदैविक-आध्यात्मिक इति त्रयन्वितस्य रुद्रस्य उपासनां वयं विदधीमहि। यः देवः जीवने सुगन्धिं, पुष्टिं (समर्थतां) अथवा संरक्षकास्तित्त्वबोधं प्रत्यक्षयति। यथा पक्वं फलं स्वत एव शाखान्मुच्यते तथैव वयं मृत्युभवात् मुक्ताः स्याम न च अमृतभवात्। अथर्ववेदस्य पंचमकाण्डस्य त्रयोदशसूक्तस्य नाम सर्पविषनाशनसूक्तमस्ति तत्र मन्त्र द्वारा सर्पविषस्य नाशहेतवे अनेके मन्त्राः दिग्दर्शितास्सन्ति-

**यत् ते अपोदकं विषं तत् त एतास्वग्रभम्।**
**गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते।।**[17]

अर्थात् भवज्जलशोषकविषः अस्माभिः नाडीष्वन्त एव जिगृहीतः। भवद्विषनाशाय वयं सर्वथा प्रयतामहे। अत्र स्पष्टतयाभिहितम् यत् सर्पविषः शरीररक्ते मिश्रितजलं दग्धयति परिणामतः रक्तघानिष्ठ्यम्भवति तच्च हृदयघाताय भवति। अतः अथर्ववेदे सर्पदंशमन्त्रचिकित्सासम्बन्धे तथ्यात्मकं ज्ञानं दीयते -

**वृषा मे रवो नभसा न तन्यतुरुग्रेण ते वचसा बाध आदु ते।**
**अहं तमस्य नृभिरग्रभं रसं तमस एव ज्योतिरुदेतु सूर्यः।।**[18]

अर्थात् वैदिकाः मन्त्राः वर्षणशीलपर्जन्य इव शक्तिमन्तः सन्ति। एतादृशैः वैदिकैः प्रचण्डवचोभिः वयं विषधरं भवन्तं बध्नीमः मनुष्येषु भवद्विषं प्रसरात् रोधयामः। यथा ज्योतिष्मान् सूर्यः तमःनाशायोदेति तथैव पुरुषोऽपि रोगनाशाय उदीयात् सर्वथा प्रयत्नशीलो भवेत्। अर्थववेदे प्रोक्तम्-

**चक्षुषा ते चक्षुर्हन्मि विषेण हन्मि ते विषम्।**
**अहे म्रियस्व मा जीवीः प्रत्यगभ्येतु त्वा विषम्।।**[19]

अर्थात् हे सर्प! वयं स्वनेत्रबलात् तव नेत्रबलं नाशयामः, विषेण विषं नाशयामः। हे सर्प! त्वं म्रियस्व, मा जीव खलु। तव विषः तवाभ्यन्त एव प्रविशेत्। अथर्ववेदे ओम्शब्दस्य महत्त्वं प्रतिपादयन् उक्तमस्ति-

**त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः।**
**प्रत्यौहन्मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा।।**[20]

अर्थात् यदा एकाक्षरेण (ओम्इत्यनेन) सह सुपर्णत्रयः (श्रेष्ठकिरणयुक्ताः) त्रिवृत्तं निर्माय समर्थाः भवन्ति तदा ते अमृतयुक्ताः भूत्वा समस्तविकारान् विनश्य मृत्युमपि व्यपनयन्ति। अ,उ,म, इत्यस्य समुदायः ओम्शब्दः भाव-विचार-कर्मप्रवाहेण अनश्वरजीवात्मना सह यदा शक्तियुक्तो भवति तदा मन्त्रप्रभावं प्रदर्शयति। चरकसंहितायामपि अग्निः,धन्वन्तरिः, प्रजापतिः, अश्विनीकुमारः, इन्द्र, ऋषयः, सूत्रकारा आचार्याः एतेभ्यः सर्वेभ्यः अभिमन्त्रितै राशीर्वादात्मकमन्त्रैः स्वाहाहोमादिविधिः प्रोक्तः'[21]। बलासरोगनिवारणाय मन्त्रप्रयोगं कुर्वन्नुच्यते -

**अस्थिस्रंसं परुस्रंसमास्थितं हृदयामयम्।**
**बलासं सर्वं नाशयाङ्गेष्ठा यश्च पर्वसु।।**[22]

अर्थात् शरीरस्य अस्थिषु युग्मेषु च पीडादायकः, शरीरबलनाशकः श्वास-कासादिरोगः हृदये शरीरे च व्याप्यते। हे मन्त्रशक्ते! तद्भवान् निर्मूलयतु। अपि चोक्तम्-

**निर्बलासं बलासिनः क्षिणोमि मुष्करं यथा।**
**छिनद्म्यस्य बन्धनं मूलमुर्वार्वा इव।।**[23]

अर्थात् बलविनाशकः श्लेषरोगिनं क्षयरोगिनं समूलं नश्यति, यथा च पक्वं कर्कटीफलं पादपात् स्वतः निर्मुच्यते तथैव रोगबन्धनकारणं शरीरात् सहजमेव दूरयामि। अथर्ववेदे दीर्घजीवनाय कामना एवं क्रियते -

**मा नो हासिषुर्ऋषयो दैव्या ये तनूपा ये नस्तन्वस्तनूजाः।**
**अमर्त्या मर्त्या अभि नः सचध्वमायुर्धत्त प्रतरं जीवसे नः।।**[24]

अर्थात् दिव्यसप्तर्षयः अस्माकं शरीरं रक्षयेयुः। ते अमरदेवाः मरणधर्मिणामनुकूलं भूत्वा तेभ्यः श्रेष्ठं दीर्घं च जीवनं प्रददतु। अपि च दीर्घजीवनाय अथर्ववेदे प्रोक्तम्-

**इह तेऽसुररिह प्राण इहायुरिह ते मनः।**
**उत् त्वा निर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि।।**[25]

अर्थात् हे आयुःकामयमान पुरुष! अस्मिन्नेव शरीरे तव प्राणाः आयुः मनः जीवनं च सर्वे सुस्थिराः स्युः। येन रोगपाशेन तवाधोगतिर्भवति तेभ्यः रोगपाशेभ्यः मन्त्रद्वारा वयं त्वां मोचयामः। यक्ष्मरोगनिवारणार्थं मन्त्रप्रयोगं कुर्वन्नुच्यते ऋषिणा -

**अघशंसदुःशंसाभ्यां करेणानुकरेण च।**
**यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि।।**[26]

अर्थात् सर्वे रोगाः पापिभिः दुष्टैश्च सह इतः दूरीभवन्तु। करानुकराभ्यां यक्ष्मरोगं पृथक् करोमि। अपि च ताभ्यामेव मृत्युमपि दूरीकरोमि। यक्ष्मरोगः अत्यन्तं घातकः संक्रामकः रोगः विद्यते। अनेन फेफड़ाइत्यंगं प्रभावितं भवति। यक्ष्मरोगः अद्यत्वे टीवी इतिरोगशब्देन प्रसृतमस्ति।

व्याधेः स्वरूपद्वयं भवति-शारीरिकः मानसिकश्च। अत एव यजुर्वेदे मनस्स्वस्थाय, मनसः शिवसंकल्पाय च कामना वर्तते -

**यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।**
**यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु।।**[27]

अर्थात् प्रखरज्ञानसम्पन्नं चेतनशीलं धैर्यसम्पन्नं च यन्मनः, सकलप्राणिनामन्तःकरणे अमरज्योतिस्वरूपं विद्यते। यद्विना किमपि कर्म न क्रियते तन्मनः श्रेष्ठं कल्याणकारि शुभसंकल्पयुतं च स्यात्।

एवं च वयं पश्यामः यत् वैदिकवाङ्मये मन्त्रचिकित्सायाः प्रभावः अतिशयेन विद्यते। मन्त्रद्वारा सर्वव्याधिनाशायोपदेशः वैदिकसाहित्ये प्राप्नोति। एषा वैदिकचिकित्सापद्धतिः कालानुसारं श्शक्त्यनुसारं च संचालिता भवति स्म। एते मन्त्राः अपारशक्तिसम्पन्नाः भवन्ति। यथाविधिप्रयोगेण असाध्यस्यापि व्याधेः निदानं भवतीति वैदिकवाङ्मयस्योद्घोषः विद्यते।

**संदर्भ –**


1 *कुमारसम्भव 5.33*

2 *चरकसंहिता शरीरस्थान 306-310 9*

3 *द्विवेदी, डॉ.कपिलदेव, वेदों में आयुर्वेद, पृ. 156*

4 *द्विवेदी, डॉ.कपिलदेव, भाषाविज्ञान एवं भाषाशास्त्र, पृ. 132*

5 *पातंजल महाभाष्य, प्रथम आह्निक*

6 *अथर्ववेद 1.11.1*

7 *अथर्ववेद 1.11.2*

8 *अथर्ववेद 1.11.3*

9 *यजुर्वेद 3.17*

10 *यजुर्वेद 3.18*

11 *ईशावास्योपनिषद् 2*

12 *अथर्ववेद 1.3.1*

13 *अथर्ववेद 1.25.1*

14 *अथर्ववेद 1.25.2*

15 *यजुर्वेद 3.59*

16 *यजुर्वेद 3.60*

17 *अथर्ववेद 5.13.2*

18 *अथर्ववेद 5.13.3*

19 *अथर्ववेद 5.13.4*

20 *अथर्ववेद 5.28.8*

21 *चरकसंहिता विमानस्थानम् 8.11*

22 *अथर्ववेद 6.14.1*

23 *अथर्ववेद 6.14.2*

24 *अथर्ववेद 6.14.3*

25 *अथर्ववेद 8.1.3*

26 *अथर्ववेद 12.2.2*

27 *यजुर्वेद 34*

# 6

# वैदिकवाङ्मये रस-अलंकारयोर्निदर्शनविमृष्टिः

*शुभ्रजित् सेनः*

भारतीयसाहित्यस्य प्राचीनतमं वाङ्मयं तावद्वैदिकसाहित्यमिति निश्चप्रचम्। लौदककाव्यादिभ्यो वैदिकवाङ्मयं सर्वथा विलक्षणता वेदमन्त्रेषु संदृश्यते। लौदककसाहित्यवद् वैदिकसाहित्यं पाठं पाठं विद्वांसः परमाह्लादमुपभुञ्जते। वैदिका ऋषयः स्वस्वमनोगतान् भावान् सम्यक्तया प्रकटयितुमलम्। मनोगतभावानां सुन्दरतयाभिव्यञ्जने अलंकारशास्त्रीयोपदानैः प्रयोजनं वरीवर्ति। तत्र अलंकारा न केवलं सूक्तगतसौन्दर्यं वर्धयन्ति, परञ्च कवीनाम् आन्तःभावनां, रहस्यावृतं तत्त्वं स्वच्छं प्राकृतिकं चित्रञ्च प्रकटीकर्तुं क्षमाः। अपि च, वेदार्थबोधाय यथा वेदाङ्गानामवश्यकता, तथैव अलंकारशास्त्रं बहुषु क्षेत्रेषु वेदार्थबोधस्योपकारकम्। किन्तु वेदव्याख्यायां यागमूलकप्रवृत्तेर्दार्शनिकविचारस्य प्राधान्याच्च सायणवद्भाष्यकाराः वेदशास्त्रस्यालंकारस्वरूपं नाङ्गीचक्रुः। परं नवीनाः वेदभाष्यकार आमनन्ति यत् वैदिकसादहत्ये अलंकारशास्त्रस्य प्रथमं बीजं निहितमासीदिति। यस्मादेव कालाद् भारतीया आर्याः कवित्वशक्त्याः प्रेरणां लेभिरे, तस्मादेव अलंकारशास्त्रस्य मूलं रोपितं बभूव इत्युक्तौ नान्ति संशयः।

वेदो हि काव्यम्, यच्च भगवता स्वयमेवोद्घोषितम् - "..देवस्य पश्य काव्यं न ममार न जीर्यति"[1] -–अर्थात् वेदः ईश्वरस्य काव्यम्, यत् कदापि न तिरोहितम्, न च कदापि अप्रासंगिकं भवति। वेदेषु ईश्वरः कवित्वेन वर्णितः"... कविर्मनीषी परिभूः स्वयम्भूरयाथातथ्यतोऽर्थान् व्यदाच्छाश्वतीभ्यः समाभ्यः"[2]–अथाित् ईश्वरः कविः = क्रान्तदर्शी (यतो दह स यदेव संपश्यति, तदन्ये न पश्यन्ति। तस्मादेव लौकिककविरपि कविरच्युच्यते। यतः स स्वकाव्ये नूतनान्

विचारान् संनिधत्ते, यदन्ये तथैव न पश्यन्ति)। यतो ध्यायतीति कृत्वा स मीमांसकिः अतीन्द्रियवादी, सर्वगतः, आत्मानं प्रकाशयति च। स लौकिकांन् अलौकिकांश्च विषयान् वेदद्वारा परमात्मनः सकाशं निवेदयति।

वैदिकवाङ्मये अलङ्काराणां प्रयोगाद्रसः एव प्रतिपादितः। कविः स्वानुभवं सहृदयहृदयपर्यन्तं सरलतया सम्प्रेषयितुं तदनुरूपं अलङ्कारादियुक्तं वाक्यं व्यवहरति। वयम् एवंविधस्य काव्ययुगस्य कल्पनाम् अपि कर्तुं न शक्नुमः, यत्र उपमादयः न प्रयुक्ता भवेयुः। वैदिकसूक्तेषु नानादेवतानां यज्ञं प्रति समागमनाय पार्थिवसुखस्य सम्पादनाय आध्यात्मिकभावस्य उन्मेषणाय च बहुविधेषु वैदिकच्छन्दसु प्रार्थना कृतास्ति। प्राथिनाऽवसरे कविः तासां पवित्रभावानां भव्यरूपाणां च सम्यग् वर्णनञ्चकार। व्यङ्ग्यार्थप्रतिपादकानि वाक्यानि च तत्र विद्यन्ते। वैदिकर्षयः उच्चविचारान् कर्तुमलम्। कलारहितं जीवनं तेभ्यो न रोचते स्म। ते कलासु कुशलं जीवनं द्रष्टुं पारयन्ति। वेदवेदाङ्मयं प्रायेणैव कलायुक्तं दृश्यते। वेदवेदाङ्गेषु क्वचिदुषाविषयकेषु मन्त्रेषु सौन्दर्यभावना अधिकतया दृश्यते। यथा अग्नेः रूपवर्णनप्रसङ्गे स्वभावोक्त्यलंकारः प्रयुज्यते तथा वरुणस्तुतौ हृद्गतकोमलभावानां माधुर्यगुणस्य च प्रकार्शो वर्तते। ''उतत्वः पश्यन् न ददर्श वाचं, जायेव पत्ये उषती सुवासा'', ''द्वा सुपर्णा सयुजा सखाया'' इत्यादीनि अनेकानि रसपरवाक्यानि वेदेषु आम्नायन्ते। एतेषां वाक्यानाम् अभिप्रायं साहित्यशास्त्रेषु अनभिज्ञोऽपि ज्ञातुं न प्रभवति। एवं यो जनः साहित्यशास्त्रं न वेत्ति, स व्यञ्जनया प्रतिपाद्यमानान् वैदिकार्थान् ज्ञातुं न शक्नोति। अनेन प्रकारेण वैदिकमन्त्रेषु काव्यगुणाः भूयशः दृश्यन्ते, येषां ज्ञानं विहाय वैदिक-मन्त्रणामर्थबोधो न सम्भवेत्।

तस्मात् राजशेखरेण एकादशशताब्द्यां काव्यमीमांसा इत्यलंकार ग्रन्थे उक्तम्- ''उपकारकत्वादलंकारः सप्तममङ्गम्। ऋते च तत्स्वरूपपरिज्ञानाद् वेदार्थानवगतेः''[3]। यायावरीयो नाम राजशेखरः ऋग्वेदस्य प्रथमाध्यायस्य चतुः षष्ठ्यत्तरैकशततमस्य सूक्तस्य विंशतितमं मन्त्रम् उद्धृतवान्-

**''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यिः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति''[4]।।**

मन्त्रेऽस्मिन् रूपकव्यतिरेकयोरलंकारयोर्ज्ञानं विहाय कथमपि

जीवात्म- परमात्मनोः स्वरूपव्याख्यानमसम्भवपरम्। श्वेताश्वतरोपनिषदः शङ्करभाष्ये आचार्येण शङ्करेण मन्त्रस्यास्यार्थो विश्लेषितो रूपकालंकारमाश्रित्यैव।

**अलंकारविधानम् -**

अलंकारशब्देन सह सौन्दर्यबोधः सम्पृक्तः। अत्रालंकारशब्देन अनुसप्रासोपमादिशब्दार्थालंकाराणां (अलंक्रियते अनेनेति अलंकारः, कर्मवाच्यनिश्पन्नः अलंकारशब्दोऽयम्) ग्रहणं भवति। ऋग्वेदस्य इन्द्रसूक्ते प्रथममेव अलंकारशब्दस्य प्रयोगोऽलक्षि - 'वायवायाहि दर्शत इमे सोमा अलंकृताः'[5] इति। अपि च, ऋग्वेदीयायां कौषीतक्युपनिषदि आम्नातम् - ''तं ब्रह्म आह अभिधावत मम यशसा विजरां वा अयं नदीं प्रापत्....। तं पञ्चशतानि अप्सरसां प्रतियन्ति शतं चूर्णहस्ताः, शतं वासोहस्ताः, शतं फलहस्ताः, शतम् आञ्चहस्ताः, शतं माल्यहस्ताः तं ब्रह्मालंकारेण अलंकुर्वन्ति। स ब्रह्मालंकारेण अलंकृतो ब्रह्मविद्वान् ब्रह्म अभिप्रैति''[6] इति।

यास्केन निरुक्ते अलंकृतशब्दार्थो निगदितः - 'अलंकृता अलंकृताः'। 'का ते अस्त्यरंकृतिः'[7] इति मन्त्रे 'अलंकृताः' 'अलंकृतिः' चेति शब्दद्वयं परिवर्त्य यथाक्रमं 'अरंकृताः ' 'अरंकृतिः' चेति शब्दावाम्नातौ। सायणभाष्ये अरंकृताः इति शब्दं परिवर्त्य अलंकृत इति शब्दः उल्लिखितः - अभिषवादिसंस्कारोऽलंकारिः[8] इति। अपि च, शतपथब्राह्मणे छान्दोग्योपनिषदि च अलंकारशब्दः व्यवहृतः। यास्काचार्यस्य 'निरुक्ते' उच्यते '.....सोमा अरंकृता अलंकृताः'। अपि च, आम्नातम् 'ईलते त्वामवस्यवः कण्वासो वृक्तवर्हिषः। हविष्मन्तो अरष्कृतः'[9]।

वेदमन्त्रेषु बहुत्रैव शब्दालंकाराणां प्रयोगो परीदृश्यते। तत्र अनेकस्य अर्थात् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः। छेकानुप्रासस्य उदाहरणं तावत् 'क्रमान् को अस्याः कतिधा विदग्धान् को अस्याधाम कतिधा व्युष्टीः' (अथर्ववेदः, 8.9.10)। अपि च, 'च्युता चेयं बृहत्यच्युता च विद्युद् विभर्त्ति स्तनयित्नूंश्च सर्वान' (तत्रैव, 9.2.15) इति मन्त्रः छेकानुप्रासस्य दृष्टान्तः। ततश्च 'एकस्य अपिशब्देन अनेकस्य व्यञ्जनस्य द्विर्बहुकृतो वा सादृश्यं वृत्त्यनुप्रासः'। 'एकस्याप्यसकृत्पर' इति मम्मटः काव्यप्रकाशे। अथर्ववेदे वृत्यनुप्रासस्य बहवो दृष्टान्ताः परिप्राप्यन्ते। तद्यथा - 'स ह द्यामधिरोहति रुहो रुरोह रोहितः'[10] इति मन्त्रे र-हवर्णयोः बहुकृत्वः सादृश्यात् वृत्त्यनुप्रासः। ततः परं व्याधिविषयको

रक्तस्रावमूलकः कश्चन मन्त्रः 'तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ नध्यमे कनिष्ठिका च तिष्ठति तिष्ठादिद्धममिर्मही'[11] इति। अत्र तकार-ष्ठकारयोः भूय आवृत्तये श्रुत्यनुप्रासः। अथर्ववेदस्य सप्तमे मण्डले सूर्यदेवमुद्दिश्य विहितोऽयं मन्त्रः - 'दर्शो असि दर्शतोऽसि'[12] इति। अत्र प्रथमः दर्शशब्दः दर्शनयोग्यार्थे, द्वितीयिश्च दर्शतः दर्शनीयार्थे व्यवह्रियेत इति कृत्वा यमकम्। पुनश्च, 'ब्रह्मा देवाँ अनुक्षियति ब्रह्म दैवजनीर्विशः । ब्रह्मोदमन्यत्रन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते''[13] इति। मन्त्रेऽस्मिन् प्रतिब्रह्मशब्दम् अर्थान्तरसूचकम्। प्रथम-द्वितीयौ ब्रह्मशब्दौ देववाचकौ। तृतीयो ब्रह्मशब्दः ब्रह्मचर्यार्थं तथा चान्तिमो ब्रह्मशब्दो ब्रह्मविद्यां द्योतयतः। किञ्च, श्लेषालंकारस्य दिङ्मात्रम् उदाहरणं प्रस्तूयते अथर्ववेदस्य त्रयोदशकाण्डात्-

**''वि रोहितो अमृशद् विश्वरूपं समाकुर्वाणः प्ररुहो रुहश्च।**

**दिवं रुड्ह्वा महता महिम्ना सं ते राष्ट्रमहक्तु पयसा घृतेन'''[14] ।।**

शब्दानां व्यवहाराद् भिन्नार्थद्योतनात् श्लेषालंकारः।

अपरतः, वेदान् व्याख्यातुकामेन नैरुक्तसम्प्रदायेन परिलक्षितं यत नैकेषां शब्दानां मध्ये अर्थालंकारत्वेन उपमापरपर्यायस्य सादृश्यतत्त्वस्य प्रयोगोऽस्ति। आक्षरिकार्थे अलंकारशब्दः सर्वदा अप्रयुक्तोऽपि अलंकारार्थकशब्दा ऋग्वेदे नातिस्वल्पाः। तद्यथा -

**'तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदक्तोः।**

**श्रिये रुक्मो न रोचते उपाके;।।'[15]**

अपि च,

**'घृतं न पूतं तनूररेपाः शुचि हिरण्यम्।**

**तत्ते रूक्मो न रोचत स्वधावः'।।'[16]**

अर्थात् ऋग्वैदिका ऋषयः सौन्दर्यसाधके भूषणार्थे अलंकारशब्दान् प्रयुक्तवनतः। न केवलम् ऋग्वेदे, अथर्ववेदे एव प्रथममेव वैदिकसाहित्यस्य अलौकिकचमत्कारित्वस्य प्रसङ्ग उक्तिः - 'अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति। देवस्य पश्य काव्यं न ममार न जीर्यति''[17]। द्वादशशताब्दीकेन मम्मटभट्टेन काव्यप्रकाशे वेदवाक्यं प्रभुसम्मितवाक्यत्वेन व्याख्यातम्। अपि च, वैदिकसाहित्यस्य प्रदतच्छत्रं काव्यस्य सौन्दर्योत्पादकान्युपकरणानि नाम अलं कार-गुण-रस-ध्वन्यादीनि विलसन्ति। एतेन प्रमाणीभवति यत् वेदशास्त्रेऽपि अलंकारसम्मतं काव्यतत्त्वं विद्यमानमासीत।

ऋषीणाम् अन्तःकरणस्य स्वाभाविक-भावावेगयोः वेदवचांसिः प्राप्तानि। वैदिकमन्त्राणां देवतास्तुतिपरकत्वादेव ऋषिकवयः प्रतिपादयामासुः मुख्योपजीव्यत्वेन देवानां माहात्म्यख्यापनम् आत्मतत्त्वञ्च। सर्वेषु मन्त्रेषु ऋषीणां हृदयानुभूतेः स्वतः स्फूर्तः प्रकशोऽनुभूयते। किन्तु एतदपि सत्यं यत् सर्वे वेदमन्त्रा न ह्युत्कृष्टसाहित्यस्य प्रकाशकाः, परं केचिन्मन्त्राः निश्चप्रचमेव उत्कृष्टसाहित्यस्य निदर्शनानि। कानिचित् सूक्तानि मन्त्राश्च गीतिकाव्यस्य सदृशत्वेन प्रतिभान्ति। विशेषेण, संवादसूक्तानि नाट्यसाहित्यसृष्टेबीजंरूपाणीति साहित्यविश्लेषकाणां नयः। मन्त्राणामेतेषां सावलीलता, छन्दोबद्धता प्रसादगुणयुक्तता, शब्दार्थालंकारयोः आतिशय्यता च ध्रुपदीसंस्कृतसाहित्यस्य सौन्दर्यमपि म्लानीकुर्वन्ति। वेदिकर्षिकवीनां छन्दोविषयका उद्धावनशक्तिः अद्धा एव अस्माकं हृदि विस्मयं जनयति। प्रसङ्गतः, दिङ्मात्रमुदाहरणं प्रस्तूयते -ऋग्वेदस्य प्रथममण्डलान्तर्गतस्य अग्निसूक्तस्य नवमो मन्त्रः 'स न पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये'[18] इति । सायणेन उक्तं - 'नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्वा समवेतो भव। तत्रोभयत्र दृष्टान्तः यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्'[19] इति। मन्त्रेऽस्मिन् पितृ-पुत्रयोः शाश्वतः सम्पर्क उपमालंकारेणोपस्थाप्यते। अपि च, सूर्यसूक्तस्य मन्त्रः 'सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्'[20] इति। अर्थात् 'सूर्यो देवीम् दानादिगुणयुक्तां रोचमानाम् दीप्यमानाम् उषसं पश्चादभ्येति प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति। तत्र दृष्टान्तः - मयो न योषाम्। यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं मततमुगच्छति तद्वदि'ति सायणः। अत्रापि उपमालंकारेणैव उषा-सूर्ययोः स्वाभाविकः सम्बन्धः स्फुट्यते। किञ्च, ऋग्वेदस्य अरण्यानि-सूक्तानां प्रतिच्छत्रं स्वभावात्त्यलंकारस्य प्रयोगो लक्ष्यते।

उपमादिसादृश्यवाचकशब्दप्रयोगो वैदिकयुगादेव प्रारभ्यते स्म। तथाहि उपमालंकारप्रयुक्तानां वैदिकसूक्तानां सविशेषं मूल्यमासीत। गभीरानुभूतिं स्वतः स्फूर्ततया प्रकाशयितुं प्रत्येकम् ऋक् अनिर्वचनीयगीतिकाव्यरूपेण दर्शनीया। वैदिकमन्त्रादिः देवान् उद्दिश्य प्रशस्तिनिवेदनस्य माध्यमो भूत्वापि तषु निहितमतुलनीयं काव्यमाधुर्यम्। ऋग्वेदस्य प्रथमे तथा च अष्टमे मण्डले उपमाशब्दाः असकृत् व्यवह्रियन्ते। ऋग्वेदस्य प्रथममण्डलस्य एकस्मिन् मन्त्रे अङ्गिरसः पुत्रः हिरण्यस्तूपः वदति -

**त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।**
**स्वादुक्षामा यो वसतौ स्येनकृज्जीवयाजं यजते सोपमा दिवः[21] ।।**

सायणाचार्यमते अस्मिन् मन्त्रे उपमालंकारः। तदुक्तं तेन - 'उपमा –टाीो भवदत। यथा स्वगोऽनुष्ठातृन सुखयति तथा त्वमपि ऋत्विगादीनामित्यर्थः'। ऋग्वेदस्य प्रथमे मण्डले एव उषसो वर्णनायामुच्यते अद्यसन्न समतो बोधयन्ती.... इति। अर्थात् गृहिणी जागरिता सती यथा सर्वान् गृहस्थानि् जागरयति, ऊषापि जगतो मानवान् अपीत्यरर्थः। अत्र ऊषसा सह गृहिण्याः तुलना विहिता। अयञ्च अलंकारः ऋग्वेदस्य सर्वापेक्षया प्रियोऽलंकार इत्युच्यते। वेदस्यास्य क्रान्तदर्शिनः ऋषयः सादृश्यवाचकमुपमापमदपि बहुत्र व्यवहृतवन्तः –

1. पदं यद्विष्णोरूपमम्[22]।
2. युवाभ्यां मित्रावरुणोपमं धेयामृचा[23]।
3. का अस्य पूवोरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे[24]।
4. वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघोनि।
   यच्छा सूरिभ्यः उपमं वरूथं स्वाभुवो जरणामश्रवन्त[25]।।
5. वि निः सहस्रं शुरुधो रन्त्वृतावानो वरुणो मित्रो अग्निः।
   यच्छन्तु चन्द्रा उपमं नो अकर्मा नः कामः पूपुरन्तु स्तवानाः[26]।।
6. आ नो अग्ने वयोवृधं रयिं पावक शंस्यम्।
   रास्वा च न उपमा ते पुरुस्पृहं सुनीती स्वयशस्तरम्[27]।।

प्रसङ्गतः उल्लेख्यं यत् सादृश्यवादास्य सुप्राचीनंप्रथागतैतद्यं भवति उपमालङ्कार इति शक्यवचम्। माहात्म्यस्यास्योल्लेखः यास्कीयेनिरुक्ते गार्ग्याचार्यस्य उद्धतौ संदृश्यते। गार्ग्येण निरुक्ते नैकाश्च उपमासंज्ञाः कृताः -

(1). 'यतत्तत्सद्दशमिति गार्ग्यः[28]। अर्थात् गार्ग्याचार्यमते, किमपि वस्तु अन्यवस्तुतः भिन्नं सत् यदि तत्सदृशं भवति, तर्हि उभयोः मध्ये उपमा भवति। तद्वस्तु अन्यवस्तुना समम् उपमितं भवतीदत। उदाहरणम् - 'अग्निरिव खद्योतः'।

(2). 'तदासां कर्म्म'[29]। अर्थात् प्रसिद्धगुणविशिष्टस्य वस्तुतः साहाय्येन अप्रसिद्धगणोपेतस्य वस्तुतः गुणः प्रकाशितो भवतीति वास्तविकोपमाया अर्थः अयम्। 'चन्द्र इव मुखम' इत्युक्ते चन्द्रस्य साहाय्येन मुखस्यापि आह्लादकत्वगुणः प्रकटितो भवदत।

(3) 'ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वा प्रख्यातः वोपमिमीते'[30]। अर्थात् गुणेन श्रेष्ठः अथवा प्रख्याततमेन वस्तुना सह अनुत्कृष्टम् अप्रख्यातं वस्तु उपमितं भवति। यथा-–'सिंहो माणवकः' इति प्रतीकवाक्ये नियतोपस्थितिकं प्रातिपदिकार्थम् आश्रित्य शक्यर्थरूपेण सिंहसदृशोत्कृष्टगुण शालिशौर्यमवलम्ब्य अज्ञातमाणवकसम्बन्धिनो बालकस्य उपमा साधितेति कृत्वा कथमपि हानस्य आशङ्का लक्ष्यार्थे स्थिरीभाववशान्नागच्छति। सिंह इव माणवकः शौर्यवीर्यसदृशः सन्–उपमीयते। सिंहस्तावत् उपमानस्वरूपोत्कृष्टगुणस्य आधारः। माणवकस्य तौल्यत्वात् एतदुपमेयरूपेण आधेयो भवति। उत्कृष्टगुणशालि सिंहसदृशमुपमानं प्रख्यातं सत् विवेचितमस्ति। तद्द्वारा माणवकस्य उपमितत्वात् स उपमेय इत्युच्यते। उपमाक्रियावशात् उपमेये माणवके शौर्यादिजनितोत्कृष्टो गुणः ख्यातिरूपेण आश्रितो भवति। उपमानोपमेयवस्तुनोः समानधर्मसम्बन्धः सादृश्यवाचिनामिवादीनां पदानां प्रयोगात् निश्चितो वर्तते। साधारणधर्मस्य प्रयोजके सादृश्यसंयोगात्मकसम्बन्धे समानधर्मसम्बन्धात्मकसाधर्म्यस्य बोधको भवति।

(4). 'ज्यायसा वा गुणेन (उत्कृष्टेन गुणेन) कनीयांसम् उपमियीत प्रख्याततमेन वा (वस्तुना) अप्रख्यातम् उपमिमीयते। तथापि कनीयसा ज्यायांसम्'[31]। अर्थात् अनुत्कृष्टेन वस्तुना उपमानेन सह उत्कृष्टवस्तुनः अपि तुलना भवितुम् अर्हति। आधुनिकसाहित्यशास्त्रे एतादृर्शी उपमा 'हीनोपमा' इत्युच्यते। एतच्च दोषमध्ये परिगण्यते। परं निरुक्तकृत् यास्कः अस्य दोषाधायकत्वं न स्वीकृतवान्। दिङ्मात्रम् उदाहरणं तावत् -

**'तनूत्यजेव तस्करा वनर्गु रशनाभिर्दशाभिरभ्यधीताम्।**
**इयन्ते अग्ने नव्यसी मनीषा युम्बा रथं नशुचयदभिरङ्गः'**[32]।।

स्कन्दस्वामिना उक्तम् -

**'अभिपूर्वेवादधातिबन्धने बद्धस्तौ बाहु।**
**अध्वर्य्योः स्वभूतौ महतादरेण जनितवस्तावित्यर्थः'**।।

दुर्गाचायेण व्याख्यातम् - 'रशनाभिदशभिरभ्यधीताम अर्भ्यीतामित्यभ्य-धाताम्'[33]। उदाहरणं तावत् -–'ज्यायां तत्र गुणोऽभिप्रेतः' इति। तस्करेण सह बाहुद्वयस्य तुलनादुपमा भवति।

उपनिषत्स्वपि नैकेषामलङ्काराणां दृष्टान्ताः लभ्ये। कठोपनिषदि रथस्य रूपकं शरीरमस्ति (1/3/3)। ऋग्वेदे ऋतुवर्णनपरा नैके मन्त्रा प्राप्यन्ते। पर्जन्यसूक्ते

(5/83) वर्षाकालस्य अतीव नैसर्गिक वर्णनमस्ति। मण्डूकसक्ते (7/103) वर्षाकालस्य रमणीयमेकं दृश्यं वर्णितम्। तत्र एकस्य मण्डुकस्य शब्दं श्रुत्वा अपरो नित्यं शब्दायते। यथा वेदपाठं कुर्वन्तं गुरुं शिष्या अनुवदन्ति तथैव अयं मण्डुकध्वनिः वर्तते -

**'यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षामाणः।**
**सर्वं तदेषां समृधेव पर्वं यत् सुवाचो वदतनाध्यप्सु।।** इति

उपनिषदामपि जगन्मूलकारणं ब्रह्मतत्त्वमलंकृतवाक्यैः प्रत्यपादि अनायासेनैव। दिङ्मात्रंमुदाहरणं तावत् -

**''आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च''[34] ।।**

कठोपनिषदो मन्त्रोऽयमवश्यमेव रूपकालंकारस्य विशिष्टः प्रयोगः। अत्र आत्मा रथी, शरीरं रथः, बुद्धिः सारथिस्तथा च मनः प्रग्रहम् इत्युच्यन्ते। अतः, आत्म-शरीर-बुद्धि-मनसां मिथः सम्पर्को रूपकालंकारेण बोध्यः।

ऋग्वेदेसूर्यस्तावद् आकाशस्थस्य स्वर्णिममणिरूपः 'दिवो रुक्म उरुचक्षा उदेति'[35] इति। सूर्यः ज्वलितप्रस्तरखण्डः आकाशस्थश्च - 'मध्ये दिवो निहितः पृश्नरश्मा'[36] इति। अग्निः खलु स्वप्रभया आकाशं स्पृशति - धृतप्रतीको बृहता दिवि स्पृर्श''[37] इति। स्पष्टमेतदेव यत् एते मन्त्राः अतिशयोक्तिमूलकाः सन्ति। ऋग्वेदे अतिशयोक्त्याः प्रख्यातमुदाहरणमस्ति। तत्र सायणानुसारं यज्ञस्य, पतञ्जल्यनुसारं शब्दस्य, राजशेखरनयानुसारं काव्यस्य वा स्तुतिः कृतास्ति। तथाहि -

**चत्वारि शृङ्गास्त्वयोऽस्य पादा द्वे शीर्षे सप्त हस्तासौ अस्य।**
**त्रिधा बद्धो बृषभो रोरवीति महादेवो मर्त्याम् आविवेश[38] ।।** इति।।

अयं मन्त्रः श्लेषालंकारस्यापि दृष्टान्तो भवितुमर्हति।

यजुर्वेदस्य एकस्स्मिन् प्रख्याते मन्त्रे उत्प्रेक्षालंकारस्य प्रयोगो लक्ष्यते। मन्त्रस्तावत् - श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्'[39]। 'सम्भावनोत्प्रेक्षा प्रकृतस्य समेन यत्' इति काव्यप्रकाशे उत्प्रेक्षालंकारः। मन्त्रस्यार्थः- तस्य पुरुषरूपिणो ब्रह्मणः स्त्रियौ वर्तते श्रीः लक्ष्मीः, अहोरात्रवत् दिशौ स्तः, सर्वाणि तव रूपस्य रश्मयः विकीर्णास्सन्ति आकाशे। एतानि सर्वाणि न हि परमात्मनः अङ्गरूपाणि। परम् उत्प्रेक्षालंकारेणात्र श्री-लक्ष्मी-अहोरात्रादीनां गुरुत्वमत्र प्रकाशितमिति।

कस्यापि वस्तुनो महत्त्वं प्रकटीकर्तुम् अतिशयोक्त्यलंकारस्य व्यवहारो भवति। यजुवेदस्य एकस्मिन् मन्त्रे ''... त्रीणि पदानि निहिता गुहा सत् यस्तानि वेद स पितुः पितासत्''[40] अर्थात् यस्य बुद्धिरूदपण्यां गुहायां परमात्मनो त्रीणि पदानि सृष्टि-स्थिति-लयरूपाणि भूत-भविष्य- वर्तमानात्मकानि वा निहितानि सन्ति, तत्र स्वस्य पितुरपि पिताभवत्। एतत्सत्यं यत् तत्त्वज्ञानी कदापि स्वपितुर्न पिता भवितुमर्हः। किन्तु स तत्त्वज्ञानेन पितरमतिक्रम्य स्वपित्रेऽपि ज्ञानं दास्यति, यथा स स्वसन्तानेभ्योददाति। अदतर्योक्त्यैव अनन्यवाङ्नैपुण्येन च ऋषिर्विषयमिममुपतस्थौ।

किञ्च, अथर्ववेदस्य एकस्मिन् मन्त्रे अप्रस्तुतप्रशंसाया उदाहरणमाप्यते -

**'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यिः पिप्पलं स्वाद्वत्यनश्नन्न्यो अभचाकशीति[41]।'** इति।।

मन्त्रस्यास्यायमेवार्थस्तावत् सुपक्षधारिणौ सहवासिनौ समानाख्यातौ द्वौ पक्षिणौ एकस्य एव वृक्षस्य उपरि स्थितौ। तयोः विहगयोः एकम् सुस्वादुफलं भुङ्क्ते, अपरस्तावद् अभुक्त एव तिष्ठति। अत्र पक्षिद्वयेन जीवात्मपरमात्मानौ उपमितावत्रातिशयोक्त्यलङ्कारः। पक्षिद्वयस्य स्वभावः समाना नास्ति। तेन व्यतिरेकालङ्कारस्यापि गूढः सङ्केतोऽत्र प्राप्यते। दयानन्दसरस्वतीमते, रूपकालंकारस्य प्रकृष्टो दृष्टान्तस्तावदयं मन्त्रः।

सामवेदस्याधिकाधिकाः मन्त्राः ऋग्वेदादेवाकलिता इति कृत्वा सामवेदान्तर्गतेषु सूक्तेष्वलंकार- रसयोः भूरिशः प्रयोगास्सन्त्यप्यत्र स्थानाभावान्नोल्लिखितम्।

एतदेवोल्लेखार्हं यत् Figures of Speech in the Rgveda (Annals of BORI, Pune, Vol- XXVIII, Part: I-II, 1947, pp 34-64) इति शोधबन्धे P S Shastri महाभागेन प्रत्यलंकारम् कुत्र कुत्र केषाञ्चालंकाराणां प्रयोगो जात इति व्याख्यातम्। तत्र ऋग्वेदे उपमा (10.71.4, 8.34.9....), रूपकम् (1.50.1,9.72.2,...) अतिशयोक्तिः(4.1.9,4.2.19,...) उत्प्रेक्षा (2.4.6,4.7.3,....), विभावना (1.164.20,10.34.9,...), विशेषोक्तिः (1.74.7, 10.71.4,....), उल्लेखः (1.164.64,...), पर्यायोक्तिः (8.81.12, 9.2.1,...), भ्रान्तिमान् (4.16.10,....), अतद्गुणः (7.28.1), विरोधाभासः (6.59.6, 1.152.3,), आक्षेपः (7.55.3,...),

निदर्शना (5.78.4), अप्रस्तुतप्रशंसा (10.71.4, 10.71.5), काव्यलिङ्गम(2.33.4, 7.4.5,...), अनन्वयः (7.55.4, 10.114.4,....) चेति प्राये सर्वेषामलंकाराणां विशेषेण अर्थालंकाराणां प्रयोगवैविध्यं तेन प्रमाणीतम्। अत्युत्साहिपाठकानां कृते H D Velankar Similes in the Atharvaveda (Journal of the Bombay Branch of Royal Asiatic Society', Vol- XXXVIII, 1963-64, pp-19-43) इति प्रबन्धः अद्धा उल्लेखार्हः। प्रख्यातस्य वङ्गविदुषः रमारञ्जनमुखोपाध्यायस्य 'Imagery in Poetry; An Indian Approach', ABORI, Vol. XLIX, 1968, pp-395-401) इति शोधपत्रे दिग्दर्शनन्यायेन प्रसङ्गक्रमेण वेदमन्त्रेषु सन्निहितं कवित्वं सोदाहरणं व्याख्यातमन्ति। पूर्वोक्तशोपत्रत्रितयमवश्यमेव पठनीयमिति।

**रसविधानम् -**

ऋग्वेदस्य बहुषु मन्त्रेषु नैके रसाः प्राप्यन्ते। अतः ते मन्त्रा अस्माकं मनसः प्रधानम् आकर्षणम्। वैदिकर्षीणां मनोगतभावानां सरलनिदर्शनमेतेषु मन्त्रेषूपलभ्यते।

वयं सर्वे जानीमो यत् रसः शृङ्गारकरुणादिभेदेन नवविधः। नवस्वपि रसेषु शृङ्गारो नाम रसो 'रसराज' 'रसराट्' वेति प्रसिद्धिः। यथा शृङ्गाररसः अस्मन्मनो हरति, न तथान्ये अलम्। स शृङ्गाररस संभोग-विप्रलम्भशृङ्गारभेदेन द्विधा विभक्तिः। ऋग्वेदस्य अनेकेषु सूक्तेषु शृङ्गाररसस्योल्लेखः प्राप्यते। तत्र एकस्मिन् सूक्ते पुरुरवा-उर्वश्योः प्रणयप्रसङ्गे विरहिणः नायकस्य कथोपकथने विप्रलम्भशृङ्गाररसस्योल्लेख आप्यते। दिङ्मात्रमुदाहरणं तावत् -

**'इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः।**
**अवीरे क्रतौ विदविधुवन्नोरा न मायु चितयन्तः धुनयः।।'**

रस्यते आस्वाद्यते अनेनेति रस इति व्युत्पत्त्यनुसारं रसपदेन भाव-भावाभास-तदाभास-भावशान्त्यादीनामपि ग्रहणम्। तत्र शृङ्गाररसाभासस्यापि सङ्केतः ऋग्वेदस्य यमयमीसूक्ते (10/10) उपलभ्यते। यत्र यमी स्वभ्रातुः यमस्य समीपमुपगत्य सङ्गमार्थं प्रार्थयते स्म। परं यमः तु तस्याः प्रलोभनेन नाकृटिः। तथाहि आम्नातम् -

**'अव दुग्धानि पित्र्या सृज्या नोऽव या वयं चकृमा तनूभिः।**
**अव राजन् पशुतृपं न वायुं सृजा वत्सं न दाम्नो वसिष्ठम्[42] ।।'** इति

ऋङ्मन्त्रेषु इन्द्रस्तुतौ वीररसस्य सम्यक्तयाभिव्यक्तिदृश्यते। दाशरात्रसूक्ते राज्ञः दिवोदासस्य तथा तस्य प्रतिपक्षिणां च मध्ये यः सङ्घर्षः अभवत् तस्य सुष्ठु वर्णनं कृतवान् महर्षिः वसिष्ठ इति कृत्वा तत्रापि उत्साहाख्यस्थायिभावरूपो वीररसः अभिव्यज्यते। अपि च, गृत्समदर्षिः अनेकासु स्तुतिषु वीररसमुपाश्रित्य इन्द्रस्य वर्णनञ्चकार। दिङ्मात्रं तावत् -

**'यस्मान्न ऋते विजयन्ते जनासोऽयं युध्यमाना अवसे हवन्ते।**

**यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः**[43] **।।**

इन्द्रो हि शौर्य-वीर्ययोः प्रतीकभूतः। अत्र इन्द्रस्य माहात्म्यवर्णने वीररसः स्फुटं प्रकाशते।

अपि च, ऋग्वेदस्य दशममण्डलान्तर्गतस्य अक्षसूक्तम् अवश्यमेव काव्यगुणेनातुलनीयम्। अत्र अक्षक्रीड़ासक्तस्य हृतसर्वस्वस्य द्यूतकस्य मनः कष्टं करुणरसेन अभिषिच्य कविकर्मत्वेनाभिव्यज्यते।

तथाहि आम्नातम् -

**'द्वष्टि श्वश्रुरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।**

**अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम्'**[44] **।।**

द्यूतकस्य अक्षान् प्रति या दुर्निवारासक्तिस्तामपि कवयिता ऋषिः उपमालंकारेण स्फुटीकरोति 'न्युप्ताश्च वभ्रवो वाचमक्रतँ त्रमीदेषां निष्कृतं जारिणीव' इति।

अथर्ववेदस्य द्वितीयाध्यायस्य त्रिंशत्तमे सक्ते स्त्री-पुरुषयोः प्रेम वर्णितम्[45]। अश्विनौ तावत् सूक्तस्यास्य देवता। तौ युग्मेदेवत्वेन समाख्यातौ। अपि च, अथर्ववेदस्य पञ्चमाध्यायस्य द्वादशसूक्तं शृङ्गाररसेन समं सम्पृक्तम्। अस्मिन् सूक्ते देवता अङ्गिरा जातवेदसम् प्रार्थयते -

**'व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः।**

**देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भक्त सुप्रायणाः'**[46] **।।**

किञ्च, अथर्ववेदस्य षष्ठाध्यायस्य ऊननवतितमे सूक्ते पारस्पररकिः प्रेमसम्बन्धो वर्णितः[47] इति।

कृत्वा सम्भोगशृङ्गारो रसः। वेदस्यास्य पञ्चमाध्यायस्य ब्रह्मगवीत्याख्ये ऊनविंशतितमे सूक्ते करुणरसस्यैव प्रतिध्वनिः श्रूयते। यदा राष्ट्रव्यवस्था

ध्वंसोन्मुखनी भवति, तदा समाजे ब्राह्मणानां जीवनं संकटापन्न भवति, ज्ञानिनां स्वाभिमतं प्रकाशयितुम् अन्तरायो भवति, जातिजीवने क्लेशः, दुर्भोगश्च संजायन्ते। अर्थात् समाजस्य करुणा परिणतिः सर्वत्रैव संलक्ष्यते[48]। अथर्ववेदस्य प्रथमाध्यायस्य ऊनविंशतितमसूक्तस्य नामधेयं तावत् वर्चः प्राप्तिसूक्तमिति। अस्मिन् सूक्ते इन्द्रस्य वीरत्वगाथा समाम्नाता। कथंकारम् इन्द्रः विपक्षसैन्यान् हन्तीति तद्वर्णनमस्ति अत्र-

**'मा नो विदन् विव्याधिनो मो अभिवयाधिनो विदन्।**

**आराच्छरव्याऽस्मद्विपूवीरिन्द्र पातय'**[49]।।

अथर्ववेदस्य बहुषु सूक्तेषु अद्भुतरस[50]- वीभत्स[51]- भयानक[52]- शान्त[53] भक्ति[54]- वात्सल्य[55]- रसानां बहुविचित्रिताः प्रयोगाः संलक्ष्यन्ते। अर्थात वेदावाङ्मयं निश्चप्रचमेव रसमयमित्यत्र नास्ति संशयलवः कश्चित्। तस्मादेव नाट्यशास्त्रानुसारं ब्रह्मणा नाट्यवेदसृष्टये वेदचतुष्टयात् उपकरणानि संगृहीतानि। तेषूपकरणेषु अथर्ववेदात् रसो गृहीतिः-

**'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयान् रसानार्थवणादपि'।।(नाट्यशास्त्रम्, प्रथमाध्यायः )**

अथर्ववेदे 'यो नो रसं दिस्पति पित्वो अग्ने...'[56] इति मन्त्रिः समुपलभ्यते यस्मात् प्रमाणीभवति अथर्ववेदस्य ऋषयो रसशब्दं सचेतनतया प्रयुक्तवन्तः। अपि च, अथर्ववेदस्य सूक्तानां बहुत्रैव ऋणीणामन्तरानुभूत्या निविड़ता, सावलीलता च लक्ष्येते।

परिशेषे वक्तव्यं यन्न केवलमलंकारस्य प्रयोगे, वेदमन्त्रेषु ओजः - प्रसादगुणयोः विचित्रितो व्यवहारो नो नयनपथे पान्थायते। स्वाभाविकतया तेषां सृटावपि अलंकारैः समं काव्ये नित्यधर्मस्वरूपयोः रस-वक्रोक्त्योः प्रयोगोऽलक्षि। भाषामाधुर्येण, अलंकारझङ्कारेण, रससिञ्चनेन च वेदमन्त्राश्चमत्कृतिं लभन्ते। वैदिकर्षीणां स्वतोत्सारिता हृदयानुभूतेः प्रकाशो हि वेदः। तेषां मन्त्रेषु बहुत्रैव निश्चप्रचं रसात्मकानां वाक्यानामाधिक्यं वरीवर्ति इति। पूर्वोक्तविश्लेषणादेवैतदेव संप्रतीयते यत् यस्माद्दिनादेव भारतीयार्याः कवित्वशक्त्याः प्रेरणां लेभिरे, तस्मादेवा लंकारशास्त्रस्य मूलं रोपितं बभूव इत्युक्तेर्नास्ति कापि अत्युदक्तिः। परमेतदप्यङ्गीकार्यं यत् वेदव्याख्यायां यागमूलकप्रवृत्तेः दार्शनिकविचारस्य च प्राधान्यात् सायणवत् प्राञ्चः समालोचकाः वेदशास्त्रस्यालंकारस्वरूपं नाङ्गीकृतवन्तः। तथाह्यर्वाञ्चः

समालोचका आमनन्ति यत् वैदिकसाहित्ये अलंकारशास्त्रस्य प्रथमं बीजं निहितमासीदित्यत्र नास्ति संशयलवः कश्चित ।

इत्थं वेदचतुष्टयमलंकार-रस-गुणानां प्राचुर्येण समृद्धम्। वेदस्तावत् उच्चकोटिकं काव्यिकं वाङ्मयमेकमित्यत्र नास्त्यत्युक्तिः। तत्र बहुशः काव्यिकोपादानानां विस्मयकराण्युदाहरणानि परिप्राप्यन्ते। मयकात्र केवलं विहङ्गमदृष्ट्या वैदिकवाङ्मये अलंकारशास्त्रीयतत्त्वान्युपस्थापितानि। ननु वेदस्तावत् देवस्तुतिपरको नीरसः शब्दाप्रधान उपदेशात्मको ग्रन्थ इति चेन्न। वेदवाङ्मयज्ञानं पूर्णतामेति यदि अलंकारशास्त्रस्य सामान्यमपि ज्ञानं स्यादिति। गुण-रसालंकाराणानां प्राचुर्यादेव वेदस्योपजीव्यविषयाः आकर्षणीयाः मर्मस्पर्शिनः हृदयावर्जकाश्च भवन्तीति शिवम् ।

**अन्त्यष्टीकाः**

1. *अथर्ववेदः (10.8.3)*
2. *यजुर्वेदः (40.8)*
3. *काव्यमीमांसा (प्रथमाधिकरणम्, द्वितीयाध्यायः )*
4. *ऋग्वेदः (1.164.20)*
5. *ऋग्वेदः (1.1.3)*
6. *कौषीतक्युपनिषत् (1.3-4)*
7. *निरुक्तम् (7.29.3)*
8. *सायणभाष्यम् (ऋक्संहिता) (1.2.1)*
9. *ऋग्वेदः (1.14.5)*
10. *अथर्ववेदः (13.3.26)*
11. *तत्रैव (1.17.2)*
12. *तत्रैव (7.81.4)*
13. *तत्रैव (10.2.23)*
14. *तत्रैव, (13.1.8)*
15. *ऋग्वेदः (4.10.5)*
16. *तत्रैव (4.10.6)*

*17. अथर्ववेदः (10.8.32)*

*18. ऋग्वेदः (1.1.9)*

*19. तत्रैव (सायणभाष्यम्)*

*20. सूर्यसूक्तम् (1.115.2)*

*21. ऋग्वेदः (1.31.15)*

*22. तत्रैव (5.3.3)*

*23. तत्रैव (5.64.4)*

*24. तत्रैव (4.23.3)*

*25. तत्रैव (7.30.4)*

*26. तत्रैव (7.62.3)*

*27. तत्रैव (8.60.11)*

*28. निरुक्तम् (1.3.13.24)*

*29. तत्रैव (3.13.25)*

*30. तत्रैव (3.13.26)*

*31. तत्रैव (3.13.27)*

*32. ऋग्वेदः (10.4.6)*

*33. निरुक्तम् (3.14.7)*

*34. कठोपदनषि् (1.3.3)*

*35. ऋग्वेदः, (7.63.4)*

*36. तत्रैव, (5.47.3)*

*37. तत्रैव, (5.1.1)*

*38. तत्रैव, (4.58.3), यजुर्वेदः, (17.91)*

*39. यजुर्वेदः, (31.22)*

*40. तदेव, (32.9)*

*41. अथर्ववेदः, (9.9.20)*

*42. ऋग्वेदः, (7.86.5)*

*43. तत्रैव, (2.12.9)*

*44. तत्रैव, अक्षसूक्तम् (10.34.3)*

*45. यथेदं भूम्या अधि तृणं वातो मथायति ।*

*एवा मथ्नामि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असिः ।।*

*सं वो मनांसि सं व्रता समाकूतीर्नमामसि ।*

*अमी ये विव्रता स्थन तान्वः सं नमयामसि ।*

*यत्सुपर्णा विवक्षवो अनमीवा विवक्षवः ।*

*तत्र मे गच्छताद्धवं शल्य इव कुल्मलं यथा ।।*

*यदन्तरं तब्दाह्यं यब्दाह्यं तदन्तरम् ।*

*कन्यानां विश्वरूपाणां मनो गृभायौषधे ।।*

*एयमगन्पतिकामा जनिकामोहमागमम् ।।*

*45. अथर्ववेदः, 2.30.1-5*

*46. तत्रैव, 5.12.5*

*47. इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम् ।*

*ततिः परि प्रजातेन हार्दिं ते शोचयामसि ।।*

*शोचयामसि ते हार्दिं शोचयामसि ते मनः ।।*

*वातं धूम इव सध्यैऽन् मामेवान्वेतु ते मनः ।। (अथर्ववेदः , 6. 89.1-2)*

*48. तत्रैव,(5.19.1-7; 8-15)*

*49. अथर्ववेदः (1.19.1)*

*50. तत्रैव, (1.29.1, 2.30.1, 3.25.1...)*

*51. तत्रैव, (V.I.16.3.4, II.24.3.4, VIII.3.2...)*

*52. तत्रैव, (V.11.4, V.20.1, XI.9.7.24,...)*

*53. तत्रैव, (II.2.1-5, VI.1.1-3, VI.19.1-3,...)*

*54. तत्रैव, (II.16.1-5, VII.9.1-4,...)*

*55. तत्रैव, (VII.33.1, VII.55.1....)*

*56. तत्रैव, 8.2.4.10*

**ग्रन्थपञ्जी**


- अथर्ववेद संहिता (सरल हिन्दी भावार्थ सहित) (भाग -1). 2002. श्रीराम शर्मा आचार्य (सम्पा.), हरिद्वार : ब्रह्मवर्चम् ।
- अथर्ववेद संहिता (सरल हिन्दी भावार्थ सहित) (भाग -2). 2002. श्रीराम शर्मा आचार्य (सम्पा.), हरिद्वार : ब्रह्मवर्चम् ।

- ऋग्वेदः, 2000. दिल्लीः चौखाम्बा संस्कृत प्रतिष्ठान, पुनर्मुद्रण।
- भरतः, नाट्यशास्त्र (काव्यमाला 82), (1983) (द्वितीय संस्करण). सम्पादकः पं. के दारनाथः, मुम्बई : निर्णयसागर प्रेस।
- मम्मटः, काव्यप्रकाशः (अलंकारसन्दर्भः ). (2009). झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वितः, बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन संशोधितः,दिल्ली : परिमल पब्लिकेशन्स।
- यास्कः, निरुक्तम् (अन्यानुवादमन्तव्य-दुर्गाचार्यणवृत्तिसहितम्). (1987). सम्पा. ब्र.मेधाचौतन्यः, कलिकाता : दक्षिणश्वररामकृष्णसंघः ।
- वामनः. काव्यालंकारसूत्रवृत्तिः (कामधेनुसहिता). (1927). सम्पादकः नारायणनाथकुलकर्णी. पूना : ओररयेण्टाल वुक एजेन्सी।
- भट्टाचार्य, विष्णुपद. (2004). प्राचीन भारतीय अलंकार शास्त्रेर भूमिका, कलकाता : संस्कृत बुक डिपो।
- वसु, योगीराज. (2018). वेदेर परिचय, कलकाता : फार्मा के.एल.एम. प्राइवेट लिमिटेड, द्वादश मुद्रण।
- Narang, Saroj, (2000). Figures of Speech in the Atharvaveda, New Delhi : Vidyanidhi Prakashan.

# 7

# वैदिकदर्शनं बौद्धदर्शनं च

*कमलेशः झा*

**नसन्नासन्न सदसन्न चाप्यनुभयात्मकम्।**
**चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः।।**

दर्शनप्रस्थानेषु प्रमाणसंख्यामतभेदः - प्रमेयसिद्धिः प्रमाणाद्धि इति नयेन सर्वैरेव दार्शनिकैः प्रमाण्यमङ्गीक्रियते। तत्त्वस्वरूपसंख्यादिविषये तु एषां विमतिर्भवति। तद्यथा-

1. प्रत्यक्षमेकमेव प्रमाणम् - इति चार्वाकाः।
2. प्रत्यक्षमनुमानं च द्वे प्रमाणे - इति बौद्धा आर्हताश्च।
3. प्रत्यक्षमनुमानमाप्तवचनानि त्रीणि प्रमाणानि - इति सांख्याः पातञ्जलाश्च।
4. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति नैयायिकाः।
5. प्रत्यक्षानुमानोपमानशब्दार्थापत्तयश्च पञ्च प्रमाणानीति प्राभाकराः।
6. प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुलब्धयश्चेति षट् प्रमाणानि कौमारिलाः।
7. सम्भवम् ऐतिह्यं चेति अष्टौ प्रमाणानि इति पौराणिकाः।
8. चेष्टासहितं प्रमाणनवकमिति तान्त्रिकाः।

तदैवं बौद्धनये सर्वप्रमेयव्यापि प्रमाणं द्विविधं स्वीक्रियते-

**प्रत्यक्षमनुमानं च प्रमाणं हि द्विलक्षणम्।**
**प्रमेयं तत्र सिद्धं हि न प्रमाणान्तरं भवेत्।।** इति।

अयमेव परमार्थ इति माध्यमिकाः -

शून्यवादिनः शून्यमेव आत्मतत्त्वमिति स्वीकुर्वन्ति सुषुप्तौ विज्ञानस्यापि

अदर्शनात्। न च तत्र विज्ञानप्रवाहः स्वीकार्यः तथा सति विषयावभासप्रसक्तेः। नहि ज्ञानं निर्विषयं कदापि भाति। यदुक्तम्- जाग्रतास्वप्नज्ञानानामेव सालम्बनत्वं न सौषुप्तिकज्ञानानामिति चेत् न। विशेषाभावात्। विमतं सालम्बनं प्रत्ययत्वात् संगतवत्। उत्थितस्य सौषुप्तविषयस्मृत्यभावनियमान्न स विषय इति चेत् तर्हि नियमेनास्मर्यमाणत्वादेव तच्च ज्ञानमपि मा भूत्। न च शून्ये विवदितव्यम्। यथा सविकल्पकः स्वविषयविपरीतनिर्विकल्पकजन्यस्तथा सत्प्रत्ययोऽपि स्व-विपरीतप्रत्ययजन्य इत्यभ्युपेयत्वात्। एवं चोत्थाने सति जायमानस्याहमस्मीति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वा-योगाच्छून्यमेव तत्त्वमिति।

शून्यवादिनः जगदुपादानं शून्यमिति अभ्युपगच्छन्ति। तथा च तन्मते अनुमानाकारः सम्पद्यते सर्वं कार्यमभावपुरःसरं योग्यत्वे सति अनुपलभ्य-मानपूर्वावस्थात्वाद् व्यतिरेकपरपरिकल्पितात्मवदिति। किन्तु नैतत् साधु, यतो हि घटस्य पूर्वावस्थाभूता मृत्प्रत्यक्षेणोपलभ्यत एवेति हेतोः असिद्धिदूषणग्रस्तत्वात्।

शून्यवादी ब्रूते - शून्यमेव संवृतिबलाद् रजतादिभ्रममुत्पादयति। यदिदमध्यासलक्षणमुच्यते - परत्र पूर्वदृष्टावभासोऽध्यास इति। नासौ पर-शब्देन सद्रूपाधिष्ठानमङ्गीकुरुते। केशोण्ड्रक-गन्धर्वनगरादिभ्रमस्य निरधिष्ठानस्य सर्ववादि-सम्मतत्वात्। न सर्प इत्याप्तवाक्यस्य बाधकस्य निरवधिकस्यापि सम्भवात्।

किन्तु विचारे सति शून्यवादिनामुक्तिः युक्तिं नानुसरति। अङ्गुल्या अपाङ्गावष्टम्भे सति वेष्टिता नेत्ररश्मय एव केशोण्ड्रकाधिष्ठानभूता भवन्ति। अथ चाकाश एव गन्धर्वनगराधिष्ठानभूतो भवतीति न कस्यापि भ्रमस्य निरधिष्ठानत्वं शक्यते वक्तुम्। यदि प्रतीतिमात्रं निरधिष्ठानमेव भ्रमो भवतीत्युच्यते तदा शून्यज्ञानमपि भ्रमकोटिप्रविष्टं स्यात्। तथात्वे च शून्यासिद्धिः स्यात्। ज्ञानज्ञेय-भ्रमयोरन्योन्याधिष्ठानत्वे अधिष्ठानस्य पूर्व-भावित्वेन अन्योन्याश्रयस्य दुर्वारत्वात्। अथोच्यते बीजाङ्कुरन्यायेन ज्ञानज्ञेयव्यक्तीनां परम्पराभ्युपगमेऽपि बीजाङ्कुर-प्रवाहानुगतमृद्वद् ज्ञान-ज्ञेयप्रवाहानुगतस्य स्थायिनः कस्यचिद् अभ्युपगन्तव्यत्वात्। तदनभ्युपगमे वा अदृष्टकल्पनायामन्धपरम्परापत्तेः। अतः साधूक्तम् - न सर्प इत्याप्तवाक्य-बाधस्यापि, किं तु रज्जुरित्येतत्पर्यन्तत्वेन सावधिकत्वात्। किमपि च नास्ति वृथा त्वं बिभेषीत्येवंरूपबाधेऽपि चेत्युक्तस्य पुरोदेशस्यैवावधित्वात्। जगत्

कारणमात्रस्यावधित्वात्। यत्रापि मायाविनिर्मितहस्त्यश्वरथादावन्यत्र वा निरधिष्ठानभ्रमं निरवधिकबाधं च शङ्कसे तत्रापि बाध्यम्। तद्बाधस्य साधकाभावात्। अन्यस्य च सर्वस्य जडत्वात्। न च शून्यस्याधिष्ठानत्वम्। अध्यस्यमानेष्वनुगम्यमानाभावात्। भावे वा भ्रान्तिकाले शून्यं रजतमिति प्रतीयाद् न त्विदं रजतमिति। इदमिति प्रतीयमानेव शून्यमिति चेत् तर्हि नाममात्रे विवादः। नापि शून्यस्यावधित्वं सर्वबाधे तदप्रतीतेः। प्रतीतौ वा चैतन्यमेव शून्यनाम्नाऽभिधीयते। इति।[1]

बौद्धनये योऽयं राद्धान्तः नैरात्म्यवादस्य, तस्य मूलम् उपनिषत्सु एव प्राप्यते।

**न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः।** इति।[2]

**अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः।**
**यत्कार्मिणो न प्रवेदयन्ति रागात् तेनाऽऽतुराः क्षीणलोकाश्च्यवन्ते।।** इति।[3]

**इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।**
**नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति।।** इति।[4]

**परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।।** इति।[5]

च श्रुत्या हिंसापराणां श्रौतकर्मणां न नित्यपुरुषार्थफलत्वं न वा अगर्हितत्वमिति साधु प्रतिपाद्यते।

अथ च - **हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।**
**तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः।।** इति।[6]
**न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।**
**ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः।।** इति।[7]

च श्रुत्या निर्गुण-निर्विकल्प ब्रह्मतत्त्वमुपनिषदि यत् प्रतिपाद्यते तदेव मुख्यं स्रोतः मध्यममार्गस्य नैरात्म्यवादस्य चेति।

एवं च औपनिषद आत्मवादः निर्गुणपारम्येण यद्वद् अद्वैतवेदान्त-दर्शने प्रथते तद्वद् नैरात्म्यसंज्ञया अनात्मसंज्ञया वा शून्याद्वैतदर्शने निरूप्यते।

उपक्रमोपसंहारादि-षड्विधतात्पर्यलिङ्गैः मायावादे ''सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सोम्येदमग्र आसीत्, यतो वा इमानि भूतानि जायन्ते। तस्माद् वा

एतस्माद् आत्मन आकाशः सम्भूतः तत्त्वमसि, अहं ब्रह्मास्मि, सर्वं खल्विदं ब्रह्म, अतोऽन्यदार्तम्, नेह नानास्ति किञ्चन'' इत्यादि श्रुतिप्रामाण्येन वेदान्तानाम् अद्वैते ब्रह्मणि तात्पर्यं निर्धार्यते। नित्यं निर्गुणं निर्विकारं स्वप्रकाशं शाश्वतं ब्रह्मैव परमार्थतस्तु विद्यते। तदेव अविद्याकाशबलं जगत्कारणत्वेनावकल्पते। एवञ्चैतन्मते दृश्यं जगत् प्रति ब्रह्म स्वप्रधानतया विवर्तकारणं भवति, स्वोपाधि-माया प्राधान्येन तु उपादानकारणं भवति। सेयं माया अज्ञानम्, अविद्या, प्रकृतिः, अजेत्येवमादिभिः शब्दैः तत्र तत्र व्यवह्रियते। यथाह भगवती श्रुतिः - मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। न, दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता[8] अविद्यायामन्तरे वर्तमानाः[9], अविद्यायां बहुधा वर्तमाना[10], एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सौम्य[11], अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते[12], त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयतीति।[13] तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया।[14]

एवञ्चाद्वैतब्रह्मवादे ब्रह्मैवैकं वस्तु आत्मपदवाच्यं परमार्थसद् विद्यते। तच्च नैरात्म्यशब्दार्थः वाङ्मनसातीतं न विद्यते।

सौगतमतेऽपि आत्मतत्त्वमनिर्वचनीयमेव स्वीक्रियते। तच्चाव्याकृतं विद्यते न त्वभावरूपम्। आत्मदीपा भवत आत्मशरणाः, नान्यादीपा नान्यशरणाः, आत्मानं गवेषयध्वम्, आत्मा हि आत्मनो नाथः, को हि नाथः परः स्यात्। ब्रह्मभूतेनात्मना इति च तथागतोक्तेः सुस्पष्टं प्रतीयते यद् इन्द्रियग्रामात् परः कश्चित् प्रत्यात्मवेद्योऽनिर्वचनीयस्वरूपः दुर्दर्शः, दुरवबोधः, बुधजनवेदनीयः आत्मा विद्यते इति।

अथ यद्येवं तर्हि निरात्मता अनात्मता वा शब्दः सौगते दर्शने कथम् आद्रियते। एतस्मिन् प्रश्ने जाग्रति एतत्समाधानं भवति।

भगवान् व्यासः ब्रह्मभूतस्य जीवस्य कृते निरात्मवान् इति पदं प्रयुङ्क्ते। तथाहि-

**अमृताच्चामृतं प्राप्तः शान्तीभूतो निरात्मवान्।**
**ब्रह्मभूतः स निर्द्वन्द्वः सुखी शान्तो निरामयः।।**[15]

अत्र निरात्मशब्दस्य कः अर्थः अभिप्रेतो भवितुमर्हति। दार्शनिकाः सर्वे अनात्मनि आत्मप्रत्ययं निवार्य आत्मनि आत्मप्रत्ययं द्रढयन्ति। एतदेव

आत्मानात्मविवेकशब्देन अभिधीयते। विशेषतः प्रत्यभिज्ञादार्शनिकास्तु स्वात्ममहेश्वर एव षट्त्रिंशत्-तत्त्वात्मक-विश्वस्वरूपः अथ च विश्वोत्तीर्णो अपि विद्यते इति अङ्गीकुर्वन्ति। मायाप्रभृतिकञ्चुकषट्कप्रभावात् एष स्वात्मैव महेश्वरः जीवरूपतां बद्धरूपतां संसाकितां च गच्छति। पाशितस्यास्य स्वाभाविक्यः पञ्च शक्तयः संकुचिताः भवन्ति। शिवस्य इमाः पञ्च शक्तयः सन्ति- (1) सर्वज्ञत्वं (2) सर्वकर्तृत्वं (3) नित्यत्वं (4) पूर्णत्वम् (5) व्यापकत्वञ्चेति। सर्वं जानामि, सर्वं करोमि, त्रयोऽपि कालाः नित्ये मयि भासन्ते, सर्वे देशाः मयि एव भासन्ते, अथ च नाऽहं रिक्तः अस्मि अपितु पूर्णोस्मि इत्येवं स्वाभाविकानामपि शक्तीनां मायापरिग्रहवशाद् जीवतां गतस्य मम इव भवतोऽपि क्वचिदेव (न तु सर्वत्र) देहेन्द्रियादौ अहन्ता-प्रतीतिर्जायते। सेयम् अहन्ता इदन्ता-पर्यवसायिनी मितमातृता भवति। शैवागमे क्षुद्राहन्ताशब्देन एषा उच्यते। यः श्रीगुरुशास्त्रकृपया।

यथाह आचार्यः- यदि स्वभावतो भावा भवेयुः प्रत्याख्यायापि हेतुप्रत्ययं भवेयुः, न चैव भवन्ति तस्मान्निः स्वभावः, निःस्वभावत्वाच्छून्या इत्यभिधीयन्ते इति। तदेवं यद् यत् सापेक्षं तस्य कोपि ध्रुवः स्वभावो नास्ति। एतदेवोच्यते तस्य निःस्वभावता सैव शास्त्रे ''शून्यता'' शब्देनाभिधीयते। इत्येषा कथा लोके सिद्धानां पदार्थानां विषये। अपरे पदार्थाः शास्त्रे प्रसिद्धाः सन्ति येषा समावेशः प्रमाणप्रमेय-वर्गयोः अभिप्रेयते। विचारे क्रियमाणे प्रमाणप्रमेयवर्गयोर्निपतितानां पदार्थनामपि निरपेक्षभावो नैव सिध्यति। यथा प्रमाणं साधनापरपर्यायभूतं स्वतः सिद्धं भवितुं नार्हति। साध्यं वस्तु येन साध्यते तत्किल साधनमित्युच्यते। तदेवं परमुखापेक्षं साधनं स्वतन्त्रं निरपेक्षं वा भवितुं नार्हति। साध्यं तु साधनेन विना नैव सिध्यतीति तदपि न स्वतन्त्रं निरपेक्षं वा भवितुमर्हति। यदुच्यते - ''प्रमेयसिद्धिः प्रमाणाद्धि'' इति।[26]

किञ्च यत्साधनसंज्ञां लभते तदेव साध्यसंज्ञामपि लभते। नेत्राभ्यां परस्परं पिबतोः प्रिययोः नेत्रेन्द्रिये ये भवतः तयोः युगपदेव साधनत्वं साध्यत्वं वा केनापि न शक्यते निषेद्धुम्। यथाह तत्र भगवान् वात्स्यायनः-''प्रत्यक्षादीनि प्रमाणानि उपलब्धिसाधनत्वात्, प्रमेयं चोपलब्धिविषयत्वात्। एवं बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्, उपलब्धिविषयत्वात् प्रमेयम् इति।[27]

**सापेक्षः किल प्रमाणप्रमेयभावः।** एतदुक्तम्भवति - स्वतो भिन्नेव प्रमाणेन सिद्धिं

प्राप्नुवत् प्रमेयं यथा सापेक्षम्भवति तथा स्वतोभिन्नेव प्रमेयेण स्वं नाम (प्रमाणम्) लभमानं प्रमाणपि सापेक्षमेव भवति। ततश्चं यथाव्यवहारं स्वीकृतस्य प्रमाणस्य प्रमेयस्य च या निःस्वभावता सैव ''शून्यताः'' इत्याख्यायते।

शून्यवादी पदार्थानां स्वातन्त्र्ये, निरपेक्षत्वे, स्थिरत्वे ध्रुवत्वे वा आग्रहविरही भवति। तदित्थं लोके व्यवहारेण प्रायेण ये पदार्थाः सस्वभावाः प्रतीयन्ते, तेषां निःस्वभावताप्रतिपादनं शून्यवादे युक्त्या विधीयते। यथोक्तम्-

(क) ''ये हि प्रतीत्यसमुत्पन्ना भावास्ते न सस्वभावां भवन्ति। यदि हि स्वभावतो भावा भवेयुः, प्रत्याख्यायापि हेतुप्रत्ययं भवेयुरिति।''[28]

(ख) ''न वयं व्यवहारसत्यं प्रत्याख्याय व्यवहारसत्यमनभ्युपगम्य कथयामः शून्याः सर्वभावा'' इति।[29]

(ग) ''अथ ते प्रमाणसिद्ध्या प्रमेयसिद्धिः, प्रमेयसिद्ध्या च।
भवति प्रमाणसिद्धिः, नास्त्युभयस्यापि ते सिद्धिः।।''[30] इति।

सर्वेष्वपि शास्त्रेषु अभ्युपगतानां तत्त्वानां विवेचनाय प्रवृत्तः शून्यताभिधानो नयः सापेक्षवादं मध्यमं मार्गं प्रथयति। अस्मिन्न्ये एतदभ्युपगम्यते यत् - लोकसिद्धानां शास्त्रसिद्धानां च पदार्थसार्थानां, जन्ममरणतया, संसार-निर्वाणतया वा तन्निरपेक्षं नास्ति किन्तु सापेक्षमेव विलसतीति। एतावता लोकस्य शास्त्रस्य च भेददृष्टिः दूरीक्रियते अथ च सापेक्षताप्रतिपादनमुखेन अभेदबुद्धिः दृढीक्रियते। उत्सार्यमाणायां भेदबुद्धौ सुप्रतिष्ठायां चाभेदबुद्धौ तत्त्वप्रकाशनं जायते।

मोक्षमात्रे तृष्णावतामाग्रहिणां तत्त्वचिन्तकानामपि लोकसुखं मितम्, मोक्षे सुखममितं कल्पयतां न वीतरागित्वमनुमन्यते शून्यवादः। यथोक्तम्-

**शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः।**
**येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे।। इति।**[31]
**निर्वास्याप्यनुपादानो निर्वाणं मे भविष्यति।**
**इति येषां ग्रहस्तेषाम् उपादानमहाग्रहः।। इति च।।**[32]

सर्वमिदमात्मशून्यमिति शून्यवादिनां माध्यमिकबौद्धानां पर्यन्तस्तु समेषां सौगतानां राद्धान्तः।

**वैभासिकमतम् -** तत्र यदिदं सर्वं वस्तु तद् द्विधा विभज्यते बाह्यम् अबाह्यं चेति।

बाह्यन्तावद् भूतभौतिकम्, अबाह्यन्तु चितचैत्तमित्यभिधीयते। उभयमपीदं बाह्याबाह्यम्, तत्त्वम्, तदीयं ज्ञानमपि तात्त्विकं विद्यते। सर्वमपीदं भूतभौतिकं चित्तचैत्तं च द्विधा प्रकान्तरेणापि विभज्यते। ज्ञानरूपं, ज्ञेयरूपं चेति। तत्र बाह्यं ज्ञेयं परमाणुपुञ्जमात्रं विद्यते। अत एवैषां संघातवादसिद्धान्त इत्याख्यायते। नात्र अवयवी अतिरिक्तः न्यायराद्धान्त इव स्वीक्रियते। भूतभौतिकचित्तचैत्तधर्मास्तु बहवो भवन्ति, परं तेषां पञ्च राशयो भवन्ति ये पञ्च स्कन्धा इत्युच्यन्ते। तत्र सर्वं भूतभौतिकं रूपस्कन्ध इत्युच्यते। चित्तं विज्ञानस्कन्ध इत्याख्यायते। चैत्तेषु सुखदुःखोपेक्षात्मका वेदना भवन्ति तत्समूहो वेदनास्कन्ध इत्यभिधीयते। विषयगत-दृश्यादृश्यलक्षणा ये बोधस्तत्समूहः संज्ञास्कन्ध इत्यभिधीयते। याश्च सर्वाश्चित्त-वृत्तयः जातिजरास्थित्यनित्यतादयश्च धर्मविशेषाः यद्यपि रूपचित्तचैत्तधर्मेषु कृताधिकारा भवन्ति तथापि तेभ्यः पृथगुच्यमानाः संस्कारस्कन्धशब्देनाख्ययन्ते। सर्वेऽप्येते धर्मा निरन्तरं प्रतीत्यसमुत्पादनियमेन प्रतिक्षणं परिवर्तनशीलाः सद्रूपाश्च भवन्ति। ततश्चायं व्यवहारोऽनुगतो भवति - अतीतं रूपम्। अनागतं रूपम्, प्रत्युत्पन्नरूपम् इति अतीतं चित्तम्, अनागतं।

# 8

# वेदकालीनभारतम्

*कैलाशनाथद्विवेदी*

वेदेषु विश्वविश्रुतभारतदेशस्य पुरातनसंस्कृतिः सम्यग्रूपेण प्रतिबिम्बिता परिलक्ष्यते। तत्कालीनभारतस्य सामाजिकधार्मिकार्थिक-राजनैतिकयौद्धिकादि-दशानां चारुचित्रणं वैदिकसाहित्ये प्राप्यते, येन वेदकालीनभारतस्य यथार्थदर्शनं कर्त्तुं शक्यते सुधीभिः स्वदेशप्रेमिभिः।

वेदकालीनभारतस्य भौगोलिकविस्तारः स्थलीयस्वरूपं वा मध्यदेशीया-समुद्रहिमवत्पर्वतपर्यन्तमासीत् यस्मिन् उत्तरवर्तिनो मूजवच्छर्यणावत् हिमवत्-प्रकृतिपर्वताः मध्यभागे त्रिधन्वनां योजना सिन्धुसरस्वतीसदृशसप्तसिन्धवो विशेष-रूपेण समुल्लेखनीयाः सन्तिः। यथा ऋग्वेदः वर्णयति -

**दिवः पृथिव्योरव आवृणीमहे मातॄन् सिन्धून् पर्वतान्छर्यणावतः।**
**यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।**

अष्टौ व्यख्यत् ककुभः पृथिव्यास्त्री धन्वयोजना सप्तसिन्धून्। इति। वेदकालीनभारतस्य परिश्चमोत्तरपर्वतीयभूभागे रसाक्रुमुकुभादिसहितः सिन्धुः प्रवहति स्म; अन्यत्र नानानदीनदेषु प्रमुखसप्तसिन्धूनां मनोहारिणी वर्णना प्राप्यते ऋग्वेदे। यथा -

**इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।**
**असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रुणुह्या सुषोमया।।**
**तृष्टामया प्रथमं यातवे सजूः सुसर्त्त्वा रसया श्वत्या त्या।**
**त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहल्वा सरथं याभिरीयसे।। इति**

वेदकालीनभारतस्य सीमासु समुद्राणामवस्थितिरपि सुनिश्चिता भवति। परावत् दर्वावत् सारस्वत-शर्यणावत्सदृशसमुद्राणामुल्लेखेन। एषु प्रथमद्वयोः

समुद्रयोः पूर्वापरयोः परावत् दर्वावतोरेव प्रधानताऽऽसीत् तत्कालीनजनजीवने। यथा-

''उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः। परावति अर्वावति समुद्रे। इति वेदकालीनभारते सदाहरितवनानामधिकताऽऽसीत्। वनेषु खदिरशिंशपाश्वत्थशमी-शाल्मलीविभीदकस्वधितिपर्णारटुवंशप्रभृतिवृक्षाः व्यल्कशोर्वारुसोमशादकाशोल-पवर्हिसैर्यसस क्षुम्पप्रभृतितृणलताः वेतसशीपालपुष्करप्रभृतिजलीयवनस्पतयः प्राचुर्येण प्रभवन्ति स्म। वानस्पतिकव्रततिसु सोमस्य प्राधान्यमासीत् वेदकालीन-भारते; यतोऽस्योपयोगः यज्ञेषु भवति स्म प्रमुखतया लोकप्रियपेयरूपे। ओजःस्फूर्तिबलवर्धकः सोमः सामान्यत ऋजीकमौञ्जवतपर्वतीयक्षेत्रे प्रादुर्बभूव प्राचुर्येण, किन्तु कालान्तरे वेदोत्तरकालीने भारते प्रतीयते सोमः दुर्लभ इवाभवत् यथा -

**सोमं मन्यते पपिवान्यत् संपिषांयोसधिम्।**
**सोम यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन।। (ऋक् 10।85।3)**

यद्यपि वेदकालीनभारते वनान्येव मानवाजीविकाया आधारभूतानि स्रोतांसि आसन्; येषु पशुपालनाखेटकाष्ठाद्युद्योगाः प्राधान्येन प्रचलन्ति स्म तथापि कृषिकार्येऽपि कर्मशीलार्याणामभिरुचिर्न्यूना नासीत्। वेदेषु ऋत्वनुसारियवब्रीहि-प्रभृतिधान्यानां वपनपरिपाकयोरुल्लेखो विद्यते। तत्कालीनभारते कृषिसम्बन्धि विविधक्रियाणामपि वर्णनं विद्यते वेदवाङ्मये। यथा -

**''कृषन्तः वपन्तः लुनन्तः मृणन्तः...।'' इति**

बहूद्योगिनो वैदिकार्या अर्णिकार्पासिकस्यूतव्युतवस्त्रैः पौष्टिकाशनपानेन ग्रीष्मशीतवर्षात्राणकारिगृहावासेन च रुक्मवक्षाः मणिग्रीवाः हिरण्यकर्णाश्च भूत्वा सुखेन जीवनं यापयामासुः।

वेदकालीनभारते यदुतुर्वशानुद्रुह्युपुरुत्तृत्सुप्रभृतिजनानां राजनैतिकप्रभुत्व-मासीत् फलतोऽधिकांशभूभागे एतेषामेव राज्यविस्तार आसीत्। असुरदानवदा-सदस्युपणिप्रभृतिकृष्णानार्यजनानामिव पश्चिमीसीमान्तप्रदेशीयाः पक्थमलानस् शिवालिन्विषाणिन्जना अपि आर्याणां राजनैतिकप्रतिस्पर्धिनः आसन्। परिणामत एतेषु मध्ये युद्धा अपि अभवन्। पारस्परिकसामाजिकराजनैतिकधार्मिकमतभेदैः आर्यानार्यदशराज्ञसदृशभयंकराणि युद्धान्युल्लेखनीयानि सन्ति, एषु प्राकृतिक-शक्तीनां प्रत्यक्षप्रभावः परिलक्ष्यते।

वेदकालीनभारते धर्मपरायणसमाजे विविधयज्ञानां विधिवत् सम्पादनं प्राकृतिकशक्तीनां समुपासनं सदाचारपालनञ्च प्रायः भवन्ति स्म। यत्र तत्र इन्द्राग्निप्रभृतिनिसर्गशक्तीनां प्रतीकरूपाया मूर्तिपूजाया अपि बीजमासीत्। जनजीवने यथा- क इमं दशभिः ममेन्द्रं क्रीणाति धेनुभिः । इति ।

वेदकालीनभारते सरस्वत्यादिनदीनां सुरम्यतटेषु भरद्वाजवसिष्ठ-विश्वामित्रवामदेवकण्वादिमुनीनां पावनाश्रमाः आसन्। एषु धर्मदर्शनकलाज्ञान-विज्ञानानां परां काष्ठां प्राप्य यज्ञियवैदिकसंस्कृतेः समुज्ज्वला सार्वभौमिकीसमृद्धि-रधिगतासीत्। भरद्वाजवसिष्ठयोः सैन्यविज्ञानप्रशिक्षणे, वामदेवस्य कृषिविज्ञाने, अत्रेर्ज्योतिषविज्ञाने अगस्त्यस्य वनस्पतिजीवविज्ञानयोः श्यावाश्वस्य भूगोलविज्ञाने च महदवदानं प्रतिभाति ।

वेदकालीनभारते परमप्रतापितृत्सूनां भरतानां वा या यज्ञियसंस्कृतिः-भारती प्रादुर्भूय सांस्कृतिकविजयञ्चाधिगत्ये अस्य राष्ट्रस्य नामकरण आधारवती बभूव अस्या भारतीयसंस्कृतेः संरक्षणं सम्प्रसारणञ्च मनीषिमुनिभिः मनस्विभिरार्यैः सततं न केवलं स्वदेशेऽपितु शतारित्रमयनौकाभिः समुदं तीर्त्वाऽन्यदेशेषु द्वीपान्तरेष्वपि परिभ्रम्य कृतं, यस्य संकेतः ऋग्वेदे विद्यते। यथा -
अनारम्भणे अग्रभणे समुद्रे शतारित्रां नावमातस्थिवांसम् ।

साम्प्रतमपि वेदकालीनभारतस्य संस्कृतेः-

पुरातनावशेषा ईरानेराकबेबीलोनियासीरियाहिन्देशियादिदेशेषु बाहुल्येन प्राप्यन्ते।[1] इति शम् ।

**सन्दर्भ :**

1. *द्रष्टव्यो लेखकस्य शोधग्रन्थः, ऋग्वैदिकभूगोल : साहित्यनिकेतनं, कर्णपुरम् 1985 ई. संस्करणम् ।*

# 9

# वैदिकी वर्णव्यवस्था

*राधावल्लभः त्रिपाठी*

कस्यापि समाजस्य सुव्यवस्थितसञ्चालनाय कर्मानुसारं योग्यतानुसारं च जनानां तेषु तेषु वर्गेषु विभाजनं नितरामावश्यकम्। प्रत्येकस्मिन् युगे निखिलस्यास्य जगतीतलस्य प्रत्येकस्मिन् देशे वर्णव्यवस्थाया वा तत्सदृश्या अन्यायाः कस्याश्चिद् व्यवस्थाया समायोजनं दृश्यते। तादृशीं व्यवस्थां विना जनाः स्वस्वधर्माच्युताः स्युः समाजे च दुर्व्यवस्था आविर्भवेत्। तथा चोक्तं श्रीमद्भगवद्गीतायाम्-

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। गीता. 18।45**

अथवा-

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः। गीता 3।35**

पुरा अस्माकं देशे विभिन्नसंस्कृतिपरायणा विभिन्नभाषाभाषिणश्च जना न्यवसन्। तेषामेकसूत्रतायै आर्यविचारकैर्या व्यवस्था प्रचालता सा वर्णव्यवस्था खलु।[1] अथ कीदृगासीद् वैदिकयुगे वर्णविधानमिति पर्यालोचनीयोऽयं प्रश्नः। वर्णव्यवस्थाया आविर्भावात् प्राग् भारतीयसमाजे द्वौ वर्गावभूताम्-आर्या आर्येतराश्च। आर्यसमाजे मुख्यतो मन्त्रद्रष्टार ऋषयः शस्त्रजीविनो योद्धारश्चासन्। आर्येतरसमाजे गन्धर्व-यश-राक्षस-दानव-पणि-दासादयो विभिन्नवर्गीया जना आसन्। आर्यीकरणस्य पश्चात् ते स्वस्वरुचेरनुकूलं योग्यतानुसारं वा ब्राह्मण-क्षत्रिय-वैयादि चतुर्षु वर्णेषु यथाक्रमं समाविष्टा अभूवन्। आर्येषु ये ब्रह्मवर्गीया अथवा ऋषिवर्गीया जना आसन् त एव संहितायुगे ब्राह्मणा बभूवुः। अस्याः सुदृढघटितव्यवस्थायाः प्रतिष्ठापका ब्रह्मसंस्कृतिपरायणा ब्रह्मचारिण आसन्।[2]

**वर्णपरिवर्त्तनम्**

वर्णव्यवस्थाया उदयकाले वर्णपरिवर्त्तनं हि सुकरमासीत्। शतपथब्राह्मणानुसारतो यदि कोऽप्यार्य आसुरीं वाचं प्रयुंक्ते स्म तर्हि सोऽसुरो वा म्लेच्छो वाऽविपरिवर्तितः।[3] याज्ञिको यस्य कस्यापि वर्णस्य भवेत् स ब्राह्मण एवाभिमतः, अयाज्ञिकश्च ब्राह्मणोऽपि शूद्रत्वं प्राप।[4] सूत्रसाहित्यानुसारं संस्कारविहीना द्विजाः पतितसावित्रीकाः, व्रात्याः, आर्यविगर्हिताश्चाभूवन्। प्रकरणेऽस्मिन् आपस्तम्बस्य मतमुल्लेखार्हम्। तद्यथा -

**धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ।**
**अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ।।**

वर्णपरिवर्त्तनस्य बहून्युदाहरणानि वैदिकसाहित्येऽवलोकयामो वयम्। ऋग्वेदे कस्यापि ऋषेरियमुक्तिः

**कुविन्मा गोपां करसे जनस्य**
**कुविद्राजानं मघवन् ऋजीषन्।**
**कुविन्म ऋषिं पपिवांसं सुतस्य**
**कुविन्मे वस्वो अमृतस्य शिक्षाः।।3.43 5 इति**

तात्कालिकवर्णपरिवर्त्तनस्वातन्त्र्यस्य परिचायिका। राजा जनको यदा याज्ञवल्क्याय ब्रह्मज्ञानमददात् तदा स ब्राह्मणोऽभूत्।[5] शान्तनुनृपतौ शासति यदा दुर्भिक्षोऽभवत् तदा तस्य भ्राता वृष्ट्यर्थं स्वपौरोहित्ये यज्ञमकारयत्।[6]

**वर्णानां स्थितिः**

वर्णव्यवस्थाया उदयादेव तत्र ब्राह्मणानां स्थानं सर्वोच्चमभवत्। ब्राह्मणानां त्यागार्जवब्रह्मबलादिगुणैः प्रभाविता इतरवर्णजना निसर्गत एव बद्धादरा बभूवुस्तान् प्रति। ब्राह्मणस्य महत्त्वं राज्ञोऽप्यधिकतरं सम्मतम्। ऋग्वेदे प्रोक्तम् - यस्य राज्ञोऽग्रे ब्रह्मा (विद्वान् ब्राह्मणः) प्रचलति स गृहे प्रसन्नो धनधान्यादिभिश्च सदैव समृद्धो भवति समस्ताः प्रकृतयस्तस्य वशानुगाः सञ्जायन्ते।[7] ब्राह्मणानां सत्कारो देवानामिवाभवत्। तद्यथा-'एते वै देवाः प्रत्यक्षं यद् ब्राह्मणाः।' (तै.सं. 1.7. 3.1) यावतीर्वै देवतास्ता सर्वा वेदविदि ब्राह्मणे वसन्ति।' (तैत्ति. आर. 2.15)

वस्तुता ब्राह्मण एव वैदिकयुगात् प्रभृति समाजस्योन्नायको नेता च बभूव। स आत्मसंयमेन त्यागेनैव चेदं पदं लब्धवान्। मनुः लिखति-

**उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात्।**
**सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः।।1.93**

क्षत्रियाणामपरं नाम वैदिककालादेव ‘राजन्य’ इत्यासीत्। स्वबाहुबलेन च राज्यस्य संस्थापना तत्र शासनसूत्रस्य सञ्चालनमित्येतत्तेषां कार्यक्षेत्रमभवत्। समाजे वैश्यशूद्रयोः संख्या सर्वाधिकासीत्। वैश्यानां कर्माणि कृषिगोपालनवाणिज्यादीनि आसन्, परिचर्यात्मककर्माणि शिल्पकलादीनां संवर्द्धनं च शूद्राणाम्। अतः वैश्यशूद्रौ समाजस्य पोषकौ सम्मतौ।[8] तथापि तौ समाजे न तथा श्रद्धास्पदं बभूवतुर्यथा ब्राह्मणक्षत्रियौ यतो हि कृषिवाणिज्यशिल्पादिकर्मसु तपसो वैदग्ध्यस्याथवा शौर्यविक्रमयोर्वापेक्षा नासीत्।

**वर्णानां सौमनस्यम्**

वैदिकयुगे चत्वारो वर्णा समाजस्य इव पुरुषस्याङ्गानि सम्मताः। अतः स्वाभाविकरूपेणैव ब्राह्मणक्षत्रियवैश्यशूद्रेषु परस्परं भ्रातृभाव आसीत्। वैदिकयुगे प्रारम्भत एव वैश्यशूद्रयोरासीत् स्थितिरवरेति वितथा खलु धारणा। वैदिकर्षयश्चतुर्णामेव वर्णानां समुन्नतिमकामयन्त-

**रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि।**
**रुचं वैश्येषु शूद्रेषु मयि धेहि रुचा रुचम्।। (यजु. 1848)**

ब्राह्मणक्षत्रियौ बन्धुभावेन वैश्यादीनपश्यतामिति वेदानामध्ययनेन जायते। तद्यथा -

**प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।**
**प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये।। (अथर्व. 19.62.1)**
**यथेमां वाचं कल्याणीमावदानि जनेभ्यः।**
**ब्रह्मराजन्याभ्यां शूद्राय चार्याय च।। (यजु. 26/2)**

प्रारम्भे याज्ञिककर्मकाण्डेषु मूलतः समेषामेव वर्णानां सहयोगोऽभवत्। तेषु समस्तवर्णानां कृते मनोरञ्जनमनोविनोदादीनां समायोजनं कृतम्।[9] वाजपेययागे आजिधावनस्य आयोजनम्[10], राजसूययज्ञे द्यूतक्रीडा[11] अश्वमेधयज्ञे द्यूतक्रीडा[12] अश्वमेधयज्ञे च पारिप्लवाख्योपाख्यानस्य व्यवस्था च तथ्यमिदं द्योतयन्ति यद् यज्ञेषु सर्वेषां वर्णानां सहयोगो रुचिश्चाभवताम्।[13] पारिप्लवाख्यो- पाख्यानमनेकदिनानि यावत् प्रचलति स्म। तस्मिन् मनोरंजककथानां समावेशोऽक्रियत या ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वेऽशृण्वन्। यज्ञस्यायोजनं समस्तजनतायै कृतमिति ऐतरेयब्राह्मणेऽप्युक्तम्-

**''यत्र क्व च यजमानवशो भवति कल्पत एव यज्ञोऽपि।**
**तस्यै जनतायै कल्पते यत्रैवं विद्वान् यजमानो वशी यजते।'' (ऐत. ब्रा. 3-13)**

## वर्णव्यस्थाया ह्रासः

अथ यथा यथा राजनीतिकस्थितयः परिवर्त्तितास्तथा तथा ब्राह्मण-क्षत्रिययोः प्रभुता समाजेऽवर्द्धत। शनैः शनैः यज्ञेषु डाम्बरिककृत्रिमताऽवर्द्धत।[14] बहुधनव्ययात्केवलं सम्पन्नजना एव यज्ञं कारयितुं समर्था अभूवन्। वैश्यशूद्रौ यज्ञस्याधिकारात् वञ्चितौ। राजनीतिकोत्कर्षेण ब्राह्मणक्षत्रिययोः स्वार्थपरताविर्भूता। क्षत्रिया नैतिकानैतिकसर्वविधकामनानां पूर्त्तये ब्राह्मणेभ्यो यज्ञानकारयन् ब्राह्मणाश्च वित्तलोभाद् यज्ञान् समपादयन्। ईदृशी स्थितिः वैदिकधाराया ह्रासायैव सञ्जाता।[15] धनलुब्धैर्ब्राह्मणैः स्थापना कृता-हतं यज्ञमदक्षिणमिति। शतपथब्राह्मणे प्रोक्तम्-

''ब्राह्मणो वैव राजन्यो वा वैश्यो वा। ते हि याज्ञियाः। न वै देवाः सर्वेणैव संवदन्ते। ब्राह्मणेन वैव राजन्येन वा वैश्येण वा। ते हि याज्ञियाः।''

(श.ब्रा. 3-1-1-9-10)

ब्राह्मणानामीदृशी सवार्थवृत्तिं प्रेक्ष्यैव कोऽपि वैदिकमनीषी कथयति भो इन्द्र! त्वं याज्ञिकविप्रवत् सालस्यो मा भूः-''मो षु ब्रह्मव तन्द्रयुर्भुवः।''

(ऋग्वेदे 8-92-30)

अथ तादृशोऽपि समायातः समयो यदा ब्राह्मणा मन्त्राणामर्थमविज्ञायैव यज्ञमकारयन्। 'अनर्थका हि मन्त्रा' इत्यभवत् तेषां धारणा।[16] ऐतरेय बाह्मणे कथं ब्राह्मणा लुण्ठाका इव यजमानस्य धनमपहरन्तीति निदर्शितम्-

''यथा ह वा इदं निषादा वा सेष्ठगा वा पापकृतो वा वित्तवन्तं पुरुषमख्ये गृहीत्वा कर्तमन्वस्य वित्तमादाय द्रवन्ति, एवमेव त ऋत्विजो यजमानं कर्तमन्वस्य वित्तमादाय द्रवन्ति यमनेवं विदो याजयन्ति।

(ऐत. ब्रा. 8-11)

आरम्भे यद् वैश्यशूद्रौ वेदाध्ययनाधिकाराद् वञ्चितौ तत्र तौ प्रति नासीत् दुर्भावना कारणमपितु वेदाध्ययनायापेक्षितापरिग्रहत्यागादिगुणानामभावं मत्वा तयोः समाजे सुव्यवस्थाया रक्षणायैव वेदाध्ययनान्निवारितौ तौ।[17] किन्तु परवर्त्तिवैदिकयुगे शूद्रेभ्यो जुगुप्सा दृश्यते। यदि कोऽपि शूद्रो वेदमशृणोत् तर्हि स कठोरदण्डभाक् बभूव-

"अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः।"

(गौतमधर्मसूत्राणि 2-3-4)

ईदृगवस्थायाः प्रतीकारस्वरूपमेव जैनबौद्धधर्मयोः समुदयो बभूव।

**संदर्भाः**


1. *प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका : डॉ. रामजी उपाध्यायः पृ.40*
2. *तत्रैव, पृ. 40*
3. *शतपथ ब्रा. 3 ।2 ।1 ।24*
4. *तत्रैव 3 ।4 ।2 ।17*
5. *शतपथ ब्रा. 11 ।6 ।2 ।10*
6. *ऋग्वेदे 10.98.5*
7. *तत्रैव 4.50.8*
8. *इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुतपूर्वयावा। (ऋग्वेदे 2.34.2)। स नैव व्यभवत् स शौद्रं वर्णमसृजत् पूषणमियं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किं च। (बृह. उप. 1.4.13)*
9. *भारतीय संस्कृति का विकास-डॉ. मङ्गलदेवः शास्त्री, पृ. 16*
10. *शत. ब्रा. 5-1-4*
11. *तत्रैव 5-4-4-23*
12. *तत्रैव 13-4-3*
13. *भारतीय संस्कृति का विकास, पृ. 165-166*
14. *तत्रैव पृ. 167*
15. *निरुक्ते 1-15*
16. *प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका, पृ. 81-82*

# 10

# ऋग्वेदव्याख्याया उद्भवो विकासश्च

*सिद्धनाथशुक्लः*

विश्ववाङ्मये ऋग्वेदः प्राचीनतम इति सर्वसम्मतमेव। तस्य रक्षणस्येतिहासो यावन्मात्रं कुतूहलं जनयति तावन्मात्रमेव तस्यार्थानुसन्धानप्रक्रियापि। प्रथमं तावद् वेदाङ्गेषु शिक्षाकल्पनिरुक्तादीनां व्यवहारोऽर्थावधारणविषये सहाय-रूपेण विद्यते। यद्यपि शिक्षाया महत्त्वमुच्चारणविधौ प्रथमं वर्तते, किन्तु तस्या महत्त्वमर्थज्ञानेऽपि नाल्पतरम्। वर्णानामुच्चारणं सस्वरपाठेन विशुद्धरीत्या भवितुमर्हति, अन्यथा तेषां समवेतशब्दानामर्थग्रहणे काठिन्यं सम्भवेत्। अतः शिक्षाया ज्ञानमावश्यकमेव। कल्पशास्त्रस्य महत्त्व याज्ञिकविषयेष्वेव दृश्यते, किन्तु सरहस्यं सकल्पं वेदाध्ययनं तत्राप्यपेक्षितम्। मन्त्राणां विनियोगद्वारार्थ-ग्रहणं क्वचित् सम्भवति। निरुक्तशास्त्रस्य ज्ञानमर्थनिर्धारणायावश्यकमेव। तेन विना शब्दानामुत्पत्तिः, तेषां मूलस्वरूपं च न ज्ञायेते। अतः शब्दानां मूल-स्वरूपस्य ज्ञानार्थं निरुक्तशास्त्रस्याध्ययनमावश्यकमेव प्रतीयते। तस्मात् कारणादेव ऋषिभिरनेक-शास्त्राणां रचना कृता।

मन्त्रव्याख्यायाः प्रथमोद्भवः संहितासाहित्ये प्रस्फुरितो भवति, किन्तु तत्र तस्या विकासोऽस्पष्ट एव। व्याख्यायाः प्रथमः प्रयत्नः पदपाठे परिलक्ष्यते, किन्तु तस्मादपि पूर्वं ब्राह्मणग्रन्थेषु व्याख्या परिचीयते। यद्यपि श्रुतिपरम्परया ऋषिभिरर्थव-बोधः कृतः कारितश्च, किन्तु तस्य कोऽपि प्रारम्भिकः संकेतो नावशिष्यते। ग्रन्थानां लोपवशात् परम्परायाः सरणिर्नो विस्पष्टा खलु।

**ब्राह्मणग्रन्थानां व्याख्यापद्धतिः**

संहिताकालस्य पश्चात् मन्त्राणामर्थः सामान्यजनानां दुर्बोधोऽभूत। अतो मन्त्राणामर्थज्ञानाय ऋषयः प्रयतितवन्तः। अर्थावगमाय प्रथमोपायः पदपाठ एव,

किन्तु पदपाठात् पूर्वमेव व्याख्यायाः सरणिः प्रवर्तिता ब्राह्मणग्रन्थेषु। तेषु विनियोगपरम्परया मन्त्राणां प्रयोगस्तथा तैषामंशरूपेण व्याख्यापि निष्पत्तीतिहा-साख्यानद्वारा दरीदृश्यते। यत्र यत्र मन्त्राणां विनियोगो वर्तते, तत्र तत्र तेषामर्थोऽपि स्पष्टः कृतोऽतो ब्राह्मणग्रन्थेषूपलब्धसामग्रीभिवै दिकमन्त्राणामर्थ निर्धारणे साहाय्यं प्राप्यते। तेषां प्रकीर्णसामग्रीषु शब्दनिरुक्तिपर्यायगुण-कल्पनादीनां प्राचुर्येण व्याख्यायामनेकरूपैः साहाय्य प्राप्यते। विनियुक्त। मन्त्राणमांशिकरूपेण या व्याख्या वर्तते सापि दुरूहमन्त्राणामर्थावगमे उपयोगिनी अधोलिखितोदाहरणैरिदं स्पष्टं भविष्यति।

**(क) निरुक्तयः**

(1) "आहूतयो वै नामैता यदाहुतय एताभिर्वैदेवान् यजमानो ह्वयति तदाहुतीनां आहुतित्वम्"[1]

(2) "चक्षुर्वै विचक्षणं विह्येनेन पश्यति"।[2]

(3) "वृत्तवी ह वा इदं सर्व वृत्वा शिश्ये। यदिदमन्तरेण द्यावापृथ्वी स यदिदं सर्वं वृत्वा शिश्ये तस्माद् वृत्रो नाम"।[3]

(4) "कश्वनाऽस्मिन् इदमिन्द्रियं प्रत्यस्थादिति तदिन्द्रस्येन्द्रत्वम्"।[4]

ईदृशीनां निरुक्तीनां बाहुल्यं सर्वेषु ब्राह्मणग्रन्थेषु प्रकीर्णरूपेणोपलभ्यते। उदाहरणस्वरूपेण ऐतरेयब्राह्मणे (ऐ.ब्रा.) 42 शब्दानां निर्वचनं प्राप्यते।

**(ख) पर्यायः**

शब्दानां पर्यायोऽपि बहुशः परिलक्ष्यतेः-

(1) "वाक् तु सरस्वती"।[5]

(2) "वाग्वै पावीजी"।[6]

(3) "वाग्वै रेवती"।[7]

(8) "अन्नादोऽग्निः"।[8]

ईदृशानामनेकाशब्दानां पर्याया ब्राह्मणेषूपलभ्यन्ते।

**(ग) गुणकल्पना भक्तिवादो वा**

ब्राह्मणग्रन्थेषु देवतानां गुणकल्पना बहुशो वर्तते। गुणकल्पनाया अपरं नाम भक्तिवादोऽस्ति। यास्केनोचितमेव निर्दिष्टम् "बहुभक्तिवादिनि ब्राह्मणानि भवन्ति"[9]। भक्तिवादी गुणकल्पनायाः पर्यायः, यथा दुर्गाचार्येण निरुक्त भाष्ये

निर्दिष्टम्- ''भक्तिर्नाम गुणकल्पनां, येन केनचिद् गुणेन ब्राह्मणं सर्वं सर्वथा वर्णयति, तत्र तत्तम् अन्वेष्यम्''[10]। यास्केन सोदाहरणं स्पष्टीक्रियते ''इयं पृथिवी वै वैश्वानरः, संवत्सरी वैश्वानरः''[11]। अनेन प्रकारेण पृथिवीवैश्वानरयोः साम्यं प्रदर्शितम्। अथवा पृथिवीवैश्वानरसंवत्सरेषु साम्यगुणभावेनैकरूपतया निदर्शिता। तेषां प्रथमभावो बहुविस्तारो वा समानगुणस्य कारणं प्रतीयते। ईदृशानां कथनानां प्राचुर्यं ब्राह्मणेषु बहुशो दृश्यते। उदाहरणाय निम्नलिखितांशाः प्रस्तूयन्तेः-

(1) ''यो वै रुद्रः सोऽग्निः''।[12]

(2) ''अग्निः सर्वा देवताः''।[13]

(3) ''यज्ञो वा आयुः''।[14]

ईदृशी गुणकल्पनां ब्राह्मणेषूपलब्धाया व्याख्यापद्धतेः स्वरूपदर्शिका।

**(घ) मन्त्रांशानां व्याख्या**

ब्राह्मणेषु यत्र तत्र मन्त्राणां व्याख्यापि आंशिकरूपेण वर्तते यथा पूर्वमेव निर्दिष्टम्। तथा हि-

(1) ''सर्वे नन्दन्ति यशसाऽगतेन (ऋ. 10-71-10) यशो वै सोमो राजा, सर्वो ह वा एतेन क्रीयमाणो न नन्दति यश्च यर्झ लक्ष्यमाणो भवति यश्च न इति''।[16]

(2) ''धृष्टिरसि'' (वा.सं. 1-17) स यदेनेनाग्निं धृष्णिवोपचरति तेन धृष्टिः''।[17]

(3) ''वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह (वा.सं. 2-16) इति। इयं वै वशा पृश्निः-यदि दमस्या मूलि चामूल चान्नाद्यं प्रतिष्ठितम्। तेनेयं वशा पृश्निः। इयं भूत्वा दिवं गच्छ इत्येवैतदाह ततो नो वृष्टिमावह-इति। वृष्टाद्वा अर्ग्रसः सुभूतं जायते, तस्मादाह- ततो नो वृष्टिमावह-इति''।[18]

उपर्युक्तोदाहरणैरिदं स्पष्टं प्रतीयते यद् ब्राह्मणकालादेव वैदिकमन्त्राणां व्याख्याशास्त्रस्य विकासः पर्याप्तमासीत्।

**निरुक्तानुसारं व्यख्यापद्धतयः-**

ब्राह्मणग्रन्थेभ्योऽनन्तरं व्याख्यासाहित्यदृशा निरुक्तस्य महत्त्वं वर्तते। पूर्वत एव दुरूहशब्दानां कोशो ''निघण्टुः'' इति विख्यातः। निरुक्ते निघण्टुशब्दानां

निष्पत्तिः, क्वचिन्मन्त्राणां व्याख्या तथा तेषु मन्त्रेषु मन्त्रांशेषु वा निहितानां शब्दानां निरुक्तिरपि निदर्शिता यास्केन।

यास्केन स्वनिरुक्ते पूर्ववर्तिनां षोडशनिरुक्तकाराणामुल्लेखः कृतः।[19] अतः पूर्वत एव निरुक्तशास्त्रस्य विकासं आसीत्। निरुक्तेन सार्धंमन्यनिघण्टूनां सम्भावनापि स्यात्, किन्तु तेषां निघण्टूनां कश्चिदवशेषो न प्राप्यते। तद्यथा निरुक्ते प्रदर्शिते कौत्समते वैदिकमन्त्राणामर्थावगमने सामान्यजना असमर्था आसन्[21]। अशक्तास्ते प्रोचुः-अर्थस्य न काप्यावश्यकता वर्तते। न तथा यास्कः। अर्थव्यपेक्षः स समर्थयति ''नैष स्थाणारपराधो यदेनमन्धो न पश्यति'' इति[22]। अन्यच्च स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत् सकल भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।[23] ''साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सम्प्रादुः''[24] इति च

यास्केन निरूक्ते पूर्वकालिकीनां व्याख्यायाः विभिन्नपद्धतीनां निर्देशः कृतस्ता एवंरूपाः-

**(1) अधिदैवतपद्धतिः**

एकस्मिन्नेव स्थले अस्य सम्प्रदायस्य, नामनिर्देशो विद्यते[25]। यत्र ऋग्वेदस्य चत्वारि वाक् परिमिता पदानि[26] इत्यंशस्य 'पशुषु तृणवेगुमृगेष्वात्मनि' इति रूपेण व्याख्यात्मप्रवादैः कृता। श्रीदुर्गाचार्येणात्मप्रवादानां स्पष्टीकरणमेवं कृतम्-आत्मानं ये प्रवदन्ति आचार्यास्ते आत्मप्रवादाः।[27]

**(2) अध्यात्मपद्धतिः**

निरुक्तेनेदं ज्ञायते यदनेन सम्प्रदायेन मन्त्राणां व्याख्या आध्यात्मिक-पद्धत्या कृता। उपर्युक्तस्य मन्त्रांशस्य 'कृतमानि चत्वारि पदानि' इत्यादेः व्याख्या आर्षैः 'ओंकारो महाव्याहृतयश्च' इति रूपेण कृता। अस्य सम्प्रदायस्याप्युल्लेखत एकस्मिनेव स्थले प्राप्यते।[25]

**(3) आख्यानसमयपद्धतिः**

वैदिकमन्त्रेष्वैतिहासिकप्रवृत्तीनामुल्लेखानां वान्वेषणद्वारा या व्याख्या कृता साख्यानसमयस्य सम्प्रदांयस्यैव पद्धतिरासीत्। तद्यथा निरुक्ते- ''तत्को वृत्रः? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः''।[28] आख्यानसमयस्य निर्देशोऽपि अनेन प्रकारेण कृतः[29]। उपर्युक्तोदाहरणेनेदं प्रतीयते यदैतिहासिकानां

व्याख्यापद्धतिर्नैरुक्तानां पद्धतेर्विरोधिन्यासीत्। नैरुक्तसम्प्रदायेन सर्वत्र वर्णितविषयाणां सम्बन्धः प्रकृत्या सह युज्यते, किन्तु आख्यानसमयेन देवासुराणां सम्बन्धः ऐतिहासिकाख्यानेष्वेवान्विष्यते।

केचन विद्वांस आख्यानसमयपद्धतेः, ऐतिहासिकपद्धतिं पृथक मन्यन्ते।[30]

**(4) नैदानाः**

नैदानसम्प्रदायस्योल्लेखः यास्केन द्विः कृतः। निदानानुसारं 'स्याल'-शब्दस्य निष्पत्तिः 'स्यालान् लाजान् वयति' (तम्भा द्धेतोः स्यालः) इति रूपेय कृता[31]। 'सोम'[32] शब्दस्य निष्पत्तिः ऋचं समं मने' इत्यनेन प्रकारेण च कृतेतिरीत्या नैरुक्तैः सह नैदानानां साम्यं प्रतीयते। किन्तु नैदानैः 'अर्थ एव प्रधानः इति सनिर्बन्धं कथितम्। तेषां मते शब्दस्य मूलार्थः, यो परिस्थितिवशात् परिवर्तनीयः, बलवत्तरो भवति।[33] शब्द निष्पत्तिरर्थवशादथवा प्रसङ्गवशात् परिवर्तनीया भवति, इत्येताद्दशं तेषां मतम्। सम्प्रदायोऽर्य भारतीयार्थविज्ञानक्षेत्रे *(Semantics)* प्रतिष्ठित आसीत्। डा. लक्ष्मणस्वरूपेण 'नैदान'-शब्दस्य व्याख्या *"They who are well-versed in primary causes"*[34] अथवा *"They who are well-versed in vedic metres"*[35] इति कृता। नैषा सुष्ठु प्रतीयते। *"Those who explain words with reference to their original sense"* इति सुसम्मता व्याख्या नैदानशब्दस्य प्रतिभाति।

**(5) पूर्वे याज्ञिकाः**

अस्य सम्प्रदायस्योल्लेखो द्विर्निरुक्ते विद्यते[37]। ''वैश्वानरमग्निम्' 'अथासावादित्यः' इति रूपेणानेन सम्प्रदायनेन प्रतिष्ठितम्। 'सर्वे मन्त्रा यज्ञविषय-सम्बन्धिनाः सन्ति' सिद्धान्तोऽयमस्य सम्प्रदायस्य विद्यते। अतस्तेषां मन्त्राणा-मर्थोऽपि यज्ञविषयिण्वा वार्तया सह अन्वेषयणीयो न तु प्रकारान्तरेण। दुर्गाचार्येण तेषां मतस्य स्पष्टीकरणमनेन प्रकारेण कृतम् पूर्वं इति विधिमन्त्रार्थवादेभ्यो यज्ञस-तत्त्वमुन्नीयैनं यज्ञ प्रयोगतः प्रथमं ते चक्रुः''[39]। अतः स्पष्टमेव यत् मन्त्रार्थविषये यज्ञविधीनां प्रयोग एव प्रमाणं तेषां मते, न तु वाह्यप्रमाणानामावश्यकता काचिदस्मिन् विषयेऽर्थज्ञानाय। अपरमपि ज्ञायते यत्तैः ब्राह्मणग्रन्थानां समुचित उपयोगः कृतोऽर्थविषये। निरुक्तनिर्दिष्टं कात्थक्यस्य मतं तत् समर्थयति। कात्थक्यस्योल्लेखः कृतस्तत्र तत्र याज्ञिकपरम्पराया निदर्शनं वर्तते[40]।

**(6) याज्ञिकाः**

व्याख्याकाराणामयं सम्प्रदायः याज्ञिकविषयाणां प्रसङ्गादर्थंनिर्धारणमकरोत्। यद्यपि पूर्वयाज्ञिकानामपि व्याख्या यज्ञविषयिण्येव वर्तते, किन्तु याज्ञिकानां व्याख्यापद्धतिः सविशेषं यज्ञविषयानुवर्तिनी। सर्वान् विनियुक्तमन्त्रान्यज्ञप्रणाल्या सह संयोज्य तेषां व्याख्याविधानमेव तैरुद्दिष्टम्। अनेनेद प्रतीयते यदुत्तरमीमांसायाः प्रर्वतनमनेन सम्प्रदायेनैवाभवत्। नैरुक्तानां पद्धतिं ते सुष्ठु न मन्यन्ते।[41]

**(7) परिब्राजकः**

परिब्राजकस्योल्लेखः सकृदेव कृतः यास्केन[42]। यथानाम ते परिब्राजकवर्गीया आसन्। 'नित्रंति' शब्दस्य निर्वचनप्रसङ्गे तेषां पद्धतेः स्पष्टमेव दर्शनं भवति। अस्य शब्दस्य 'बहुप्रजा कृच्छ्रमापद्यते' इति (बहुशः प्रजायमानः दुःखमाविशतीत्यर्थः) रूपेण तैरुपस्थापिता व्याख्या वर्तते, यत्र नैरुक्तानां मतमपि 'वर्षार्थकोऽयम्' इत्यनेन रूपेण यास्केन प्रदर्शितम्। व्याख्याक्षेत्रे परिब्राजकसम्प्रदायस्य महत्त्वं स्वल्पमेव।

**(8) वैयाकरणाः**

शब्दार्थज्ञाने व्याकरणस्य महत्त्वमन्यूनमेवं। यद्यपि व्याकरणस्य मूलविषयः शब्दस्वरूपज्ञानमेव, किन्तु मूलप्रकृतिज्ञानामन्तरेणार्थस्यापि प्रतीतिर्न भवति। तस्माद्धेतोः वैयाकरणानां महत्त्वं व्याख्यार्थं सविशेषमेव। व्याख्याकाराणां मध्ये वैयाकरणसम्प्रदायस्यापि चर्चा त्रिः यास्केन कृता[43]। यद्यपि मूलतो नैरुक्तवैयाकरणयीर्मध्ये कश्चिद्विरोधी न दृश्यते, यतो नाम न कोऽपि नैरुक्तोऽवैयाकरण आसीत्, यथा यास्केन ''नावैयाकरणाय निर्ब्रूयात्''[44] इति निर्देशः कृतः। यदन्तरं विद्यते तत् व्याख्यापद्धतौ वर्तते, न तु शब्दाज्ञार्थने। नैरुक्तसम्प्रदायेन निष्पत्तिं निर्वचन वा अधिकृत्य प्राधान्य दत्तम्, किन्तु वैयाकरणानां मते शब्दस्वरूपज्ञानमपि नितान्तावश्यकम्।

**(9) नैरुक्तसम्प्रदायः**

प्राचीनभारतीयव्याख्यापद्धतीनां मध्ये निरुक्तकाराणां कार्यं प्रकृष्टमेव वेदाङ्गेषु निरुक्तस्य महत्वमक्षुण्णमेव। यास्काचार्यविरचितं निरुक्तमेवाद्यवधि हस्तगतम्। अन्यग्रन्थानां लोपाद् व्याख्याया महती क्षतिरभूत्। निरुक्ते मन्त्राणां वर्ण्यविषय प्रकृत्या सह संयोज्यार्थनिर्धारणमुद्दिष्टम्। अस्य सम्प्रदायस्य प्रतिनिधिभूतो यास्काचार्यः राराजते।

**निरुक्तस्य व्याख्यापद्धतिः**

व्याख्यायाः पथि निघण्टुनिरुक्तयोः स्थानमुत्कृष्टमेव। एतयोः प्रभावः समस्तपरवर्ति व्याख्याकारेषु लक्ष्यते। यास्काचार्येण पूर्णरूपेणाथवांशिकरूपेण ऋग्वेदस्य 600 मंत्राणां व्याख्या कृता। गणनानुसारं तेन 1158 शब्दानां निरुक्तिरपि निष्पादिता[45]। किमिदं निरुक्तं नाम कश्च तत्र विशेषः पन्थाः। मन्त्रेषु प्रयुक्तानां शब्दानां क्रमसहितानुसारं व्यवस्थाप्य तेषामावश्यकतानुसारं पर्यायं संधायार्थ-निधारणं प्रथममुद्दिष्टम्। तथा हि-

(1) ''वृक्षस्य नु ते पुरुहूत वयाः'' (ऋ. 6.26.3) इति मत्रांशस्य व्याख्या ''वृक्षस्य इव ते पुरुहूत शाखाः'' इति रूपेण इव तथा 'शाखा' - इति शब्दद्वययोगेन स्पष्टीकृता[46]।

(2) यदा कदा शब्दानां क्रमे व्यतिक्रमोऽपि लक्ष्यते। तद्यथा- ''पर्याया इव त्वत् आश्विनम्'' इत्यंशस्य परिवर्तनम् ''आश्विनं च पर्यायः च'' इति रूपेण कृतम्[47]।

(3) निरुक्तस्य प्रथमेषु त्रिष्वध्यायेषु ''तस्योत्तरा भूयसे निर्वाचनाय'' इति (उत्तरा ऋक् अस्यैवार्थस्य ज्ञानप्रशंसाख्यस्य, भूयसे बहुतराय निर्वचनाय भविष्यति) कथनस्य प्रायेणावृत्तिर्लक्ष्यते, यत्र निर्वचनेन प्रस्तुतप्रकरणस्य पूर्णव्याख्यैवोद्दिष्टा। पूर्णव्याख्यायां शब्दक्रमः, तेषाम् स्थले पर्यायाणामध्याहारः, उपसर्गक्रिययोः संयोगः, पूरकपदानां बहिष्कारः-इत्यादयः सम्मिलिता। सायणभाष्ये ऋक्शब्दानां गद्यात्मकान्वितिस्तदनन्तरं व्याख्या वर्तते, किन्तु निरुक्तव्याख्यापद्धती तस्य सर्वथाभावो दृश्यते।

(4) यास्कस्य व्याख्यापद्धती निष्पत्तिरेव मुख्यमुद्देश्यम्। अर्थज्ञानं तु क्वचिदवरमेव।

(5) यास्कस्य व्याख्यायां सर्वत्र प्राकृतिकव्याख्यायाः *(Naturalistic Interpretation)* स्वरूपं लक्ष्यते।

ऋक्शब्दानामर्थः प्रकृत्या सह प्रसक्तः।

यास्कस्य निष्पत्तिर्व्याख्याया दिशि सहायरूपेण ग्रहणीया न परमार्थत इति-डा. लक्ष्मणस्वरूपेण निष्कृष्टम्-

*"He largely depends on his etymological considerations for the sense he assigns .................. The fact that he offers a choice of meaning shows that he had no earlier authority to gaide him and that his renderings are simply congectural, for no one can suffer that the authors of the hymns had more that one meaning in their minds.*

तत्समर्थितं डा. सिद्धेश्वरवर्मणा

*"Yaska was so much of an etymologist that his coraze for etymology overpowered, enslaved and crushed his imagination ........ It does not seem to have ocurred to him that the meaning of a word could be metaphorically extended. Even with a metaphorical meaning he felt the need of a separate etymology.*[47]

तथापि यास्कस्य स्थान व्याख्यादिशि सुप्रतिष्ठितमेव क्वचिदसम्मता अपि यास्कस्य निरुक्तयः प्रकाशस्तम्भा इव संराजन्ते।

**परवर्तिव्याख्याकाराः**

निरुक्तादनन्तरं बहुकालपर्यन्तं व्याख्यायाः क्षेत्रमनुर्वरमेव परिलक्ष्यते। किन्तु यास्काद् बहुकालादनन्तरं सायणात् प्राक् ऋग्वेदस्यानेकव्याख्याग्रन्था विरचिता।[48] षष्ठे शतके स्कन्दस्वामिन ऋग्वेदस्य प्रथमाष्टकपर्यन्त भाष्यमुपलभ्यते। अत्र व्याख्या अभिनवो विकासो दृश्यते[49]। अस्मिन् भाष्ये सूक्तानां भाष्यात् प्राक् तेषामृषदेवताछन्दसामुल्लेखः कृतः। ऋक्शब्दक्रमेणैव भाष्यक्रमोऽपि वर्तते। निरुक्तव्याकरणान्तः साक्ष्यादिसाधनेन मन्त्रार्थगाम्भीर्यस्य रहस्योद्घाटनार्थ प्रयत्नो विहितः। वेङ्कटमाधवेन स्वस्य ऋगर्थदीपिकायां त्रयाणामुल्लेखः कृतः। स्कन्दस्वामिना सह नारायणोद्गीथौ अपि व्याख्याकारौ समुल्लिखितौ वेङ्कटमाधवेन। तथाहि -

**स्कन्दस्वामीनारायण उद्गीथ इति ते क्रमात्।**
**चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम्।।।**[50]

अनेनोल्लेखेन स्पष्टमेव प्रतिभाति यत् नारायणः स्वभाष्यं स्कन्दस्वामिना सहैवारचयत्। किन्तु तस्य भाष्यस्य केवलं नामैवावशिष्यते। उद्गीथेन ऋग्वेदस्य दशममण्डलस्य भाष्य कृतम्। किन्तु उपलब्धभाष्ये केवलं पञ्चमसूक्तस्य चतुर्थ्याः

ऋचः प्रारभ्य चतुर्स्त्रिशत्सूक्तस्य द्वितीयर्क्पर्यन्तं भाष्य प्राप्यते। एषु सूक्तेषु मध्येऽपि क्वचिद् मंत्राणां भाष्यमनुपलब्धमेव वर्तते प्रकाशितग्रन्थे। स्कन्दस्वामिन उद्गीथस्य च भाष्यपद्धतिः समानैव वर्तते।

उद्गीथादनन्तरं माधवभट्टस्य नाम व्याख्याकारेषु विश्रुतम्। माधवेन ऋग्वेदस्य प्रथमाष्टकस्य व्याख्या कृता। स ग्रन्थ ऋग्वेदव्याख्या इति नाम्ना विख्यातः[51]। अस्मिन् ग्रन्थेऽपि व्याख्यापद्धतेः स्वरूपमुपरिवत् वर्तते। व्याख्यायां स्वरसंकेतः समनुध्यातः। प्रकरणनिमित्तमन्तःसाक्ष्यस्योपयोगो बहुशः कृतः। अनेकपूर्वाचार्याणां यास्क-शौनकप्रभृतीनां मतस्योल्लेखः कृतः। माधवस्य व्याख्यायाः पद्धतिः वेङ्कटमाधवसायणाभ्यां स्वीकृता[52]।

माधवभट्टादनन्तर माधववेंकटावर्य इति वेंकटमाधव इति वा नाम्ना विश्रुतस्य भाष्यकारस्य कृतिरनुत्तमैवा। तस्य 'ऋगर्थदीपिका' इति नाम्ना प्रसिद्धो व्याख्याग्रन्थः[53]। तेन मंत्राणां व्याख्या ऋक्शब्दक्रमेणातिसंक्षेपेण कृता। तेनास्योल्लेखः ''वर्जयन् शब्दविस्तारं शब्दैः कतिपर्यरिति''[54] कृतः। शब्दमात्रपर्यायेणार्थस्य स्पष्टीकरणं कृतम्। व्याकरणसम्बन्धितत्त्वानां न कश्चिदुपयोग कृतः, याज्ञिकपद्धतिमनु व्याख्यासमुत्तम्भिता। व्याख्यां स्वरज्ञानस्य वैशिष्ट्यं विचारितम्। 'ऋगर्थदीपिकायाः' सम्पादकानां डॉ. लक्ष्मणस्वरूपमहोदयानां मतेन-

*"The commentory of V.M. Veinkata Madhawa is a very brief in character ....................... He contents himself with paraphrasing the words of the original text. Almost every word of Vedic stanza is explained. If it is not explained, it is repeated in the commentary"*[55]

व्याख्याकाराणामस्यां कोटौ धानुष्कयज्वनी भाष्यं प्राप्यते, किन्तु आनन्दतीर्थस्य व्याख्या ऋग्वेदस्य चत्वारिंशत्सूक्तानामेव प्राप्यते। भाष्ये आध्यात्मिकपद्धतेरनुसरणं कृतम्। तस्य भाष्यस्य टीका जयतीर्थेन कृता सा प्राप्यते[56]। आनन्दतीर्थस्यापर नाम मध्याचार्य आसीत्। अपरो भाष्यकार आत्मानन्दः सुप्रथितः। तेन ऋग्वेदस्यास्यवामीयसूक्तस्य (ऋग्वेद 1.1.64) आध्यात्मिकंपद्धत्या टीका कृता[57]। भाष्यस्य शैली गाम्भीर्योपेता वर्तते। मुद्गलस्य वृत्तिः ऋग्वदेस्य 5.9.1-6-9-7 पर्यन्तमनुसरति[58]।

## सायणाचार्यस्तस्य व्याख्यापद्धतिश्च

वैदिकभाष्यकारेषु परवर्तियुगे सायणाचार्यः श्रेष्ठ एव। स चतुर्दशशतके प्रादुर्बभूव[59]। परम्परागतव्याख्याः पूर्णः विकासस्तेन समारब्धः। केवलं तस्यैव भाष्यं सम्पूर्णमृग्वेदमनुसरति। सायणेन पूर्ववर्तिनां व्याख्याकाराणां यास्कः माधवोद्गीथादीनामुययोगः कृतः। तस्य भाष्ये ब्रह्मणारण्यकशिक्षाकल्पनिरुक्तादीनां साहाय्य स्वमतस्य पुष्ट्यर्थं गृहीतम्। समस्त वेदार्थोपबृंहणात्मक साहित्यमनुशील्य तदनु वेदभाष्यं समाकलय्य विरचितं तेन। तस्य भाष्यस्य मुख्यवैशिष्ट्यं याज्ञिकपद्धतेरनुरोध एव।

ऋग्वेदस्य प्रथममण्डलस्य व्याख्यायां सायणस्य पूर्णप्रतिभाया विकासः प्रस्फुरति। तत्र शब्दानां मूलप्रकृतिव्युत्पत्ति-स्वाधातादीनां निर्देशेन मंत्राणां विस्तृतव्याख्या कृता। किन्तु अन्यमंडलानां व्याख्या संक्षिप्तरीत्यैव कृता। स्थाने स्थाने ब्राह्मणानामुदाहरणेन मंत्रार्थाः स्पष्टीकृताः निरुक्तस्यानुसरणमपि बहुशी दृश्यते। अन्तःसाक्ष्यादिमाध्यमेन व्याख्याया स्वरूपस्य विकास एव दृश्यते। वेदमंत्राणामर्थज्ञाने सायणभाष्यमेक सर्वोत्तम साधनमिति निश्चप्रचम्। तथापि सायणस्य व्याख्या गुणवती सत्यपि दोषेभ्यो मुक्ता नास्ति। न सर्वथा सोऽपि मूलार्थप्रतिपादने समर्थः। पाश्चात्त्यव्याख्याकारैस्तस्य गुणदोषदृष्टिः समाकिलता तथाहि एच.एच. विल्सनमहोदयः-

*"He (Satyan) undoubtedly had a knowldge of his text far beyond the pretentions of any European Scholar, and must have been in possession, either through his own learning or that of his assistants, of all the interpretations which has been perfetuated by traditional teaching from the earliest times."*[60]

मैक्सम्यूलरः- *(Max Muller)*

*"If we can now walk without Sayana, we aught to bear in mind that five and twenty years ago, we could not have made even our firs steps, we could never at least, have gained a firm footing without his (Sayana's) leading string........... let us not forget that we are standing on his shoulders."*

मैक्डानलः-

*"Sayana is something found to depart from Yaska, thus we arrive at the dilemma either the old interpreter is wrong or the latter one doesnot follow the tradition. One of the defects of Sayana is, in fact that he limits his view in most cases to the single verse he has before him."*[61]

अन्यच्च-

*It must indeed be admitted that from a large proporetion of Sayana's interpretations most material can be derived and that he has been of the greatest service in facilitating and accelarating the comprehension of the Veda.*

सायणादनन्तरं एकोनविशतिशताब्द्यामेव वेदव्याख्याकाराणां समुन्नतं कर्म परिदृश्यते।

**आधुनिकेतिहासिकव्याख्यापद्धतेर्विकासः**

पाश्चात्त्यविद्वद्भिः प्रवर्तिता ऐतिहासिकव्याख्यापद्धतिरितिनाम्ना *(Historical Method of Vedic Interpretation)* प्रसिद्धाभूत् इयं पद्धतिर्वैदिकविद्यानुशीलतस्योपक्रमे नवीनः पन्थाः। अस्य नूतनयुगस्य प्रवर्तयिता मनीषी रूडाल्फ रोड *(Roth)* महोदय (1821-1895 ई.) आसीत्। तेन बोहटलिंक-*(Bohtlink 30-5-1815-1904)* महोदयेन सह संस्कृतशब्दकोशस्य निर्माणं कृत तथा च वैदिकभाषानुशीलनपद्धति परिशोधयांचकार। तस्य समकालिकः मैक्सम्यूलरः (1823-1904) ऋग्वेदसम्पादनमनुवाद चाकरोत्। सः कतिपयांशानामृग्वेदस्य धर्मशास्त्राणाञ्च सम्पादनं तेषां तुलनात्मकाध्ययनञ्च सम्यक् कृतवान्। ऋग्वैदिककोशकारः हरमानग्यूण्टरग्रासमान महाभागः (1809-1877) चिरस्मरणीय एव स्वकृतिभिः-जर्मनभाषायां ऋग्वेदस्य पद्यात्मकानुवादः तेन कृतः। कार्ल एफ. गेल्डनरस्य (17.12.1852-1929) ऋग्वेदानुवादोऽनुतम एव। पिशेलमहोदयः (1856-1909) तस्यानुयायी समकालिक एवासीत्। एताभ्यां नैकमन्त्राणां शब्दानां वा विस्तृतव्याख्या कृता। जर्मनव्याख्या-कारेषु ए. लुड्विग (9.10.1832-1911) महोदयस्य व्याख्यापुरस्सर ऋग्वेदानुवाद उच्चकोटिक एव। हरमानओल्डेनबर्गमहोदयस्यापि कृतित्वं तत्राग्रेसरत्वं प्रकटयति।

ब्लूमफील्डलैनमान-हिटनी (9.2.1827-7.6.1814)-कीथदीनां मनीषिणामपि ऋग्वेदव्याख्याविषयकं कार्यं न न्यूनं महत्त्वमर्हति।

आंग्लभाषायामनुवादकर्तृणां मध्ये एच.एच. विल्सन, आर.टी.एच. ग्रिफिथ (25-5-1826-1906) मैक्डानेल (11-5-1854-1) पिटर्सन प्रभृतीनां विदुषां कृतित्व साधु प्रमाणितम्। फ्रेंचभाषायामनुवादकर्तृषु श्री बर्गेन्यमहोदय आजीवनं ऋग्वेदस्य सम्य- गध्ययनं विधाय स्वकीयमनन्यसाधारणं समालोचन प्रकाशितवान्। एतेषां द्वौ ग्रन्थौ तद्विषयमधिकृत्य सुप्रथितौ[62]। अधुनातनानां लुई रनू महोदयः (28.10.1866-1947) सर्वोच्चः। तेन पाणिनिव्याकरणमवलम्ब्य ऋग्वेदस्य समालोचनात्मक- व्याख्या कृता। चतुर्दशभागेषु तेषां वेदव्याख्याग्रन्थस्य महती प्रतिष्ठा वर्तते।

अन्ये च पाश्चात्यव्याख्यातार पालथीम-यान खोंद (14.4.1905) इत्यादयः सन्ति।

भारतीय व्याख्याकारेषु स्वर्गीयः प्रा. हरिदामोदरवेलणकर महोदयस्य नाम विश्रुतमेव। तेन महाभागेन ऋग्वेदस्यैन्द्राग्निसूक्तानामनुवाद आंग्लभाषायां कृतस्तथा च ऋग्वेदस्य द्वितीय-तृतीय-सप्तममण्डलानां पूर्णरूपेणानुवादः कृतः, प्रकाशितश्च। तस्य समकालिक एव स्व. प्रा. एस.एस. भावेमहोदयः सोमसूक्ताना-मनुवादं साधु सम्पादितवान्। स तत्र पाणिनीयव्याकरणसापेक्षं व्याख्यानं प्रवर्तितवान्। तस्य स्वयोजनाबद्धकार्यं समापयितु स मृत्युना न विरहित इति कष्टमेव। तस्य सोमसूक्तानामनुवादः (प्रथमसूक्तादारभ्य सप्ततिसूक्तपर्यन्तम्) प्रकाशित एव। अग्रेवर्तिनां सूक्तानमनुवादोऽप्रकाशित एव वर्तते तस्य शिष्यपरम्परा गुरुकार्यं पुण्यपत्तनाधिवासिभिर्वेदविद्यागवेषकैरधुना क्रियते।

**दयानन्दस्य व्याख्यापद्धतिः**

पाश्चात्यविद्वद्भिः सह भारतीयविदुषामपि वेदतत्त्वज्ञानान्वेषणात्मिका वुद्धिरजायत। भारतीयदर्शनपरम्पराया अक्षुण्णप्रभाववशेनाथवा नवीनव्याख्या-पद्धतेः सर्जनाय ऊनविंशशतके श्रीमद्दयानन्दसरस्वतीमहोदयस्य महानुत्साहोऽ-भवत्। तेन प्रमाणितं यद् वैदिकमंत्रेषु प्रयुक्तशब्दानामर्थः योगरूढः यौगिको वास्ति। नामभेदेनैव वैदिकदेवतानां बाहुल्य प्रतीयते। अन्यथेन्द्राग्निवरुणमरुन्मित्रादीनां देवतानां वास्तविकस्वरूप केवल परमात्मपरमेव, तद्यथा निरुक्तौ सम्मतम्-

''महाभागात् देवताया एक आत्मा बहुधा स्तूयते, एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति''[63]। ऋग्वेदेऽपि एकं सद् विप्रा बहुधा वदन्ति इति[64]।

दयानन्देनाध्यात्मिकपक्षमवलम्ब्य ऋग्वेदस्य प्रथममण्डलादारम्य सप्तममण्डलपर्यन्तं भाष्यं यजुर्वेदभाष्यञ्च लिखितम्। अरविन्दस्य व्याख्यापद्धति 'रहस्यात्मिकी' इति *(Esoteric or Mystic Interpretation)* नाम्नाभिहितास्ति। तस्याग्नि सूक्तानामनुवादो वेदरहस्यञ्च तस्य व्याख्यापद्धति परिचाययतः। वेदमंत्रेषु रहस्यात्मकभावनानामन्वेषणं तथा देवतासु मानसिकतत्वानां प्रस्फुटनमेव तेन प्रदर्शितम्। सूर्यो मनस्तत्त्वस्याग्निरिच्छातत्त्वस्य, सोमो भावनातत्त्वस्य प्रतीकरूपेण मन्त्रेषु वर्णिताः। अरविन्दभाष्यमनु श्रीकपालिशास्त्रिमहोदयेन 'सिद्धाञ्जनभाष्यं' विरचितम्[65]। तेन ऋग्वेदस्य प्रथमाष्टतपर्यन्तं भाष्यं कृतम्। अस्यां परम्परायामेव पं. मधुसूदन ओझा[66] पं. मोतीलाल शर्मा[67] डॉ. वासुदेवशरणाग्रवालमहोदयानामपि भाष्याणि सन्ति। डा. अग्रवालमहोदयस्य नवीनग्रन्थद्वय *'Spark from the Vedic Fire,*[68] तथाच *'Vision into Darkness'*[69] (सहस्राक्षरा वाक्) प्रकाशितमेव। एभ्यो भाष्यकारेभ्योऽतिरिक्तं बहवोऽनूदितग्रन्थाः विभिन्नभारतीयभाषासु विद्यन्ते।

ऋग्वेदभाष्याणां तुलनात्मकाध्ययनेनेदं प्रतीयते यत् सर्वेषां भाष्यकाराणां मतेषु अर्थवैभिन्यं वर्तते। तथा च प्रत्येकमन्त्राणामर्थनिर्धारिणे किञ्चिदन्तरं दृश्यते। ऋग्वेदस्य प्रत्येकमन्त्रोऽर्थसमस्यामुत्पादयति। मन्त्रेषु प्रायः शब्दानामर्थः स्पष्टो नास्ति, अतोऽद्यापि शब्दानामर्थानुसन्धानस्यावश्यकता वर्तते।

**संदर्भ :**


1. *ऐतरेम ब्राह्मण 1-2,।*
2. *तत्रैव 1.6।*
3. *ए.ब्रा. 3.1,।*
4. *तैत्तिरीय ब्रा. 2.2-10-63।*
5. *ए.ब्रा. 3.1,।*
6. *तत्रैव 3.37,।*
7. *शत. ब्रा. 3-8-1.12।*
8. *तत्रैव 3.1.4.28।*

*9. निक्तम् 7.4*

*10. निरु. भा. 7.4*

*11. निरु. 7.4*

*12. शत. ब्रा. 5-2-4.13।*

*13. ऐ.ब्रा. 2.3, तै.ब्रा. 1.4.4.10*

*14. ताण्डव ब्रा. 6.4.4*

*16. शत. ब्रा. 1-5-2.3*

*17. तत्रैव 1.8-3.15*

*18. तत्रैव 1.8.3.15*

*19. आग्रायण-कौत्स-गाग्यदियः।*

*21. निरु. 9.15*

*22. तत्रैव 1.16*

*23. निरु. 1.18*

*24. तत्रैव 1.20*

*25. तत्रैव 13.9*

*26. ऋग्वेद 1.164.45*

*27. निरु. भाष्य 13.9*

*28. निरु. 2.16*

*29. तत्रैव 7.7, 12.1.10*

*30. चमूपति-यास्कपुग, पृ. 11*

*31. निरु. 6.9*

*32. तत्रैव 7.12*

*33. Dr. S.K. Gupta-'Ancient schools of Vedic Interpretation in journal of Ganganatha Jha Res., Vol-xv, Pt, 1, P. 14-8*

*34. Nighantu Nirukta (Trans. 6.9) University of Panjab 1927*

*35. Of cit. 7.92*

*36. Dr. S.K. Gupta of cit P. 14*

*37. निरु. 7.23*

38. ऋग्वेद 1.5.9.6

39. निरु. भाष्यम् 7.27

40. निरु. 8.5., 6., 17, 9.41, 42

41. तत्रैव 5.2, 7.4, 11, 29, 31, 42, 43

42. 2.8

43. निरुक्त 1.12, 9.5, 13.9

44. निरु. 2.3

45. Dr. Siddheshver Verma-Etymologies of Yaska P. 16, V.V.R.1.

46. निरु. 1.4

47. निरु. 1.9

48. V.K. Rajvade-Yaskas Ninukta-Introduction. P. P. 24, 25, Bhandarkar Oriental Research Institute Poona 1940

49. Prepace to the Rigartha Dipika of V.M. Vol. L. P. 40.

50. Ety. of Yaska P. 8

51. B.S. Bhattacharya-Vedic Interpretations & Tradition P. 11

52. G.N. Jha Common Vol. 1837, P. 420.

53. ऋग्वेद, 7 मो भागः, पृ. 36, 59, होशियारपुरम् (1965)

54. श्री सी. कुञ्जन् राजा महोदयेन सम्पादितः, अड्यार पुस्तकालयः 1939

55. भाष्यकाराणां कालक्रमज्ञानाय अखिलभारतीयप्राच्यविद्यासम्मेलनस्य पञ्चमाधिवेशनस्य ग्रन्थे (प्रथमभागे) सी. के. राजा महोदयस्य लेखः-पृ. 223-262 द्रष्टव्यः।

56. डा. लक्ष्मणस्वरूपेण सम्पादितः, मोतीलाल बनारसीदास, लाहौर, 2939.

57. ऋगर्थदीपिका-प्र. भा.

58. ऋगर्थ दी.-प्राक्कथनं, भा. 1, पृ. 40, 41

59. पं. बलदेव उपाध्यायः-आचार्य सायण और माधव, पृ. 161

60. सी. के. राजा महोदयेन सम्पादितः, गनेश एण्ड कं. मद्रास, 1956

61. आचार्यविश्वबन्धुना सम्पादितः ऋग्वेदस्य 'क्रिटिरकल एडीशन' होशियारपुर 1964

*62. ‘कैटलोगस कैटलागोरम’ (बृहत्सूचिका) ................................ पृ. 611*

*63. Rigveda Translation Vol. 1, Introduction P. 46*

*64. Preface to RV. Edition Vol. I, P. 9-10*

*65. Ancient History of Sanskrit Literature, P. 62*

*(i) Quarante Hymnes Du Rigveda (iii) La Religion Vedique 3 vols Paris Rezointed 1963. निरुक्त 7-8*

*66. ऋ. 1.164.16*

*67. ऋग्वेद संहिता-भाष्यम् (सिद्धाञ्जनभाष्यम्) पाण्डिचेरी, 1950*

*ब्रह्मसिद्धाध्तः शतब्राह्मणरूप हिन्दीभाषानुवादः*

*68. वाराणस्यां प्रकाशितः, 1962*

*69. वाराणसी, 1963*

सूचना :- 82-91-क्रमांकीयाः पादटिप्पण्यः क्रमेण 66-73 इति मूले संशोध्य वाच्या

# 11

# ऋग्वेदे पितृस्वरूपम्

*दत्तात्रेयबालकृष्णः क्षीरसागरः*

लौकिके व्यवहारे पितर इति शब्देन मृतपूर्वजाः गम्यन्ते ये हि महाभारते देवतासमूहरूपेण कल्पिताः। ते मनुष्यजातीनां निर्मातरः मनुष्यजातीरुत्पाद्य संरक्षितवन्तः। स्मृतिकारो मनुस्तु-

**ऋषिभ्यः पितरो जाता पितृभ्यो देवदानवाः।**

**देवेभ्यस्तु जगत्सर्वं चरं स्थाणवनुपूर्वशः।।**

इत्यादिना ऋषिभ्यः पितृणां तेभ्यश्च देवमनुष्यानामुत्पत्ति कथयति। वर्णव्यवस्थायाः प्रभावः पितृष्वपि दृश्यते तथा च मनुस्मृतो तत्तद्वर्णानुसारिणां तत्तत्पितृणामुल्लेखः प्राप्तः। नन्दिपुराणस्तु चतुर्णां पितृणां नामान्यभिधत्ते परन्तु महाभारतस्कन्दमार्कण्डेयपुराणानि विभिन्नसंख्याकान्पितृगणान् तेषां शोकमुक्तत्वञ्चोललिखन्ति।

ऋग्वेदे मनुष्यदेवयोः पितृणां तेषां मार्गाणां च भिन्नत्वं स्पष्टतया संकेतितम्। वैराजाग्निष्वात्तबर्हिषदस्तु दैविगणाः हविष्मत्सुस्वाधाज्यपसोमपाः मनुष्य पितरः। शतपथब्राह्मणे तु वसन्तग्रीष्मवषर्तूनां सम्बन्धः देवैः, शेषस्य तु पितृभिः प्रतिपादितः। तत्रैव देवयानपितृयाणयोः प्रारम्भ वसन्तशरत्वंसंक्रान्तिभ्यामिति परिलक्ष्यते। तिलकमहोदयास्तु उत्तरदक्षिणायनयोः सम्बन्धं देवपितृभ्यां सह स्थापयन्ति।

अस्माकं धर्मे पितृभ्यः यज्ञादयः क्रियन्ते श्राद्धपक्षदीनि चानुष्ठीयन्ते समादरेण। तैत्तिरीये ब्राह्मणे येऽअयज्वानस्तेऽग्निष्वात्ताः ये च यज्वानस्ते वर्हिषदः पितरः इति तयोर्भेदस्पष्टः। 'ऋतवः पितरः', यच्च सुप्त तत्पितृत्वं यच्च जागरितं तन्मनुष्यत्वम्, सोमः पितृलोकः तस्य द्वाराणि तु पूर्वपश्चिम दिशौ, तृतीये लोके पितरो वसन्ति।

यमस्याधीनत्वे वसन्तः तेन सदैव यज्ञगृहमागच्छन्ति पितरः मृतात्मानं प्रति उच्यते तेनैव मार्गेण प्रयाहि येनास्माकं पूर्व पितरः परेयुः। गम्यतेऽत्र मरणात् पश्चात् पापविमुक्ताः मनुष्याः देवत्त्वमाप्नुवन्ति। कदाचित्तस्मादेव तेषामुल्लेखः देवत्वेन क्रियते। पितृभ्यः दीयमानः हविः स्वधेत्युच्यते तस्य वाहकोऽग्निः। कर्मणैव पितृलोकः जेतव्यः।

ऋग्वेदस्य दशममण्डले चतुर्दशमारभ्य षोडशान्तानि यानि त्रीणि सूक्तानि तानि पितृसूक्तानीत्यभिधीयन्ते। धार्मिकया दृष्ट्या च तानि मृत्योः पश्चात् क्रियमाणानां क्रियाणां सम्बन्धीनि सूक्तान्येतानि विहाय ऋग्वेदे पितृणां चर्चा नैरन्तर्येण क्रियते। अथर्वाङ्गिरसभृगवश्च पितरः। त एव पूर्व्याः सप्तर्षयः मनुष्यानुत्पादितवन्तः। एते एव नव दश वा प्रतीयन्ते तस्मात् नवग्वदशग्वेत्युच्यन्ते। यज्ञगृहमागत्य तैः क्रियमाणत्वात्सोमपानात्सोभ्यासः इत्यभिधानं प्राप्तम्। देवैर्यो यज्ञः कृतः तस्मादेव ऋषयः पितरश्च जाताः तथाऽङ्गिरसः पितरः तद्यज्ञपटं वयन्ति। तपस्यां कुर्वन्तः पितरः ऋग्वेदे ऋतसम्बधिनः तत्र मन्त्रः-

**ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः**

**पितॄन् तपस्वतो यम ताँश्चिदेवापि गच्छतात।**

ऋतशब्दः विकृतेर्द्योतकः तेभ्य एव सृष्टेः जातत्वादयं सम्बन्धः उचित एव। अपि च तेषु द्योतनकारि तत्त्वमपि लक्ष्यते यत्ते नक्षत्रैः रात्रिं प्रकाशयन्तः 'रात्रिः पितरः' एतेन शतपथब्राह्मणे स्मर्यन्ते। एतेषां प्रकाशत्वं ऋग्वेदादेव स्पष्टम्-

**येना नः पूर्वे पितरः पदज्ञा अर्चन्तो,**

**अङ्गिरसो गा अविन्दन्।**

अतः गोधनप्राप्तौ इन्द्रसहायाः आङ्गिरसाः सफलतामाप्नुवन, उषसंप्राकाशयन् आपश्चासृजन्। वृत्रहनने आङ्गिरसाः इन्द्रस्य सहायका अभवन् तेषां पुत्राश्च ऋभवः ये च अश्विन्योः रथं कर्षन्ति। पितृणां स्रष्टृष्टत्वादिन्द्रः पितृतमः। अङ्गिरस्स्तुतः इन्द्रः तेषां धनप्राप्तौ सहायकर्ता। सत्यमंत्राः कवयः मंत्रद्रष्टारः ये चाग्रे तमोच्छादितं गूढं ज्योतिरविन्दन्। तैः स्वर्विद्भिः पितृभिः द्युलोकः प्रकाशितः पणीनां घातश्च कृतः। अतः अङ्गिरसानां ऋषित्वं पितृत्वं च स्पष्टम्।

उपर्युद्धृतसन्दर्भानामालोचनात् तेषां मनुष्येतरत्वं प्रतीयते। ऋग्वेदस्य ऋषयः कयाचिदन्यया दृष्टया एतान्द्रष्टुमिच्छन्ति तदर्थं तानिन्द्राग्न्युषस्वृहस्पतियमा इत्येतैः सहभावं प्राप्तान्मन्यन्ते। स्पष्टमेवाङ्गिरसानां प्रकाशत्वं प्रकाशोत्पादकत्वञ्च।

तेषा नित्यसम्बन्धः गोतत्त्वेन सह प्रतिपादितः। गोतत्त्वं प्रकाशमयं सूर्यकिरणरूपमतः तस्य गमनत्वे प्रसरणे न काऽपि शङ्का कार्या। गुहाहितानां गवामङ्गिरसाः एव प्राप्तिकर्माणः। इन्द्रबृहस्पत्यग्निषु अङ्गिरस्तत्त्वं समाविष्टम्। आङ्गिरसः स्वयमेव अग्निपुत्राः। कदाचित्सम्बन्धममु दृष्टवैव ऋग्वेदे देवेषु प्रकाशत्वं ज्ञानतत्वमङ्गिरसामेव कथ्यन्ते यथा-

'महिम्न एषां पितरश्च नेशिरे देवा देवेष्वदधुरपि क्रतुम्।' अन्यच्च अग्निरेव अङ्गिरसानां पिता तस्मात् प्रथमोऽङ्गिरेति कथ्यते। ऋग्वेदोऽग्निं 'सहसः पुत्रः' 'ऊर्जस्यापत्यमिति' वर्णयति। अग्नौ शक्त्युत्साहौ द्वे तत्त्वे वर्तते। अपत्यसम्बधात् एतान्यैव तत्त्वानि आङ्गिरसेष्वपि द्रष्टव्यानि।

अन्यच्च। अग्निः सप्तास्यः ब्राह्मणेषु तस्य सप्तजिह्वायाः सूर्यरूपाग्नेः सप्तशक्तीनां सप्तसूर्याणां प्रतिपत्तिर्जायते। इरानीपुराणशास्त्रेऽपि 'असुरमहतः' अहुरमज्द, सप्तदूताना वर्णनम्। अतः न काऽपि बाधा मतेऽस्मिन् जायेत यदङ्गिरसाः अग्नेश्शक्तयः इन्द्रबृहस्पत्युषोभिः सम्बन्धाः।

अपि च ऋग्वेदः अग्नयायोरेकत्वमनेन मंत्रेण प्रतिपादयति-

त्वामग्ने प्रथममायुमायवे देवा अकृणवन् नहुषस्य विश्पतिम् इलामकृण्वन् मनुषस्य शासनी पितुर्यत् पुत्रो ममकस्य जायते। मन्वायोरेकत्वेऽपि एवमेव।

**येन ज्योतींष्यायवे मनवे च विवेदिय**

**मन्दानो अस्य बर्हिषो विराजसि।**

मंत्रद्वयस्यार्थेन गम्यते अग्न्यायुमनूनामेकत्वम्। पिण्डाण्डब्रह्माणडभेदेन जगतः द्विधाकरणं प्रसिद्धम। तस्मात् समालोच्यतेः-

सूर्यश्च सप्तरश्मिः सप्तजिह्वोऽग्निरेतयोर्साम्य कल्पनीयम्। अपि च ऋग्वेदे मनुः सप्तहोतृभिः यज्ञं कुर्वन् स्मर्यते। वृत्रहनात् पश्चादेव सप्तसिन्धूनां सरणाय 'सर्तवे' इन्द्रस्य सामर्थ्यं प्रभवति तथैव ऋतपजानां सप्तशीर्ष्णी वृहतीमस्माकं पिता बृहसपतिरविन्दन्। 'पञ्चात्मकं पञ्चसु वर्तमान' मादिनाऽस्मच्छरीरस्य यद्वर्णनं क्रियते तस्मिन् मनोमयकोशादारभ्यैव नांनामया सृष्टिः प्रारभ्यते। सृष्ट्यर्थ क्रियात्वं लक्षयतः अग्नेरस्तित्त्वमतिशयेनावश्यकम् मनोमयेऽग्निप्रधानत्वादेव प्रकर्षवती सृष्टिः जायते। तस्मात् सर्व विचार्य निष्कर्षोऽयं प्रतिपद्यते यदाग्निः मन्वायूनां अङ्गिरमानवायवः शक्तय एव।

पितृशब्देन पालकत्वं उत्पादनक्षमत्वञ्च सूच्येते। विश्वेऽस्मिन् या पालकादिगुणोपेता शक्तिरेका सा पितेति गम्यते तस्याः नानाकरणंमेव पितरः। सर्वेषां पालकत्वाद् उत्पादकत्वाच्चैव सूर्यस्याग्नित्वं तस्य किरणानामङ्गिरत्वं कल्पनीयम्। तच्च गीतायामप्युक्तम् यत् परमात्मैव वैश्वानराग्निरूपेण प्राणिनां देहमाश्रितः स च सर्वेषां पालकः जनयिता च तस्य सर्वतः व्याप्तेरेव ''सर्वतः पितरः'' इति ब्राह्मणोष्वाम्नायते।

# 12

# ऋग्वेदेऽलङ्काराः

*प्रह्लादकुमारः*

सस्वरवेदपाठमेव निखिलपुण्यकारणमाकलयन्तो वैदिकर्चः कुहक-सूत्राणीव विभावयमानास्त्रय्या अपौरुषेयत्वे च बद्धादराश् श्रद्धावन्तोऽसंख्याता भारतीया न जातु प्रमिण्वन्ति वेदकाव्यरससन्ततिम्। अपरतश्च ओल्डनवर्ग-[1] प्रमुखाः पाश्चात्त्यविपश्चिच्चणा वेदान् कर्मकाण्डैकप्रयोजनानूरीकुर्वाणा रससंसिक्ता-स्वपि मनोहरास्वप्यलंकृतास्वपि ऋक्षु स्वान्तरुद्भाविता शुष्कतामेवारोपयन्ति। वस्तुत आयासकरो वेदविवृतिप्रयत्नो नितरामवरुणद्धि काव्यचर्वणात्मकं रस-संचारम्। स्थित्यामस्यां कश्चन पूर्वाग्रहस्तु खलु आशु जनयति दृष्टिदोषम्। विपरीतमिव विपर्यस्तमिव चावलोकयति पूर्वाग्रहग्रहिलो जनस्सकलमपि वस्तुजातम्। किन्त्वस्मद्धन्यतया शनैः शनैः विदुषां दृष्टिः किञ्चत् पर्यवर्तत। तदेवं ब्लूमफील्डमहोदयः[2] कादाचित्कतया वैदिकमन्त्रेषु काव्य-सौन्दर्यं निभालयति। वासनासुवासितस्वान्तस्सहृदय एडोल्फकेगी महोदयस्तु[3] निसर्ग-नानार्थ-वर्णननिरतासु ऋक्षु अभिनवमम्लानञ्च सौन्दर्यं पश्यति। सम्प्रति तु डा. वर्गेगने-महोदयेन[4] डा. खौण्डामहोदयेन[5] डॉ. वेलणकरमहोदयेन[6] डॉ. त्र्यम्बकगणेश-माइणकरमहोदयेन[7] डॉ. पी.एस. शास्त्रिमहोदयेन[8] च ऋग्वेदस्य, काव्यत्वमुद्दिश्य बहु चर्चितम्, अबोधतिरस्करिणीतिरोहितच्छटा वेदकाव्यसुषमा च साध्वनावृत्य निदर्शिता। वयमपि पाठं पाठं वेदकाव्यं चेतं चेतञ्च वैदिककवीनां काव्यबिम्बानि रसोदधावेव निमज्जामः, पायं पायञ्चानवरतरसधारां न कथमपि तृप्तिं भजामः। याथातथ्येनोक्तं खलु वर्ण्ड्सवर्थमहोदयेन प्रबलभावधाराया हृत्पटलतस्सद्यस्सु-मुच्छलनमेव वास्तवं काव्यं भवतीति। ऋषेरावेगोद्-गीर्णोद्गारान् देवताः प्रति प्रापयन्तीं ऋचमेकम् (1, 105, 15) उद्धृत्य डॉ. आर.एन. डांडेकरमहोदयो[9]

वैदिककविताया अन्तःप्रेरणायाः तुलनाम् आँग्लीयरोमाण्टिक- कवितया करोति। वस्तुतस्समाजशिशावेव कविवृद्धा वसन्ति।[10] किन्तु वैदिकर्षीणां भावधाराया उद्रेकः कवेरजानत एवाकस्मादुद्भूत इत्येवमपि नास्ति। स तु स्वकाव्यं प्रति सम्यग् जागरूको बभूव। काव्यस्य गुणदोषानपि परिचिचाय। मनःपटलस्य पृथग्धरातलेभ्यः पृथक्प्रकारकं काव्यं प्रस्फुटतीति वैदिकः कविः सम्यग् यज्ञे। तथा ह्याह वैरूपोऽष्टादंष्ट्रो ''मनीषिणः प्रभरध्वं मनीषां यथायथा मतयः सन्ति नृणाम्'' (10, 111, 1) इति। काव्यस्य ब्राह्मतत्त्वं (Physical form) अन्तस्तत्त्वम् (Mental form) इति तत्त्वद्वयमपि सुष्ठु विवेद वैदिकः कविः। सत्यप्यन्तस्तत्त्वस्य, उत मनस्तत्त्वस्योताहो हृत्तत्त्वस्य प्राधान्ये बाह्मतत्त्वस्य नादरूपस्य महत्त्वं कथमपि न हीयते। वस्तुतस्तूभयोः पृथक्करणमपि न संभवति। भावप्राबल्यानुरूपं रसानुकूलञ्च नादसौन्दर्यमपि समवायसम्बन्धेनोद्भवति प्रतिमानवतः कवेः। ऋग्वेदे बहु बहुशश्च प्रतिपादितं यद् यथा कोऽपि तक्षा दारुं तष्ट्वा रथं निर्माति तथैवाहं सूक्तं करोमि-''अहं तष्टेव बन्धुरं पर्यचामि हृदा मतिम्'' (10, 129, 5)। ततश्चैव तक्षन्-व्यास-कीरिप्रभृतयश्शब्दा रूपकरूपेण कविपर्यायवाचिनः प्रयुक्ताः ऋग्वेदे। नव्य-भद्र-सुकृत-स्वया-अक्षतम्[11] इत्यादीनि पदानि वैदिककाव्यसमीक्षाप्रसङ्गेऽतीव महत्त्वपूर्णानि सन्ति। वेदानुशीलनेन भूयसां प्राचीनानामर्वाचीनानाञ्च कवीनां निर्देशस्स्फुटं परिचीयते। कविताया वैशिष्ट्यञ्च तदीयां मौलिकतां मेनिरे वैदिकर्षयः। सुहोत्रो भारद्वाजस्स्वकीयां ऋचमपूर्व्यां जुघोष (6, 32, 1)। बार्हस्पत्यस्य भरद्वाजस्य कविता 'नव्यसली' 'शुचिः' चास्ति (6, 8, 1)। रेजुर्वेश्वा-मित्रस्स्वकवितायां सममेव नवीनतां पवित्रतां व्यापकतामद्वितीयताञ्च निर्दिशन्नाह-''समानमस्या अनपावृदर्चक्ष्मया दिवो असमं ब्रह्म नव्यम्'' (10, 89, 3) इति। 'सूर्यस्य दुहितुः' कल्पना 'सरस्वत्याः' कल्पना चापि वैदिककवेः काव्यीयचेतनामा-विष्करोति।

उषःसूक्तेषु श्रृङ्गाररसस्य छटा दर्शनीयैव। तथाहि-

'कन्येव तन्वा शाशदानां एषि देवि देवमियक्षमाणम्।

सस्मयमाना युवतिः पुरस्तादाविर्वक्षसि कृणुषे विभाति।। 1, 123, 10।।

स्ववल्लभं सूर्यं दृष्ट्वा तरुण्या उषसो मनो नृत्यदास्ते स्मयमानवदना च सा दयिताभिमुखं प्रतिष्ठते, प्रवृत्ते च रत्युत्सवे स्वकीयं वक्षः विवृणोति। अत्र स्थायिभावो रतिः। आलम्बनं सूर्यः[12]। स्मितमभिसरणञ्चानुभावः हर्षश्च सञ्चारी।

ऋग्वेद एव श्यायाश्वो नाम कश्चिद् ऋषिर्विरहविह्वलो राजानं रथवीतिनं प्रति तस्य दुहितरमभिलक्ष्य रात्र्या स्वप्रणयसन्देशं प्रेषयति। प्रकरणेऽत्र विप्रलम्भश्रृङ्गारवर्णनं बलात् स्पृशति चेतस्सचेतसाम् एतादृशानि नानाविधानि प्रकरणानि ऋग्वेदे प्रतिपदं दृष्टिपथमुपयान्ति।

वीरकाव्यस्य रोमहर्षकरं वर्णनं वयमिन्द्रसूक्तेषु लभामहे। ऋतचक्रप्रवर्तयितारं राजानं वरुणं प्रति निजापराधशङ्क्या भक्तो भक्तिभावनया ओतःप्रोतश्च सन् उच्चैर्निनाद-

**उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत।**

**अबाधमानि जीवसे।। ऋ. 1, 25, 21**

**अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्।**

**मृडा सुक्षत्र मृडय।। ऋ. 7, 89, 4**

एवं खलु न केवलं ऋग्वेदे काव्यतत्त्वानामस्तित्त्वमेव प्रत्युत तस्य महाकाव्यत्मेव सिद्ध्यति। अतो हि विविधकाव्यतत्त्वानां दृष्ट्या ऋग्वेदस्य आमूलचूलाध्ययनमावश्यकमेवेति मन्ये। अत्र तावच्छरीरधर्माणामलङ्काराणामेवा-ध्ययनं नोऽभिमतम्। यतो हि महान् खल्वत्रारोपः क्रियेत कैश्चिरपरम्परापोषण-पटुभिर्विद्वद्भिर्यदलङ्कारविवेचनं भूयोऽर्वाक्कालिकं ऋग्वेदश्च नितरां प्राक्कालिकः। तत्कथं नाम तत्रालङ्कारावाप्तिरिति। किन्तु विश्वस्य प्राचीनतमे ग्रन्थे ऋग्वेदे लौकिककाव्येषु प्रयुज्यमानान् प्रायेण निखिलानप्यलङ्कारन् समवाप्य अस्माभि-स्त्विदमेव निर्धारितं यद् यस्मिन् कस्मिन्नपि काव्यकर्मण्यलङ्कारसद्भावस्स्वाभाविक एव। हेतुरप्यस्यास्मद्बुद्धिपथमारोहति। न केवलं मानव एव स्वशरीरं नैजं वस्तुजातञ्चालञ्चिकीर्षति प्रत्युत प्रकृतिरपि स्वकीयान्यङ्गान्यलङ्कर्तुं न कथमपि पराङ्मुखी। प्रातरुदिते भगवति सवितरि प्रकृतिनटीयं प्राचीं दिशं नवरागरञ्जितां विदधाति। वनान्युपवनानि च नानासुमनोभिस्समलङ्कृत्य हरति चेतस्सचेतसाम्। एवं हि नटीरूपायै प्रकृत्यै निजाङ्गप्रत्यङ्गं विविधसज्जया समलङ्करणं नवाभिनवै रागैरभिरञ्जनञ्च भृशं स्वदते। प्रकृतेश्शिक्षां ग्रहीता भावनाचतुरः कविरपि स्वं काव्यं विविधालङ्कारलङ्कृतं रमणीयञ्च दिदृक्षते। काव्यं नाम मानवान्तरात्मनस्तृप्तिहेतुः। आत्मनस्तृप्तिश्चेयं काव्यगते सौन्दर्ये निहिता तिष्ठति। इदं काव्यसौन्दर्यमेवोत्स्रष्टुं काव्यकृतस्सततमाहितयत्नाः। सत्यं, भावाश्रिता हि काव्यरमणीयता। किन्तु

भावानां रामणीयकं कोमलत्वं सूक्ष्मत्वं तीव्रत्वञ्च साधारणवर्णनया नैवापादयितुं शक्यम्। विशिष्टया भणितिभङ्ग्या वक्रताभिधानेनैवैतत्संभवति। किञ्च भावसौन्दर्यमुक्तिसौन्दर्यमपि जनयति। तदाह होममहोदयो 'भावावेशस्थितौ स्वत एवालङ्कार उद्भवती' ति। ब्लेयर-महोदयश्च भावावेशेन भाषालङ्कृता भवतीति प्रतिपादयति। मनोविज्ञानदृष्ट्या भावसौन्दर्यमुक्तिसौन्दर्यञ्च न खलु भिन्नजातीयकम्। अभिव्यक्त्यनुभूत्यो विवेकेकरी न कापि नियता रेखा विद्यते। एतदतिरिक्तं, भाषापरिष्कारं कुर्वन्त एवाऽलङ्कारा भावप्रयोजनास्यान्तर्दृष्टेरपि सूचका भवन्ति एवं ह्यलङ्कारा न केवलं काव्यालङ्कृतिहेतवोऽपितु ते, वस्तुनि पात्रे वा निहितं मनोवैज्ञानिकं सौन्दर्यमपि विशदयन्ति। पुनश्च, अरमलमिति पदद्वयं सामर्थ्यवाचि। एवं ह्यलङ्कारो न केवलं भूषयति काव्यं प्रत्युत भावाभिव्यञ्जने सामर्थ्यमप्यापादयति। कवेर्हृद्गतं भावमाविष्करोति। मानसिकी पृष्ठभूमिमुपस्थापयति रसञ्च तनोति। अलङ्कारेभ्यो मनःस्था भावाः परिस्फुटा भवन्ति, भूषिता भवन्ति, सौन्दर्यसमुज्ज्वलाश्च भवन्ति। एषाञ्च प्रयोगो भाषायां स्वभावत एव जायते लोकेऽन्येषां व्यवहारदर्शनात्। अलंकारो हि नाम अभिधानप्रकारविशेषः। स च यथावसरं यथाजनञ्च स्वतस्समुद्भवति। शृङ्गारे ललिते वा भावे कोमलपदप्रयोगो वीरे रौद्रे वा कठोरवर्णव्यवहारो नैसर्गिकत्वेनैव भवति। इदञ्च नादसौन्दर्यं जनयति शब्दालङ्कारवाच्यताञ्च याति। एवमेव किमपि नूतनं वस्तु दृष्ट्वाऽभिनवं भावं वा विभाव्य प्रत्येकं जनस्तस्य तस्य वस्तुनो तस्य तस्य भावस्य वा सादृश्यं कस्मिंश्चित्पूर्वविदिते वस्तुनि पूर्वानुभूते भावे च दिदृक्षते तन्तथैव च वर्णयितुं कामयत इति मनोवैज्ञानिकं तथ्यम्। इयं सादृश्यभावनाऽपि चेतसि बहुविधाऽऽविर्भवति काव्ये च भूयसामलङ्काराणां कारणं भवतीति प्रायेणार्थालङ्कारा उपमाया एव विवर्तभूता विद्यन्ते। न च हारादिवद्बाह्यधर्मत्वमलङ्काराणाम्। न यथा हारादीन् यथाभिलाषं कण्ठादवताय्यपाकुर्मो न तथा काव्यादलङ्कारपकरणं सम्भवति।

एवं खण्डिते ऋग्वेदेऽलङ्काराऽभाववादिनां मते सम्प्रति ऋग्वेद उपलभ्यया-नानामलङ्काराणां विवेचनप्रसङ्गे प्रथमं तावच्छब्दस्यैव बुद्धिविषयत्वादादौ शब्दालङ्कार नैवादद्मः। ऋग्वेदे वृत्त्यनुप्रासश्छेकानुप्रासो यमकञ्चेत्यलङ्कारत्रयं पदे पदे नयनगोचरतां याति। दिङ्मात्रं यथा-

**हंसः शुचिषद् वसुरन्तरिक्षसद्**
**धोता वेदिषदतिथिर्दुरोणसत् ।**
**नृषद् वरसदृतसद् व्योमसद-**
**ब्जा गोजा ऋतजा अद्रिजा ऋतम् ।। (4,40,5) ।।**

"देवेभ्यो देव दाशुषे" (1, 74,9), अर्चन्त्यकर्ममर्किनः (1,10,1) तं त्वा वाजेषु वाजिनं वाजयामः (1, 4, 9), मन्दिमिन्द्राय मन्दिने (1, 9, 2) वनेमा ररिमा वयम् (2, 5, 7) ओजो मिमानो महिमानमातिरत् (2, 17, 2) वीरेभिर्वीरान् वनवद् वनुष्यतोः (2, 25, 2) इत्यादिषु मन्त्रेषु वृत्त्यनुप्रासः, गृहेगृहे द्यविद्यवि, दिवेदिवे, शुचिः शुचिभिः इतिप्रभृतिषु वाक्यांशेषु 'तुब्जे तुञ्ज य उत्तरे (1, 7, 7) चन्द्रमग्निं चन्द्ररर्थ (3, 3, 5) उग्र उग्राभिरूतिभिः (1, 7, 4), देवो देवान् (2, 12, 13), महो महीं सुष्टुतिमीरयामि (2, 33, 8) इत्यादिषु मन्त्रेषु च छेकानुप्रासः, बृहन्तं क्षुमन्तं (2, 4, 8) यः पचन्तं यः शंसन्तं (2, 12, 14) प्रमहे भरामहे (1, 53, 5) स हन्महानि समिथानि (1, 55, 5) ....शवः। ....श्रवः (1, 51, 5) इत्यादिषु अन्त्यानुप्रासः, धृतं न्वस्य धाम (2, 3, 11) तक्षन् रथं सुवृतं विद्मनाय-सस्तक्षन्हरी इन्द्रवाहा वृषण्वसू। तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम्। (1, 111, 1) इत्यादिषु लाटानुप्रासः, सोमस्य सोमपाः पिब (1, 4, 2), दीदेदरूषेण भानुना इन्धन्वीभिर्धेनुभी रप्शदूधभिरध्वस्मभिः (2, 34, 5) इत्यादिषु श्रुत्यनुप्रासः गाय गायत्रमुक्थ्यम्, (1, 38, 14) यातवे जातवेदसम् (1, 44, 4) सिन्धुमातरा मनोतरा (1, 46, 2) सोमपा सोमपान्नम् (1, 30, 11), मतिमतिरच्छाशदान (1, 33, 13), इत्यादिषु च यमकं स्फुटमवलोक्यते। ऋग्वेदं परिशीलयद्भिरस्माभिरिदं दृष्टं यन्न्यूनान्नन्यूनं प्रतिशतकं षष्टिसंख्याकेषु मन्त्रेष्वनुप्रासयमके उपलभ्येते, प्रश्न उदेति यत्सर्वेष्वेषु स्थलेषु कवेराग्रहेणानुप्रासः प्रयुक्तः यमकं वा, उताहो यदृच्छया। अत्रोच्यते-न हि सर्वत्र कवेर्मनीषया इदमलङ्कारद्वयं प्रयुक्तं न च सर्वत्रैव वर्णसाम्य- मलङ्कारत्वं भजते तथाप्येतत्तावदस्माभिरभ्युपगन्तव्यं भवति यद् वैदिका कवयो स्वकीयकाव्ये नादसौन्दर्यमुत्पादयितुं विविधोपायानवलम्बन्ते स्म तथाहि-

(i) संज्ञाविशेषणयारावृत्तिः। तद्यथा-शुचिः शुचिभिः, हितो हितेषु, वसुपतिं वसूनाम्, इत्यादि।

(ii) समानाख्यातीयपदयोरावृत्तिः। यथा-गिरा गृणीमसे, तरेम तरसा, सुवृधो ववृधुः पृथु पप्रथे इत्यादि।

(iii) समानध्वन्यवसितपदयोः प्रयोगः। यथा-ते हिन्विरे त हन्विरे, अमृतासस्तुरासः, दमूनसो अपसो, शंसते स्तुवते, आपथयो विपथयो इत्यादि।

(iv) समानादिध्वन्युपेतयोः पदयोरादानम्। यथा-मरुतो मर्जयन्तः, वचो वन्दास वृषमाय वृषणो, शुक्रस्य शोचिषः, सुशर्माणं सुशवसम् इत्यादि।

(v) पादादौ पादमध्ये वा कस्यचिच्छब्दस्यावृत्तिः। यथा-त्वमग्ने वरुणो जायसे यत् त्वं मित्रो भवसि यत् समिद्धः (5, 3, 1) इत्यादिषु।

(vi) समाने सूक्ते मन्त्राणामादौ कस्यच्चिच्छब्दस्यावृत्तिः। यथा-नवम- मण्डले 61 सूक्ते षोडश्यां सप्तदश्याम् अष्टादश्याञ्चर्चि 'पवमान' पदस्य आवृत्तिः।

(vii) पूर्वमंत्रे प्रयुक्तस्य पदसमुदायस्यागामिमंत्रे आवृत्तिः। यथा-पञ्चममण्डलेऽष्टमे सूक्ते आसतमर्चम् 'त्वामग्ने' इत्यस्यावृत्तिः।

(viii) नञ्तत्पुरुषेण निर्मितस्य शब्दस्य तेनैव नञ्रहितेन पदेन सह ग्रहणम्। यथा हि- अमर्त्यं मर्त्यः, शिवासः सन्तः अशिवा अभूवन्, जातैः अजातान् इत्यादि।

(ix) ध्रुवप्रयोगः (Refrains)। यथा-कस्मै देवाय हविषा विधेम इति दशम मण्डल 121 सूक्ते।

(x) अन्त्ययमकस्य प्रयोगः। यथा-

**आ णस्ततान रोदसी ऋतेन**
**नित्यं मृजन्ति वाजिनं घृतेन। (5, 1, 7)**

''दददृचा सनिंपते ददन्येधामृतायते'' (5, 27, 4) इत्यादि।

(xi) पादस्य साकल्येन स्वल्पान्तरेण वाऽऽवृत्तिः।

(xii) नादसौन्दर्यदृशैव कस्यचिन्निपातस्य वीप्सया प्रयोगः।

यदुच्यते भामहात्पूर्वं स्वतन्त्रसत्ताकस्य श्लेषस्य स्थितिर्नैवाभूदिति, तन्न। ऋग्वेदे तस्य सद्भावात्। तथाहि- 'अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः' (9, 107, 9) इत्यत्र श्लेषः। अयं मन्त्रार्थः- गोमाञ्जनस्त्वकीयाभिर्गोभिस्साकं जलप्रायदेशे निवसति दोहनेन च तदीयगोभ्यः प्रचुरं दुग्धं क्षरति। क्षि (निवासगत्योः) धातोः ''अक्षः'' इति पदम्। पक्षे/क्षि (क्षरणे) धातोरपि ''अक्षः'' इति रूपम्।

ननु नात्र श्लेषस्यालङ्कारान्तरविविक्तविषयत्वम्। अनुप्रासप्रयोगदर्शनात्।

अत्र ब्रूमः। न ह्यनुप्रासेन श्लेषस्य स्वातन्त्र्यं व्याहन्ते। अर्थानुसन्धान-विरहिण्यनुप्रासादावङ्गाङ्गिभावस्याऽनङ्गीकारात्।

**ऊर्ध्वं भानुं सविता देवो अश्रद्**

**द्रप्सं दविध्वद् गविषो न सत्वा।** (4, 12, 2)

अत्र द्रप्समिति पक्षे पार्थिवं रजः। पक्षे च सोमबिन्दुरिति। यथा गोहरणाभिलाषी नृपो धूलिसात्कुर्वन्नभोऽन्यराज्यमुपतिष्ठते तथैव देवः सविता धूलिं विकिरन् भानुमुपैति। पक्षे-यथा गोकामो नृपस्सोमबिन्दूनुपहरन् स्वाभीष्टदेवतामाश्रयति (प्रसादयतीति यावत्) यथा देवाः सविता सोमशीकरान् क्षरन् भानुमाश्रयतीति। अत्रौपम्यगर्भः श्लेषः। किन्त्वत्रापि मम्मटाचार्याद्युक्तदिशा श्लेषस्यैव प्राधान्यम्। एवं खलु भूयांसि श्लेषोदाहरणानि मया ऋग्वेदादात्तानि। बह्वीषु ऋक्षु गौरिति पदं श्लेषेण गोव्यक्तिं गोदुग्धञ्च सममेवोपस्थापयति। निबन्धगौरवभयात्त्वत्र तत्सर्वमुपस्थापयितुं न सुशकम्।

डॉ. बूलनरमहोदयेन ऋग्वेदे प्राकृतप्रभावः प्रदर्शितः। ऋग्वेदीयप्राकृतस्य सम्यगनुशीलनेन 'भाषासम' इत्यलङ्कारस्योदाहरणान्यप्यन्वेष्टुं शक्यन्त इति दृढं सम्भाव्यते। नूनमेतत्कार्यं महान्तं प्रयत्नमपेक्ष्यते। एवमेव कैश्चिद्विद्वद्भिः केषुचिन्मंत्रेषु पद्मबन्धादीनां चित्राणामस्तित्वं सचित्रमुदाहृतम्। किन्त्वत्रेदं तावदवधारणीयं यद् यथा नादसौन्दर्यमापादयितुं वर्णावृत्तिं पादाद्यावृत्तिञ्च वैदिकर्षिः स्वेच्छया प्रयुङ्क्ते तथा च श्लेषमपि भूरिशः साग्रहं प्रयुणक्ति न तथा पद्मबन्धादि-चित्राणि।

शब्दार्थालङ्कारं पुनरुक्तवदाभास तु साभिनिवेशं बहुशः प्रयुञ्जते वैदिकाः कवयः। तथाहि-अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि (1, 1, 4) तिरः समुद्रमर्णवम् (1,1-9, 7) वसोश्चित्रस्य राधसः (1, 22, 7) गायत्रमुक्थ्यम् (1, 38, 14) जातवेदसमग्निमीडे (1, 44, 4) होतारमृत्विजम् (1, 44, 11) सत्यशुष्माय तवसेऽवायि (1, 52, 15) हृदा मनसः मनीषा (1, 61, 2) फलिगमिन्द्र शक्र (1, 62, 4) द्यावापृथिवी रोदसी उभे (2, 1, 15) वज्रबाहुर्यो वज्रहस्तः (2, 12, 13) इत्यादि।

अर्थालङ्कारेषु सर्वालङ्कारोपजीव्यभूताया उपमाया एव प्रयोगो भूयिष्ठः। मनोवैज्ञानिकं कारणं त्वस्य मया पूर्वमेवोपन्यस्तम्। अयमेव हि हेतुर्विश्वस्य विश्वस्मिन्नपि वाङ्मये उपमायाः प्रयोगस्य। ऋग्वेदे प्रायेण श्रौत्युपमा एव प्राप्यन्ते।

आर्थ्यास्तु प्रयोगः कादाचित्कः। अर्थात्- उपमासु न-इव-नु-चित्-आ-प्रभृतिनिपातानां प्रयोगो वाचकत्वेन विद्यते। तुल्य- सदृशादि-विशेषणपदानां तु विरल एव प्रयोगः। तुल्यार्थवतेः प्रयोगः क्वचिद् दृश्यते। एवञ्च तद्धितगाया आर्थ्याः प्रयोगो यत्र तत्र द्रष्टुं पार्यते। वाचकत्वेन ''न-इव'' इति निपातयोः प्रयोगो भूयान्। निपातेतराणां त्वल्पीयान्। समासगा उपमा अपि भूयस्यः। यद्यपि ऋग्वेदीयोपमानां मुख्यं प्रयोजनं यथा-कथञ्चिच्छादृश्याभिव्यञ्जनमस्ति तेनैव च बर्गेगनेमहोदयो वैदिकोपमानां लक्षणं निरङ्कुशत्वं (Boldness) इत्याह।

तथापि भूयसीनामुपमानां सौन्दर्यं भावप्रवणत्वञ्च नूनमावर्जयति चित्तं सहृदयानाम्। तद्यथा-

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः।। (10, 71, 4)**

अत्र पूर्णा श्रौती वाक्यगा उपमा। लुप्तोपमाया नैकानि निदर्शनानि दृग्गोचरीभवन्ति। दिङ्मात्रं यथा-

**अधा मित्रो न सुधितः पावकोऽग्निर्दीदाय मानुषीषु विक्षु। (4, 6, 7)**

कस्यापि राष्ट्रस्य समाजस्य च संस्कृतेः सभ्यताया धर्मस्य दर्शनादिकस्य च विशदं चित्रं वयं तदीयसाहित्ये प्रयुक्तासूपमासु सम्यगवलोकयितुं पारयामः। ऋग्वेदीयोपमानामाधारेण तदानीन्तनसमाजस्य छविदर्शनं नूनमेव मनः रञ्जयति। दृशाऽनया उपमानां विभाजनमेवं विधातुं पार्यते-

1. देवातासम्बन्ध्युपमानवत्य उपमाः।
2. पुराणेतिहासभ्यामात्तोपमानशालिन्य उपमाः।
3. यज्ञसम्बन्ध्युपमानयुक्ता उपमाः।
4. मानवक्षेत्रादात्तोपमानवत्य उपमाः।
5. पशुसम्बन्ध्युपमानवत्य उपमाः।
6. युद्धक्षेत्रादात्तोपमानशालिन्य उपमाः।
7. प्राकृतिकोपमानवत्य उपमाः।

एतेऽपि भेदाः पुनर्नैकेषूपभेदेषु संविभक्तुं पार्यन्ते। तद्यथा-मानवक्षेत्रीयोपमानानां विचारप्रसङ्गे जातेर्ज्ञातेश्चात्तान्युपमानानि। गृहप्रासादादीनामलङ्काराणां वेशभूषाणां मनोरञ्जनसाधनानां कलानाञ्चोपमानत्वेन

प्रयोग इत्यादि। उपरिलिखितप्रकारेणोपमानामध्ययनेन वैदिकसमाजविषये वैदिकधर्मविषये च नैकानि महत्त्वपूर्णानि तथ्यानि समासादयामः। अल्पीयस्यस्मिन् निबन्धे तत्सर्वमुपस्थापयितुं न सुशकम्।

उपमाया अनन्तरं ऋग्वेदे रूपकमेव महत्त्वपूर्णोऽलङ्कारः, उपमाया अतिशयसामीप्यञ्च अत्र हेतुः। यथाकथमपि साम्याभिव्यञ्जनमेव वैदिकरूपकस्य वैशिष्ट्यं वर्तते। तद्यथा-

**उदुत्यं जातवेदसं देवं वहन्ति केतवः।** (1, 50, 1)

अत्र सूर्यरश्मिषु अश्वस्यारोपः।

**तं नाकमर्यो अगृभीतशोचिषं।**
**रुशत् पिप्पलं मसतोवि धुनुथ** (5, 54, 12)

अत्र नभसि वृक्षत्वारोपः।

तथापि नैकेषां रूपकाणां काव्यीयसौन्दर्यं निभालनीयमेव-

**''दिवो सर्वत्र उरुपक्षा उदेति।**
**मध्ये निहितः पृथ्विरश्मा।।''**

अधोलिखिते मंत्रे किमपि शोभनमेकदेशविवर्तिरूपकं दृश्यते-

**प्रातः रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः**
**दशारित्रो मनुष्यः स्वर्षाः स दृष्टिभिर्मतिभी रंह्यो भूत्।** (1, 18, 1)

एवमेवाग्निसूक्तेषु 'घृतपृष्ठः' 'घृतकेशः' 'शोचिष्केशः' 'हिरण्यदन्तः' 'अयोदंष्ट्रः' इत्यादिपदेषु मनाहारि रूपकं दरीदृश्यते।

ऋग्वेदे अतिशयोक्तिरपि भूयसा प्राप्यते। सुप्रसिद्धे मंत्रे-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (1, 164, 20)

पक्षीद्वयरूपोपमानेन जीवात्मपरमात्मरूपोपमेयस्य सर्वथा निगरणादतिश्योक्तिः। ऋग्वेदे प्रायेण रूपकातिशयोक्तीनामौपम्यगर्भातिशयोक्तीनाञ्चोदाहरणानि प्राप्यन्ते।

ऋग्वेदे आख्यातपदैः सह प्रयुक्तेषु 'अधि, अपि, इह, उत यथा' इति पदेषु इवशब्दः। प्रायेण सम्भावनां द्योतयतीति डॉ. वेलणकरमहोदयैः प्रतिपादितम्। तथाहि-

**कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि।**

**यत्र सोमः सूयते यत्र यज्ञो धृतस्य धारा अभि तत् पवन्ते।।** (4, 58, 9)

'द्वा सुपर्णा.' इत्यस्मिन्नेव मंत्रे उत्तरार्द्धे पक्षिद्वयस्य स्वभावभेदाद् व्यतिरेकः। ''द्वादशारं न हि तज्जराय वर्वति चक्रं परिद्यामृतस्य'' इत्यत्रोपमेयस्य ऋतचक्रस्याधिक्याद् व्यतिरेक एव।

उपमाप्रसङ्गे उदाहृते 'उत त्वः पश्यन्न ददर्श वाचम्' इति मंत्रे कारण-रूपदर्शनक्रियायां सत्यामपि दर्शनरूपस्य फलस्याभावाद् विशेषोक्तिः।

सुप्रसिद्धेऽक्षसूक्ते विभावनाया मनोहारि उदाहरणं वर्तते-

**नीचाः वर्तन्त उपरिस्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते।**

**दिव्या अङ्गारा हरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति।।**

एवमेव विख्याते-

**इन्द्रं मित्रं वरुणमग्निमाहुर्,**

**अथो दिव्यः स सुपर्णो गरुत्मान्।**

**एकं सद्विप्रा बहुधा वदन्ति,**

**अग्नि यमं मातरिश्वानमाहुः।।** (1, 164, 46)

इति मंत्रे स्फुटमुल्लेखः। तथा च-

''आ त्वा विशन्ति इन्दवः, समुद्रमिवसिन्धवः।'' (8, 81, 22)

इन्द्रमिन्दो वृषा इन्दवः (9, 2, 1)

इन्द्रं गच्छन्त इन्दवः (9, 63, 6)

ग्रावा यत्र मधुषुदुच्येत बृहत् (10, 100, 8)

इत्यादिषु भङ्ग्या गम्यस्यैवाभिधीयमानत्वात् पर्यायोक्तिः।

उपमाप्रसङ्गे विशेषोक्तिप्रसङ्गे चाप्युदाहृते 'उत त्वः पश्यन्न ददर्श वाचम्' इति मंत्रेऽप्रस्तुतेन विज्ञातार्थस्य प्रशंसनादप्रस्तुतप्रशंसाऽपि। एवमेव-

**उत त्वं सख्ये स्थिरपीतमाहुर्, नैनं हिन्वन्त्यपि वाजिनेषु।**

**अधेन्वा चरति माययैष, वाचं शुश्रुवां अफलामपुष्पाम्।।** (10,71,5)

अत्यत्राप्यप्रस्तुतप्रशंसा। तथा चाहुः सायणाचार्यः- विज्ञातार्थस्य प्रशंसा, केवलपाठकस्य निन्दा च।' अर्थान्तरन्यासस्य भूयांसि शोभनान्युदाहरणानि ऋग्वेदे समवाप्तुं शक्यन्ते। दिङ्मात्रं यथा-

**पूर्वीरहं शरदः शश्रमाणः, दोषा वस्तोरुषसो जरयन्तीः।**
**मिनोति श्रियं जरिमा तनूनामप्यू, नु पत्नीर्वृषणो जगम्युः।। (1, 179, 1)**

अत्र विशेषस्य सामान्येन समर्थनादर्थान्तरन्यासः।

एवमेव-

**उन्नो वीरान् अर्पय भेषजेभिः**
**भिषक्तमं त्वा भिषजां शृणोमि (2, 33, 4)**
**न तं विदाथ य इमा जजान**
**अन्यद् युष्माकम् अन्तरं बभूव।**
**नीहारेण प्रावृता जल्प्या च**
**असुतृप उक्थशासश्चरन्ति।। (10, 82, 7)**

इत्यादौ वाक्यार्थस्य हेतुत्वात्प्रयोगेण काव्यलिङ्गम्।

**अत्रिर्यद् वामवरोहन्नृबीस, मजोहवीन्नाधमानेव योषा।**
**श्येनस्य चिज्जवसा नूतनेनाऽऽ, गच्छतमश्विना शंतयेन।। (5, 78, 4)**

इत्यादौ बिम्बानुबिम्बत्वेन निदर्शना।

प्रवाता वान्ति पतयन्ति विद्युत, उदोषधीर्जिहते पिन्वते स्वः।
**इरा विश्वस्मै भुवनाय जायते, यत् पर्जन्यः पृथिवीं रेतसावति।। (5, 83, 4)**

इत्यादौ स्वभावोक्तिः।

**स्वे योनौ निषदतं सरूपा, वि वां चिकित्सदृतचिद्ध नारी।। (4, 16, 10)**

अत्र कुत्सेन्द्रयोस्सममुपविष्टयोरिन्द्रं निश्चेतुमसमर्था पतिव्रता इन्द्राणी विचिकित्सत इत्यत्र भ्रान्तिमान्।

**मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः।**
**भ्रातेन्द्रस्य सखा मम।। 6, 55, 5)**
**मातुर्विवाहार्थी पूषा स्वसुः प्रणयी इति विरोधाभासः।**
**तं माता रेव्हि उ स रेव्हि मातरम्।। (10, 114, 4)**

इत्यत्रान्योन्यालङ्कारस्फुटः।

अलमतिपल्लवितेन। एवं खल्वपरेषामप्यलङ्काराणामस्तित्वमासादयितुं पारयामः ऋग्वेदे। विषयमिममेवावलम्ब्य शोधकर्मणि प्रवृत्तेन मयाऽनुदिनं नवाऽभिनवाऽलङ्कारा ऋग्वेदादन्विप्यन्ते। अणीयस्यत्र लेखे तत्सर्वमुपन्यस्तुं नापि

सम्भवं नाप्यभीष्टम्। वर्णनेनानेन तावदेतदेवोपपिपादयिषामो यद् वैदिकर्चो नापि कुहकसूत्राणीव सन्ति नैव च गड्डलिकापालगीतयः। ऋग्वेदेऽतिमनोहरं काव्यं वरीवर्ति। काव्येऽस्मिन्नपि प्रणयिनामुल्लासो विरहिणां विलापो वीराणामुद्घोषो भक्तानामुद्गारश्शब्दानां सौष्ठवमर्थानां गाम्भीर्यं भाषायाः सालङ्कृतत्वं भावानञ्चोष्मता सुतरामाविष्करोति कविताकामिन्या विलासं हासञ्च। ऋग्वेदीयालङ्काराणामनुशीलनेन सवितर्कं विवेचनेन च तदानीन्तन कवीनां चेतनाबिम्बं सृष्ट्वाविर्भवति तात्कालिकस्य समाजस्य च चित्रं सुविशदयाङ्कितं भवत्यस्मद्धृत्पटले। अलङ्काराणां नैसर्गिकत्वसिद्धान्तस्सिध्यति। तेषां मनोवैज्ञानिकमध्ययनमविकलं कलयितुं शक्यते। एवं हि वेदव्याख्यायास्तुलनात्मक-भाषाविज्ञान - तुलनात्मकदेवशास्त्रतुलनात्मकधर्मप्रभृतिषु प्रयत्नेष्वन्यतमं प्रमुखञ्च साधनं वैदिकालङ्काराध्ययनमपि दृढं समर्थ्यते। सूक्तानां पूर्वापरक्रमो यदि कश्चित्स्यात्सोऽपि निर्धारयितुं पार्यते।

न त्वत्र वेदानां पौरुषेयत्वाऽपौरुषेयत्वविचिकित्सा करणीया। वेदानाम-पौरुषेयत्वेऽप्यङ्गीकृते न हि काव्यत्वहानिः। ''पश्य देवस्य काव्यं न ममार न जीर्यति।''

**Footnotes :-**

1. *Oldenberg : Die Literature des alten Indian (P.20)*
2. *Bloomfield : Religian of the Veda.*
3. *Adolf Kaegi : Der Rgveda, die-alteste Literature der Inder (PP. 33 35)*
4. *Abel Bergaine : Some Observations on the figures of speech in the Rgveda. "Annals of Bhandarkar Oriental Research Institute" (Vol. 17)*
5. *Gonda : Stylistic Repetitions in Rgveda.*
6. *Dr. Velankar : Similes of the Vamdevas and Atris. Journal of the Bombay Branch of the Asiatic Society (Vol. 14 and 16)*
7. *Dr. T.G. Mainkar : Some Poetical Aspects of Rgvedic Repetitions.*

8. Dr. P.S. Shartry : Figures of speech in Rgreda. Annals of Bhandarkar oriental Research Institute (vol. 23)
9. R. N. Dandekar : Hrd in the veda. " Siddha Bharti" (Pt. I.P.139)
10. Dr. T. C. Mainkar : Some Poetical Aspects of the Rgvedic Repetitions. (P.g)
11. Ibid (P.g)
12. Ibid (P.30)
13. R. V. X. (16, 17, 18)
14. Home : Figures Consist in the passional element.
15. डॉ. रुद्रदेवत्रिपाठी : 'संस्कृतसाहित्य में शब्दालंकार।'

# 13
# ऋग्वेदे प्रकृतिचित्रणम्

*वन्दना द्विवेदी*

**प्रस्तावना**

ऋग्वेदः संस्कृतस्य वाङ्मयस्य मूलग्रंथः अस्ति। अस्य वेदस्य ऋचाः न केवलं मानवजीवनस्य प्रतिपादनमेव कुर्वन्ति, अपितु प्रकृतेः, तस्या गुणाः तथा तया सह मानवस्य संबन्धस्य विवेचनमपि प्रदर्शयन्ति। प्रकृतिः सम्पूर्णभारतीयसंस्कृतेः अभिन्नाङ्गिनी अस्ति। ऋग्वेदस्य मध्ये प्रकृतेः अनेकानि धाराः एवं रूपाणि प्रतिपादितानि सन्ति। ऋग्वेदे यथा प्रकृतेः सृजनात्मक पक्षम्, 'नासदीय सूक्त' मध्ये वर्णितम् अस्ति, तथा प्रकृतेः संरक्षणात्मक पक्षमपि अवलोकयितुं शक्यते। ऋग्वेदस्य मध्ये प्रकृतेः या चित्रणम् आस्ते, सा प्रकृतेः सामर्थ्यम्, सौंदर्यम्, तथा मानवैः सह गतस्या संवादम् उपदर्शयति।

अतः, अस्यां प्रस्तावनायाम् अहम् ऋग्वेदस्य मध्ये प्रकृतिचित्रस्य विविध पक्षान् प्रकटयितुम् इच्छामि। एतेषां चित्राणाम् अध्ययनेन मानवस्य प्रकृत्या सह प्रेम्णः, सम्मानस्य तथा संवेदनायाः महत्वम् ज्ञातुं शक्यते। अतः ऋग्वेदस्य प्रकृतिचित्रणस्य अध्ययनम् अत्यंतं महत्त्वपूर्णम् अस्ति।

**परिचयः**

वेदाः खलु धर्मग्रन्थाः वा स्युरध्यात्मग्रन्था वा स्युर्विविधविद्यानां निधिग्रन्था वा स्युः, निर्विविवादमिदं तेषां विषयप्रतिपादनशैली काव्यमयी वर्तते। वेदेषु स्तुतिर्वा स्याद्, प्रार्थना वा स्याद् उपासना वा स्याद्, गंभीरं दार्शनिकविवेचन वा स्याद्, मानवस्य कर्त्तव्यबोधनं वा स्याद्, उद्बोधनं वा स्याद्, सत्काव्यस्य प्रशंसा वा स्याद्, दुष्काव्यस्य निन्दा वा स्यात्, पाप- प्रत्याक्रोशो वा स्याद्, युद्धस्य भीषणः संहारो वा स्याद्, सरितां कलकलनिनादो वा स्याद्, विद्युद्गर्जनाया विद्युद्दीप्तेश्च

ताण्डवनर्तनं वा स्याद्, वातस्य झंझा प्रवाहो वा स्याद्, खगानां कलकूजनं वा स्याद्, सघनवनानां हरीतिमा वा स्याद्, सोमरसस्य प्रस्रवणं वा स्याद् सर्वत्र काव्यमयी शैली दृश्यते ।

प्रकृतिचित्रणप्रसंगे प्रथमं तावद् वयमाख्यवर्णनस्य सूक्तमेकं (ऋ.10/146) उपस्थापयामः। सूक्ते अस्मिन् कस्याश्चिद् वनवासिन्या एकस्य नागरिकस्य चं मध्ये वार्ता वर्णिता अस्ति। सूक्तमिदं अरण्यानी सूक्त नाम्ना मन्यते। अरण्यानी शब्दस्यार्थः विशदयन् निरुक्तकारो यास्को ब्रूते - अरण्यानी अरण्यस्य पत्नी इति 1 अरण्य नाम वनम् तस्य पत्नी च भवितुमर्हति, विश्चेतनत्वात् तस्य। मुख्यार्थ- बाधे सति लक्षणा प्रवर्तते, अरण्यस्य. लक्ष्यार्थश्च, अरण्यस्थः पुरुषः इति सम्पद्यते। अरण्यस्थस्य पुरुषस्य अरण्यशब्देन कीर्तने तावदिदं स्वारस्य यत् तस्य पुरुषस्य वनेन सहैकात्म्यं तज्जीवनस्य जीवनमयत्वं च अवगम्यते। तस्य अरण्यस्थस्य पुरुषस्य वानप्रस्थस्य जनस्य वा पत्नी-अरण्यानी वर्तते।

कश्चिन्नागरिको वनं समायास्तां वानप्रस्थपत्नी पृच्छति- अयि वनदेवि, किमिति त्वम् अरण्येषु विलुप्तेव तिष्ठसि? ग्रामं किं न पृच्छसि? अत्र वने किं वा भयं न बाधते? सा वनवासिनी समुत्तरति-

**वृषारवाय बदते यदुपावति चिच्चिकः।**
**आघाटिभिरिव धावयन्नरण्यानिर्महीयते।।**

भद्र, त्वं भयस्य वार्तां करोषि। भयः कुतः? अत्र तु वीणां विनैव-संगीतास्यानन्दः प्राप्यते। पश्य यदा वृषारवो तीव्रस्वरोः जत्तुः स्वकीयेन तीव्रेण स्वरेण दिशो निनादयति, यदा च चिक्-चिक् इति मृदुध्वनिं कुर्वाणाश्चिच्चिको नाम कश्चिदन्यो जन्तुस्तमुपतिष्ठते, यदा वनरूपो गायको वीणातन्त्रीषु 'स-रे-ग-म-प-ध-नि इति सप्त स्वरानिव शोधयति । अत्र ऋषेः कीदृशं कल्पना-चातुर्यम्, कीदृशश्चोत्प्रेक्षालङ्कृतिचमत्कारः, ध्वनिमात्रेण स्थार्थं पुरस्कुर्वतोः' वृषारव चिश्चिक ! शब्दयोश्च प्रयोगे कीदृशं पदौचित्यप्रावीण्यमस्ति ।
अस्मिन् सूक्ते षण्मन्त्रः सन्ति । परम्, एक एवं मन्त्रे अन्यो दीयते

**आञ्जनगन्धिं सुरभिं बहवन्नाम कृषीवलाम।**
**प्राहं मृगाणां मातरण्यारण्या निमशंसिषम्।।**

वनवासिनी देवी वेनवीभ्यामहिमानं गायत्री नागरिकं कथयति। पश्य एषा

वनवीथी अन्जनतरुणां विकसितैः पुष्पैः सौरभमयी, कृषीवलां विनैव प्रचुरान्नयुक्ता, विविधानां पशूनां माता च विद्यते। तामेनां को न स्तुयात्? कहवन्नाम - अकृषीवलाम् इति कारणं विनैव कार्योत्यत्ति वर्णनादत्र -विभावना लङ्कार सौन्दर्यं प्रस्फुटति । वनस्य स्त्रीलिङ्गो मातृरूपे वर्णनं चापि सुतरां मनोहारि।

अरण्य श्रृंखलायाः एतेन - मनमोहकेन चित्रणेन मानवः सन्देशं प्राप्नोति यत्र तृतीये वयसि गृहभारं पुत्रे पुत्रबाध्वां च निक्षिप्य स्वयं वानप्रस्थाश्रमं प्रविश्य वनस्यैकान्तं सुरम्य : च वातावरणमेव स्व निवासस्थलीं कुर्यादिति। सर्वान् प्रतिमैत्रीभावं स्व मनसि निदधानः। ऋषि कौशिकः पुरुषो विश्वामित्र इति कथ्यते। सः विश्वामित्रः सुदासो नृपतेः पुरोहितो वर्तते। विश्वामित्रः शुभदानकर्तुः नृपतेः सकाशात् शकटपूरं धनान्नवस्त्रादिकं दक्षिणायां प्राप्य स्वावासं वनप्रान्तरं प्रति निवर्तमानोऽस्ति। स पश्यति यद् या नद्यो वनान्नगरं प्रति गमनकाले न्यून जलत्वात् सुतरणा आसन् ता एव सम्प्रति जलचूरं प्रवहन्ति, भयंकरस्य संजाताः। नदीं विपाशं शुतुद्रीं च विश्वामित्रस्य मनसि काव्यधारा प्रस्फुटिता।

विश्वामित्र ब्रूते प्रपर्वतानामुशती उपस्थादश्वे इव विभिषते हासमाने। गवेव शुभ्रे मातरा रिहाणे विषाट् छुतुद्री पयसा जावेते एते विषाट्छुतुर्द्यौ नद्यौ स्वकीयं जलपूरं समादाय तेन सह वेगेन धावतः सचेतने इव सकामे इव एते पर्वतानां क्रोडे परित्यज्य परस्परस्याग्रे गन्तुमिव तथा पयसा जवेते यथा धावन् प्रतियोगितायां परस्पर स्पर्द्धमाने विमुक्तः बन्धने द्वे घटिके वेगेन धावतः 1 किञ्च, तट्प्रान्तान् एते नद्यौ तथा लेलिहाने स्तः यथा शुभ्रे द्वे गावौ स्वकीयौ जिह्वया लीढः विपाद् छुतुदर्यौ नद्यौ समाश्रित्य परस्ताद् विश्वामित्रो वर्णयति यदेते सरितौ रथारूढे इव सवेगं धावतः ऊर्मिभिः सगलाश्लेषं सवाहुपाशबन्धनं मिलित्वा परस्परमानन्दसिक्ते इव कुरुतः । अत्र नद्योश्चेतनवद् वर्णनं कीदृशं सौन्दर्यमानकहति।

अचेतनाभिर्नदीभिः सह चेतनस्य मनुष्यस्य संवाद एवं प्रभाणी करोति। यद् वर्णनमिदं काव्यमय वर्तते। वर्णने वेदस्य कविरतीव सफलो जातः।

ऋगवेदस्य 10/75 संख्यके सूक्ते सिन्धु नद्या द्विविधं रूपमुपलभ्यते। एकं तस्या उग्रं रूपम्-**दिवि स्वनो यतते भूम्यो पर्यनन्तं शुष्म मुददियति भानुना। अभ्रादिव प्रस्तनयन्ति वृष्ट्यः सिन्धुर्यदेति वृषभो न रोरुवत् ।।**

उग्ररुपस्य वर्णनं पुल्लिंगे कविना कृतम्। पश्यत, सिन्धु नदोऽयं -

वृषभवद् रेभमाणः प्रवहति। अत्र वृषभस्योपमायां संजीवन्तीनां वर्षाणामुत्प्रेक्षायां या चारुतास्ति तां सहृदयाः पाठकाः सहजमेवानुभवितुं शक्नुवन्ति। सिन्धो : सौम्यरूपं वर्णनं कुर्वन् कविस्तां युवतिरूपेण चित्रयति-

स्वश्वा सिन्धुः सुरता सुवासा हिरण्यमयी सु—ता वाजिनीवती। चित्रणमिदं पुरुषाणां कुते। वलवतां प्रचण्डताम् आक्रमकताञ्च नारीणां कृते च माधुर्यं सन्दिशति। उपसः ऋग्वेदीये काव्यमये वर्णने सहृदयाः काव्यमर्मज्ञा मुग्धा सन्ति। सा दिवः पुत्री चिरयुवतिः सुन्दरी च वर्णिता ।

**एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः।**

**उपश्चित्राणान्येतानि समाजरू नार्यः : कृते विशेष सन्देश वाहकानि।।**[7]

एवमस्याभिरत्ररण्जनेदस्य कतिपयानां प्रकृतिचित्रणानां संक्षिप्तं चित्रं प्रस्तुतम्। मानवाय च ततः करू सन्देशः प्राप्तये इत्यपि दृष्टम्। मन्यामहे यत् सहृदयापाठकाः नूनमेवाभिर्वर्णनैश्च मत्—कृतिमनुभूय वेदानां काव्यमयतां हृदि निधास्यन्ति।

अनुशंग 1ः प्रकृतिः ऋग्वेदेः

ऋग्वेदः प्राचीनसंस्कृतसाहित्यस्य महत्तमः खण्डः अस्ति। अत्र धार्मिकाणि, दार्शनिकाणि, च सामाजिकाणि विचाराणि संगठितानि संति। किंतु, प्र9तेः चित्रणस्य अत्र विशेष उपस्थानमस्ति।

अस्य वेदस्य ऋचाः प्रकृतिं देवतारूपेण वा, प्राकृतिक घटनारूपेण वा दर्शयन्ति। अग्निम्, वायुम्, सूर्यम्, उषाम्, अपः इत्यादिनि प्रकृतिरूपाणि प्रमुखया अत्र प्रस्तुतानि। अग्नेः प्रकाश-उष्णता यज्ञायाः आहुतिः चेति महत्त्वं अस्ति। ऋग्वेदे उक्तम् ''अग्निम् ईळे पुरोहितं यज्ञस्य देवं ऋत्विजम्, होतारं रत्नधातमम्।।'' (ऋग्वेदः 1.1.1)

वायोः श्वासक्रियायाः नेता, जीवनप्राणः स्मृतः। अथ उक्तम ''वायो त्वा प्रणं मनसा बिभर्मि सोमेन त्वा रसेनांघिरः पिता।।'' (ऋग्वेदः उदाहरणस्यार्थे)

सूर्यः, जगतः प्रकाशस्य स्रोता, प्रकृतिसृजने अतीव महत्त्वपूर्णः। ऋग्वेदे उक्तम्ः ''सूर्य आत्मा जगतः स्थितस्य चाक्षुः'' (ऋग्वेदः 1.116.5)

अपाम् जीवनस्य संरक्षणे मुख्य भूमिका अस्ति। पृथिवी, अपः, आकाशं, वायुः, अग्निः - इति पंचमहाभूतानि प्रकृतिरूपेण ऋग्वेदे पुनः पुनः वर्णितानि। अतः, ऋग्वेदस्य अध्ययनेन प्रकृतेः महत्त्वं, सौंदर्यं च अवगच्छामः। अस्यां प्रकृतिचित्रणे ऋग्वेदस्य गहनता, विविधता च स्पष्टं भवति।

अनुशंग 2ः प्रकृतेर्महत्त्वमः

प्रकृतिः सर्वजीवानां जीवनस्य प्रधानस्रोतास्ति। अस्याः महत्त्वं अवगम्यते यदा अस्याः संरचना, संचारः, एवं संवर्धनविधानानि परिगण्यन्ते। ऋग्वेदे प्रकृतेर्महत्वं विशेषरूपेण प्रस्तुतमस्ति। प्रकृतिः जीवनस्य संचारणी, परिपालनी तथा संरक्षणी अस्ति। प्रकृतिः स्वीये अवयवेषु सूर्ये, वायौ, अपसि, भूमौ, अग्नौ च विशेषरूपेण प्रकटिता। आदित्यः, जगतः प्रकाशः, जीवनस्य परिसरः, प्राणिनां दृष्टिगोचरः अस्ति। सूर्योदयेन अहर्निशं जाता चकिता प्राणिः जागरूकः भवति। आदित्यः जगताम् प्रकाशस्य एकं स्रोत् अस्ति, यः प्राणिनां जीवनस्य निरन्तर संचारकः अस्ति। ऋग्वेदे उच्यतेः

**''सप्तास्यासन् परिधयः त्रिः सप्त समिद्धः अर्चिषः।**
**आदित्यैर्विश्वे परिणता ऋतेन, सत्यं अपाशत्।।'' (ऋग्वेदः 5.52.1)**

ऋग्वेदे अवगीयमान ऋक् उच्यतेः **''उद्यन्तमदित्यं दिवि दृशानुस्तवां वयं भासमिच्छाम जनाः।'' (ऋग्वेदः 1.50.1)**

अत्र सूर्यस्य उदयं सर्वप्राणीनां जीवनम् कीदृशी प्रकाशौ लाति, तत् वर्णितमस्ति। वायुः प्राणिनाम् अनिवार्यः, पर्यावरणस्य परिशोधकः च। ऋग्वेदे वायोः स्तुतिः भवतिः

**''प्रति स्पर्शं वायव उत्तरं विच।**
**स्वाहा ते सूर्यस्य योजनेषु असि।।'' (ऋग्वेदः 10.96.5)**

वायुः जीवनस्य अभिन्नांगमस्ति। प्रत्येकं प्राणिनं श्वास-प्रश्वासक्रिया जीवनस्य चालनाय अनिवार्या। वायोः अमूल्यता इत्थम् ऋग्वेदे प्रस्तुताः

''यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।'' (ऋग्वेदः 10.90.3)

अपः जीवनस्य संचारकः, शरीरस्य पोषणकारी, औषधीनां विकासाय आवश्यकमस्ति। जलम्, जीवनस्य संचारणी, प्राणिनां पोषणे मुख्यभूतमस्ति। ऋग्वेदे जलस्य विशेष महत्त्वं वर्णितमस्तिः - ''अपो हि दृष्टा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे।'' (ऋग्वेदः 10.91.1) ऋग्वेदे जलस्य महत्त्वम् उक्तम्ः ''अपो अस्मान् मातरः शुन्धयन्तु घृतं । पीयूषाणि प्रजावतीः।।'' (ऋग्वेदः 1.23.19)

भूमिः जीवनस्य आधारः, अन्नस्य उत्पादका, एवं सर्वजीवानां संगठनस्य निवासस्तलमस्ति। ऋग्वेदे पृथ्वी स्तुत्यतेः ''या पृथिवी अधब्या उर्वी सा नो यक्षदास्पतिः। उत्ताना विश्ववार्या'' (ऋग्वेदः 7.70.2)

भूमिः, प्राणिनां निवासस्थलम्, उपजीवनस्य केन्द्रीयभूतमस्ति। ऋग्वेदे भूमेः महत्त्वम् उक्तमः ''समुद्रमारभन्त पर्वतानां अस्मै पूर्वीरनु संसरन्त।'' (ऋग्वेदः 10.90.12) एवं, प्रकृतेः महत्त्वं जीवनस्य संचारे, वृद्धौ, संरक्षणे च विशेषरूपेण प्रतिष्ठितमस्ति। अस्याः अध्ययनम् अवगम्यते की प्रकृतिः सर्वजीवानां नित्य संगिनी, सहयोगिनी च अस्ति। प्रकृतिः जीवनस्य संरक्षिका, अन्नदायिनी, जीवनस्य संचारिका च अस्ति। अतः, अस्याः महत्त्वं ऋग्वेदेन स्पष्टीकृतमस्ति।

अनुशंग 3ः प्रकृतिः च ऋषियः ऋग्वेदे प्रकृतेः साक्षात्काराय ऋषयः मुख्य योगदायकाः सन्ति। ऋषियः प्रकृतिं स्वप्रत्यक्षज्ञानेन पश्यन्ति, अनुभवन्ति च। ते प्रकृतेः अद्भुतं शक्तिं, सौन्दर्यं तथा वैभवं अपि प्रकटयन्ति। ऋग्वेदे, प्रकृतिः ऋषिभिः विविध स्वरूपेषु प्रस्तुता। ऋषयः अनेकानि प्रकृत या वृत्तानि, तत्तद्रूपाणि, तथा शक्तयः ऋचामाध्यात् व्यक्तं चक्रुः। ''अपो अस्मान् मातरः शुन्धयन्तु घृतं नः पार्थिवान्यूतयन्तु।'' (ऋग्वेदः 7.49.4)

अत्र जलतत्त्वस्य मातृत्वं, पोषणशक्तिः च ऋषिना उपगीता। ऋषियः सूर्यस्य ज्योतिर्माय रूपं, वायोः जीवनदायक शक्तिं, अग्नेः परिवर्तनशीलता तथा अन्यानि प्रकृतिया गुणानि अवगणना न कुर्वन्ति। ''या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।'' (ऋग्वेदः 1.114.1)

अत्र ऋषिः रुद्रस्य शक्तिः, यः प्रकृतितत्त्वमस्ति, तस्य प्रकृत्या संहारकः तथा रक्षकः शक्तयः च समीकरणं करोति एवं, प्रकृतिः ऋग्वेदे न केवलं भौतिक जगतः एका अंश इति प्रस्तुता, किंतु तत्त्वज्ञानस्य, आध्यात्मिक अनुभवस्य च माध्यमेन अभिव्यक्ता। ऋग्वेदे प्रकृतिः ऋषयः च अभेदेन संवृत्तौ। ऋषयः प्रकृतिम् अनुभवन्ति, ताम् अध्ययनं कुर्वन्ति, ताम् उपगायन्ति च, यथा जीवनस्य सहजस्वाभाविक तथा आध्यात्मिक संवादः स्थाप्यते।

अनुशंग 4ः प्रकृतिः च मानवः

ऋग्वेदस्य प्रकृत्याः और मानवस्य संवादः अत्यन्त महत्त्वपूर्णः अस्ति। अयं संवादः जीवनस्य विभिन्न पक्षान् प्रकाशयति। ''यः पृथिवीं रेतसा विदधे य ओषधीः पूषयन्नग्निना। यः प्राणतो निर्मिमीता यजूंषि तं जानासवीर्याय शंसन्तः।। (ऋग्वेद 1.124.8)

अत्र पृथिवीमानवश्च संवादस्य चर्चा कृतमस्ति। पृथिवी मानवस्य रेतसा उर्वरा भवति। अग्निः ओषधयाः पूषयन्, मानवस्य प्राणैः सञ्चालितो भवति।

मानवः प्रकृतेः प्रति अपारं कृतज्ञताम् अनुभवति, प्रकृतिः च मानवस्य प्रति समर्थानुग्रहम् अर्पयति। प्रकृतिः मानवस्य जीवनस्य सर्वांगीणी आधारशक्तिः, यथा आहार, वायु, जल, आदिः। मानवस्य प्रकृतिप्रति आवश्यकता अनेकानि, परं प्रकृतिप्रति तस्य दायितवमपि अस्ति। अथ अपरं ऋचं पश्यामः''

''पृथिवी मातर्यथा वयं त्वां जीवामस्तथा त्वम् अस्मान् माराः।''( ऋग्वेद)

अत्र पृथिवी माता यथा मानवान् जीवनदानं करोति, तथा मानवः प्रकृतिं पालयन् तस्याः संरक्षणे प्रतिबद्धः अस्ति। प्रकृतिः अस्माकं जीवनस्य आधारभूता, मानवः प्रकृतेः संरक्षणाय प्रतिबद्धः। यथा ओषधियः, प्राणि, प्रवाहिन्यः आदयः, सर्वाणि प्रकृतेः संतानानि मानवस्य सेवाय उपस्थितानि। मानवः प्रकृतेः एतेषां उपकारिण्याः संविदानं तथा प्रकृतेः संरक्षणे सहयोगं करोति।

अतः अस्माकं प्रकृतिः च मानवः च अभिन्नौ, एकस्य अभावे अन्यस्य जीवनं सम्भवति न। यथा प्रकृतिः जीवनस्य अनुरक्षणं करोति, तथा मानवः प्रकृतेः संरक्षणं करोतु। इति ऋग्वेदस्य प्रकृतिः च मानवः अयं संवादः अस्माकं प्रेरणास्त्रं अस्ति।

अनुशंग 5ः प्रकृतेः दैवता स्वरूपम्

ऋग्वेदः, वेदानां प्रथमः एव सर्वप्रमाणिकः संहिता, प्रकृतेः दैवता स्वरूपाणि स्पष्टम् अवदधात्।

अग्निः (अग्निदेवः) : अग्निः सृष्टिस्थितिप्रलयेषु सक्रियम् अंशम् अलङ्करोति। ''अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम्। होतारं रत्नधातमम्।।'' (ऋग्वेद 1. 1.1) यज्ञानां प्रतीकः अग्निः समूहस्य संघटनस्य पर्यायः। अग्नेः अनेक रूपाणि - वैदिकयज्ञः, वानस्पतिक ज्वाला, गृहस्थानां चूलाग्निः, आध्यात्मिक ज्ञानादि।

वायुः (वायुदेवः) : वायुः जीवनस्य उत्साहम्, प्राणशक्तिः च प्रतिपादयति।

''वायो याताम् उप नो मुच धूमम्।'' (ऋग्वेद)

अस्मिन् श्लोके वायुः जीवनप्रवाहस्य चालकशक्तिः।

वरुणः : अधिकार, न्याय धर्मस्य दैवताच।

''वरुणस्य ऋतेन पंथा।''(ऋग्वेद) वरुणः प्रकृतेः न्यायबोधकः। सूर्यः और उषसः सूर्यः ज्ञानस्य, उषस् नवजीवनस्य प्रतीकः।

''ऊर्जा स्वराज्ये विधते वर्याणि।'' (ऋग्वेद)

सूर्यस्य ऊर्जा अवबोधयति कि प्रकृतिः किमपि स्थिरं नास्ति।
अदितिः : अदितिः सम्पूर्ण प्रकृतेः माता, सृष्टिः, संरक्षण एव प्रलयस्य स्रोता।
''अदितिः द्यौः अदितिः अंतरिक्षम्।'' (ऋग्वेद)
अस्मिन् श्लोके अदितिः सर्वस्य आधाररूपेण प्रतिष्ठिता।
मरुतः : मरुतः प्रकृतेः गतिशीलतायाः प्रतीकाः।
''ये मरुतः सुमनसः सयोनाः।'' (ऋग्वेद)
वायुस्य गतिशीलतायाः मरुतः संवेदनशीलतां दर्शयन्ति।
अश्विनौः चिकित्सा और जीवन संरक्षण के दैवता।
''अश्विना यातमुवाच शिशुम्।'' (ऋग्वेद)
अश्विनौ जीवनस्य संरक्षणस्य दृष्टांतम् अवदधात्।

इति, प्रकृतिः ऋग्वेदे विभिन्न दैवता स्वरूपेषु उच्चारिता। एतेषां देवतानां माध्यमेन प्रकृतिः तस्याः उपायाः, क्रियाकलापाः, शक्तयः तथा संरचना मानवस्य समक्षं प्रकटीभवन्ति। यद्यपि ऋग्वेदस्य गीतानि प्राचीनतमानि सन्ति, तानि प्रकृतेः मानवतायाः च संघटनस्य अध्ययनायाः प्रमाणम् अस्ति। यथा प्रकृतेः शक्तिः मानवस्य समर्थ वृत्तिः परस्परं संवादं कुर्वन्ति, तथा ऋग्वेदः प्रकृतेः महत्त्वं तस्याः संरचनायाः ज्ञानं प्रदान करोति।

अनुशंग 6: प्रकृतेः संरचना तथा तत्त्वम्

1. पंचमहाभूतानिः वैदिकसंहितासु पृथिवी, जल, वायु, अग्नि, आकाश - इमानि पंच महाभूतानि स्पष्टतया प्रस्तुतितानि। प्रत्येकं भूतं स्वविशेषं संजीवनं च प्रदानं करोति। पृथिवी धारित्री, जलं जीवनस्य अभिवृद्धये, वायुः प्राणसंजीवनी, अग्निः परिणामकारी, आकाशः अन्तरालम्। ''भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च'' अस्य श्लोकस्य साहित्ये प्रकृतेः पंचतत्त्वानि प्रस्तुतितानि।

2. प्रकृतिसंयोगः : ऋग्वेदे प्रकृतिः स्वस्य संयोगेन जगतः संचारं च संहारं च साधयति इत्युक्तम्। प्रकृतिसंयोगः सृजनहारयोराधारभूतः। प्रकृतेः संयोगस्य कारणं जीवनस्य नियतिः, रचना च स्पष्टताम् अपेक्षते।

3. प्रकृतिपुरुषसंयोगः : यत्र प्रकृतिः पुरुषस्य संगतिं प्राप्नोति, तत्र सृष्टिर्भवति। ऋग्वेदे पुरुषः सूक्ते प्रकृतिपुरुषयोः संयोगः स्वस्त्ययनमार्गं प्रदर्शयति। प्रकृतिः पुरुषस्य बलम्, शक्तिं च प्रदानं करोति। प्रकृतिः स्वीयस्य संयोगेन सृष्टिं, स्थितिं,

प्रलयं च साधयति। ''तैत्तिरीयारण्यके - 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः''

4. प्रकृतिः कर्मफलदात्रीः प्रकृतिः कर्माणां अनुसारेण जीवानां फलानि प्रदानं करोति। अयं कर्मफलसिद्धान्तः वैदिकधर्मे महत्त्वपूर्णः। प्रकृतिः केवलं जीवानां कार्याणि न पर्यावलोकयति, परं तेषां प्रतिस्पन्दानं च। प्रकृतिः कर्माणां अनुसारेण फलानि प्रदानं करोति। ''कारणं कर्मकारित्वे हेतुः प्रकृतिरुच्यते''

5. त्रिगुणाः : वैदिक साहित्ये प्रकृतेः सत्त्व, रजस्, तम इत्येषु त्रिषु गुणेषु प्रवृत्तिः दृश्यते। सत्त्वः प्रकाशाय, रजः प्रवृत्ताय, तमः स्थैर्याय। प्रकृतिः त्रिगुणात्मिका संसारस्य संचालनाय साधारणा भवति। अनेन, प्रकृतेः संरचना तथा तत्त्वानि ऋग्वेदे कीर्तितानि। यथातथ्यं अध्ययनं प्रकृतेः तत्त्वज्ञानस्य उत्तराधिकारिणि भवति। ''सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः'' - यथा भगवद्गीतायाम् उपदिष्टम्।

एतेषु सर्वेषु विचारणासु, प्रकृतिः स्वीयायाः संरचनायाः, स्वभावस्य, गुणानां च विशेषज्ञानं प्रदानं करोति। प्रकृतिः जीवनस्य नित्यविचारणीया, अद्भुता एव सर्वस्मिन् प्रतिष्ठिता। अतः, ऋग्वेदे प्रकृतिसंबंधित विचारणाः ।

ऋग्वेदे प्रकृतिचित्रणस्य अध्ययनात् अनेकानि महत्त्वपूर्णानि तत्त्वानि प्रकाशितानि। अत्र यत्तद् अनुशंगभेदात् प्रकृतिसंरक्षण, प्रकृतिस्वरूपम्, यज्ञक्रिया, देवतासंबंधः इत्यादीनि विषयानि स्पष्टतया उपस्थापितानि।

प्रथमतः, प्रकृतिस्वरूपम् अवलोकयन्तः ऋग्वेदे प्रकृतिः अनेकाभिर रूपैः वर्णिता। सा जगतः स्रष्ट्री, पालिनी तथा प्रलयकारिणी च अस्ति।

द्वितीयतः, प्रकृतिसंरक्षणम् आलोकयन्तः ऋग्वेदे प्रकृतिः जीवनस्य प्रमुखम् आधारभूतम् अस्ति। यज्ञक्रियायाः माध्यमेन प्रकृतिसंरक्षणम् साध्यम् इति ऋषिभिः प्रतिपादितम्।

तृतीयतः, यज्ञस्य स्वरूपम् एवं महत्त्वम् अवलोकयन्तः अनेके ऋषयः यज्ञक्रियाया प्रकृतिसंरक्षणस्य महत्त्वं जगदारे प्रतिष्ठापयामासुः। यज्ञः प्रकृतिरक्षया संरक्षणम्, जीवनरक्षणम्, देवता पूजनं तथा समाजस्य संरक्षणं प्रतिपादयति।

चतुर्थतः, प्रकृतिः देवतारूपेण वर्णिता। अत्र अग्नि, वायु, वरुण, उषस् इत्यादयः देवताः प्रकृतियाः विभिन्नांशाः सन्ति। ते सर्वे जीवनस्य संरक्षणे सहायकाः।

पञ्चमतः, प्रकृतिसंरक्षणे यज्ञस्य महत्त्वम् अवलोक्य प्रकृतिसंरक्षणस्य लक्ष्यं यज्ञः साधयति इति स्थिरीकृतम्।

सर्वम् इदं परिगृह्य ऋग्वेदे प्रकृतिः महत्त्वपूर्णा, संरक्षणीया, औपयिका च अस्ति। प्रकृतिः और यज्ञः, उभयं संयुगे संरक्षणस्य प्रमुख साधनं भवति। अस्माभिः यज्ञक्रियाया प्रकृतिसंरक्षणस्य च माध्यमेन संसारस्य संरक्षणम्, प्रशासनम् तथा संवृद्धिम् साधनीयम् अस्ति। एवं ऋग्वेदस्य प्रकृतिचित्रणम् अस्माभिः यथार्थतया अध्ययनं कृत्वा प्रकृतिसंरक्षणस्य महत्त्वं यज्ञक्रियाया च माध्यमेन तदुपायाः ज्ञातव्याः।

वक्तव्यम् अन्ते अस्माभिः वक्तव्यं यत् प्रकृतिः सर्वस्य जीवनस्य मूलं, आधारः तथा धर्मः च अस्ति। अस्माभिः ताम् आराध्य एवं संरक्ष्यमाना जीवनस्य संवृद्धिम्, संपादनीयम् अस्ति।

**शोधसंदर्भः**

1. प्राचीन ग्रंथाः

- ऋग्वेदः : विश्वबंधु, स., सम्पादकः। (1960). दिल्लीः मोतीलाल बनारसीदास प्रकाशन।
- यजुर्वेदः : देवीचन्द्र, जी., सम्पादकः। (1980). वाराणसीः छावनी प्रकाशन।
- सामवेदः : रघुवीर, प्र., सम्पादकः। (1990). मुम्बईः भारतीय विद्या भवन।
- अथर्ववेदः : शर्मा, अ., सम्पादकः। (2000). कोलकाताः आर्य प्रकाशन।

2. अन्ये संस्कृत ग्रंथाः

- प्रकृतिविचारः शुक्ल, वी. पी. (1975). प्रकृति चिंतन. लखनऊः अनुपाम प्रकाशन।
- वेदों में प्रकृतिः मिश्र, आ. श. (1985). वेदों में प्रकृतिवाद. वाराणसीः जयप्रकाश प्रकाशन

**संदर्भसूचीः**

*1. ऋग्वेदः : विश्वबंधु, स. (सम्पादकः). (1960). दिल्लीः मोतीलाल बनारसीदास प्रकाशन।*

2. *यजुर्वेदः : देवीचन्द्र, ज. (सम्पादकः). (1980). वाराणसीः छावनी प्रकाशन।*
3. *अथर्ववेदः : शर्मा, अ. (सम्पादकः). (2000). कोलकाताः आर्य प्रकाशन।*
4. *प्रकृतिविचारः : शुक्ल, वी. पी. (1975). प्रकृति चिंतन. लखनऊः अनुपम प्रकाशन।*
5. *वेदों में प्रकृतिः मिश्र, आ. श. (1985). वेदों में प्रकृतिवाद. वाराणसीः जयप्रकाश प्रकाशन।*
6. *सिंह, आ. व. (2003). ऋग्वेद में प्रकृति संवाद. वैदिक अध्ययन, 45(2), 35-42।*
7. *मिश्र, व. श. (2009). प्रकृतिर्ऋग्वेदे. आर्य ज्ञान, 12(1), 7-15।*

# 14

# वेदानां सामवेदोऽस्मि

*परड्डी मल्लिकार्जुनः*

गीतामहाभारतयोः संबन्धे गीताचार्यविषये धृतराष्ट्रसन्निधौ सञ्जयस्य सदैवोपरिस्थितेर्विषये चाभिप्रायभेदः स्वाभाविक एव। संस्कृत-वाङ्मयः समस्यागारमिति कथ्यते कैश्चित।

**कवीनां चरितं प्रायः स्पष्टरीत्या न शक्यते।**
**वक्तुं गीतादितात्पर्यं सर्वं तमसि मज्जते।।**

भगवद्गीताया दशमाध्याये द्वाविंशतितमे श्लोके यदुक्तं तत्त चर्चास्पदं भवति। आत्मनो विभूति वर्णयन् भगवान श्रीकृष्णोऽर्जुनं प्रति वक्ति-

**''वेदानां सामवेदाऽस्मीति।''**

तेन प्रथममेवोक्तं यत् वेदास्त्रय इति-

**''त्रैविद्याः सोमपाः पूतपापाः।''**

**''एवं त्रयीमार्गमनुप्रपन्ना।**
**गतागतं कामकामा लभन्ते।''**

तत्संदर्भे ऋग्वेदस्य प्रथमस्थानं तेनैव निर्दिष्टम्-

**ऋक् साम यजुरेव च। (भ.गी. 10,17)**

**अमरकोषोऽपि वेदत्रयमेवांगी करोति-**

**''वेदास्त्रयी'' इति।**

''सत्येवं यदा गीतायां'' वेदानां सामवेदोऽस्मीति सामवेदश्रेष्ठतां दर्शयति, कस्य नाश्चर्यकारकमेतत्? समस्यानेन सहजमेवाविर्भवति।

सामान्यतया चतुर्णा वेदानामुल्लेख इत्थं क्रियते।

**ऋग्वेदः सामवेदश्चत्वार उच्यन्ते चतुराननिर्गताः।।**

तेषां ऋग्वेदो विश्वसाहित्ये प्रथमोपलब्धः ग्रन्थ इति कीर्ति- भागस्ति। एवं-

**महत्ताकालयोगेन ऋग्वेदश्रेष्टता यदा।**

**सामवेदः पुनः श्रेष्ठः, समस्या गुरुतरा तदा।।**

**"ऋग्वेदः श्रेष्ठो वेद"**[1] इति विदुषामभिप्रायः। यदा मनुस्मृतौ पठामः यत्-

**ऋग्वेदो दैवदैवत्यो यजुर्वेदो तु मानुषः।**

**सामवेदः स्मृतः पित्र्यस्तस्मात्तस्या शुचर्ध्वनिः।।**

**तदेयं समस्या गुरुतरा भवति।**[2]

अवस्थायामस्यां सामवेदश्रेष्ठता कथमङ्गीकार्या? सामवेदस्था ऋचः प्रायः ऋग्वेदादेवाद्धृत्ता भवन्ति। सामवेदस्य पृथगस्तित्वं नापि सम्भवति। श्लोकमेनं पठित्वा कति विद्वांसो वदन्ति यत् गीताचार्यः सामवेदी ब्राह्मण आसीत्। यतस्तेनात्मनःसामवेदं प्रति पक्षपातः दर्शितः तेषामभिमते-

**साम्नां च पक्षपातेन सामवेदी द्विजोत्तमः।**

**देवकीपुत्रतामातः कृष्णो भागवतोत्तम।।**

किन्तु येन ब्रह्मज्ञानं विना वेदज्ञानमपूर्णं, वेदोक्तयज्ञक्रिया निष्फलाऽस्थिराचेति मन्यते, येनोपनिषदां सारं वेदान्तहृदयमेव गीतायां निक्षिप्तवान् स भगवान् कथं सामवेदी द्विजो भवति। यदुकुलोत्पन्नः क्षत्रियो वासुदेवः देवकीनन्दनः विष्णोरवतार एव गीताचार्य इति हिन्दूनां प्रायो मतैक्यम्। अतो गीताचार्यस्य कृष्णस्य सामवेदित्वकल्पनाऽसंगता तस्य व्यासस्यापि सामवेदित्वं न सिद्धयति। चतुर्वेदान् विव्यासेति कथनात्।

महाभारतस्यानुशासनपर्वणि सामवेदमाहात्म्यं गीयते-

**सामवेदश्च वेदानां यजुषां शतरुद्रियम्।**

ऋग्वेदस्य तात्त्विकी श्रेष्ठतां गणयन् मनुः सामवेदस्य व्यवहारिक- महत्त्वं न गणितानिति मतिरस्माकम्। यथा-

**तात्त्विकी श्रेष्ठता नास्ति सामवेदस्य यद्यपि।**

**महत्त्वं व्यवहारे यत् अपाकर्तुं न शक्यते।।**

कति प्राचीनोपनिषदः गीताया अपि पूर्वमेव रचिता इति मन्यते चेत्, सामवेदश्रेष्ठताकल्पना पुरातनैव भाति। यतः शतपथब्राह्मणे[3] छान्दोग्योपनिषदि च सामवेदस्य माहात्म्यं वर्णितमस्ति[4]। अतः सामवेदमाहात्म्यगणनातीव पुरातना भाति।

किन्तु ऋग्वेदे सत्यपि सामवेदश्रेष्ठता किमर्थं गण्यते? ऋग्वेदस्य ऋचः सामवेदसंगीतशास्त्रदृशा निबद्धा गीतयोग्या सन्ति[5] । अत्रावगन्तव्यं यद् भक्तियोगं संगीतस्य प्रमुखस्थानं भवतीति। सामान्यतया संगीतं सर्वेभ्यो अपि रोचते।

शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं पशुः। इति न्यायात्। ये केऽप्यौरंगजेबस्य भ्रातरो गीतवैरिणः।

शिशुभ्यश्च पशुभ्यश्च तरुभ्यश्चापि तेऽवराः। अत एव कालिदासीय शाकुन्तलप्रस्तावनायामुक्तं यत्-

**''तवास्मि गीतरागेण हारिणा प्रसंभ हृतः।''**

ते नैव कविगुरुणोक्तं रघुवंशे लवकुशगानप्रसंगे यत्-

**''तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ।**
**हिमनिस्यन्दिनी प्रातः निर्वातेव वनस्थली।।''**

गीतश्रवणेन मनःशुद्धिः संपद्यते। भक्तिरसैका भावना स्थिरा भवति।

**भक्तस्य मानसं प्रायः देवलीनं भविष्यति।**
**श्रयन्ते च यदा गीता देवदेवस्य कीर्तयः।।**

**''मद्भक्ता यत्र तिष्ठन्ति तत्र तिष्ठामि पार्वति।''** इत्युक्त्वा महादेवे नापि संगीतप्रियता व्यक्तीकृता। नारायणीयधर्मे नारदेन विष्णोः संगीतलोलुपता दर्शिता- ''वेदेषु च पुराणेषु सांगोपांगेषु गीयते''।

स्थिरभक्तियोगसुलभः शङ्कर इति कालिदासेन यदुक्तं तेनेदमेव सुव्यक्तं भवति। ईश्वरं प्रीणातुं सगीतमेव सुलभासाधनम्। संगीतश्रवणेन यदा कदापि कामोद्रेकमपि भवति। तेन मानवः पशुरेव भवति। किन्तु तदेव मोक्षदायकं ईश्वरसाक्षात्कारणं भवति यदा ईश्वरं प्रति युज्यते।

भक्तिगीतपठनं साधनैव, यतोऽनया साधनया देवदेवः प्रसन्नो भवति।

''प्रणवः सर्ववेदेषु''[6] ''वेदानां सामवेदोऽस्मि'' इति वाक्ये विरुद्धे इति न ज्ञायतां यतः प्रणवनामको वेदो नास्ति।

''ईश्वरो वेदप्रियो नास्ति, नादप्रियो नास्ति'' इति उक्तवता श्रीबसवेश्वरेण शिवशरण्यवरेण भक्तिप्रामुख्यं दर्शितम्। यथ-

**''वेदानां सामवेदोऽहं इतीयं वाक् कदाचन।**
**नाभिप्रायान्तरं नूनं जनयेद् गीतशंसिनी।।''**

**संदर्भ :**


1. *John Davis, Bhagavadgita, 1954, P.66.*
2. *It is curious to notice that in Manu IV 124, the Sound of the Saman is said to convey a notion of impurity owing to their connection with the Pitrs.*
3. *शतपथब्राह्मण XII, 8, 3, 23.*
4. *This veda receives special honour in chandogya upanisad i I, as bing the essence of the Rgveda, from which nearly all its verses are derived.*

   *W. Douglas. P.Hi 4, Bhagavadgita P.159.*
5. *The fact that its verses were chanted also gave is special value.*

   *W. Douglas. P.Hi 4, Bhagavadgita & also.*

*The Samaveda was espcially honoured by some of the Brahmins because its hymns were arranged for chanting in religious rites.*

*Jhon.Davis,, Bhagavadgita P.66.*

6. *ओंकारः सर्ववेदानामिति अनुगीतायामपि एतदेव सूचितम् ।*

# 15

# ऋग्वैदिकसोमस्य प्रत्यभिज्ञान-विमर्शः

*कैलाशनाथद्विवेदी*

ऋग्वेदोऽस्ति समस्तसंसारस्य पुरातनज्ञानविज्ञानधर्मदर्शनादि तत्त्वानामक्षयो निधिः। अस्मिन् प्राकृतिकवनस्पतेश्चारुसमृद्धिरपि वर्णिता मनीषिभिः। वैदिकयुगीनसप्तसिन्धुप्रदेशे सदाहरितवनराजिमध्ये विविधवृक्षलता-तृणगुल्मादिषु सोमस्य महत्त्वं सर्वाधिकमासीत्। यतो वैदिकयज्ञेषु सोमह-विर्निर्मितयेऽस्य पादपस्य प्रयोगोऽभवत्। स्थाने ऋग्वेदस्य नवममण्डलेऽन्यमण्डलानां च षट्सूक्तेषु सोमस्य प्रशस्तिः कृता वर्तते।

**सोमस्य स्वरूपम्**

अस्य पादपस्य शाखा वृन्ता वाऽरुण[1]बभ्रु[2] हरितः[3] कथ्यन्ते। हिलेब्राण्ट-मतानुसारेण[4] यद्यस्योपाधिः 'नैंचाशाखः[5] तथ्ययुक्तोऽस्ति, तर्हि शाखा अस्य अधोलम्ब माना अभवन्। सोमांकुरः 'अंशुः[6] स्कन्ध पूर्वन्[7] (यो वृत्ताकारो न भूत्वा कोणवद[8]भवत्। समस्तपादपश्चः, अन्धस्[9]; इति कथ्यते, योऽस्य रसस्य द्योतको[10]ऽस्ति।

प्रतीयते, पादपोऽयं प्रायः पर्वतेषु बभूव। ऋग्वेदस्य ऋचः तथ्यमिदं प्रमाणीकुर्वन्ति यथा-

सोमस्येव मौजवत भक्षो।' (ऋक्./10।34।1) पण्डितो दामोदरः सातवलेकरः मौजवत-प्रभृति पर्वतेषु 8 सहस्रीत्तुंगतायां सोमोत्पत्ति (स्वीकरोति। ऋग्वेदे 1।93।6, 3।48।2, ।43।4, 85।2, ।9।17।1; 47।1, 9।62।4, 63।27, 31 10।34।1) अनेकस्थलेषु सोमोत्पत्तिः मूजवत्पर्वते प्रसिद्धासीत्। अस्मिन् प्रसङ्गेऽधोलिखितानां पाश्चात्यपौरस्त्यगवेषक-विदुषां शोधपूर्णानि मतानि विचारणीयानि सन्ति -

रैप्सनः काश्मीरोपत्यकायाः सोमोत्पादकं दक्षिणपश्चिम क्षेत्रं मृजवत्पर्वतीयक्षेत्रेण सह समीकरोति।[11]

डॉ. राधाकुमुदमुकर्जी सोमोत्पादकं क्षेत्रं कुहा (कुभा) तटं मनुते[12] डॉ. वासुदेवशरणाग्रवालो वक्षुनद्या दक्षिणे मुज्जान-क्षेत्रं सोमोत्पत्तिक्षेत्रमिति स्वीकरोति[13]।

वस्तुतो मुज्जानक्षेत्रं मूजवन्तादभिन्नं हिन्दुकुशपर्वतीयक्षेत्रमेवऽस्ति।

**सोमस्य उपयोगविधिः**

सोमपादपः सर्वप्रथमं व्यवहारार्थ प्रस्तररूलूखले निधाय कुट्टयते स्म। कुट्टनार्थ प्रस्तरा ग्रावा[14] अद्रि[15] रिति संज्ञका आसन्। यदा कदा प्रस्तराणां स्थाने मुसलोलूखलौ व्यवह्रियेते स्म[16]। प्रतीयते, प्रथेयम्पारसिकी आसीत् वैदिककाले चाल्पप्रचलिता वभूव। अधिकरसप्राप्त्यै पादपोऽयं कदाचित् जलार्द्रः[17] क्रियते स्म। अस्य परिष्कारार्थं रन्ध्रवत्याः परिष्कारिण्या लोकभाषायां चलन्याः प्रयोगो बभूव।

पावनः सोमः दुग्धेन दध्ना, यवसेन मिश्रयित्वा सह प्रयुज्यतेस्म। पुरुषार्थिभिः पुरुषैः प्रियतमपेयरूपेण दैनिकजीवने। सोमस्य विविधानि मिश्रितपेयानि प्रचस् वासस् अत्क अभिश्री रसादिसंज्ञकानि लाक्षीणिक[18] नामभिरपि ख्याताति।

प्रतीयतै, आर्याः सोमस्य जीवनोपयोगिनैकगुणान् (रोगनाशकत्वं बलायुःस्फूर्तिज्ञानवर्धकत्वञ्च) अवलोक्य प्रतिदिनं तस्य विविधरूपेषु प्रयोगमकार्षुः। सोमस्य सेवनेनार्याः स्वस्थजीवनं लब्ध्वा शतायुष्मन्तः परमपुरुषार्थमधिगतवन्तः।

**सोमोत्पत्तेरनुकूलदशा**

ऋग्वेदस्यार्नेकसन्दर्भैः ज्ञायते यत् सोमः ससैन्धव प्रदेशस्य पर्वतीयभूभागेषु[19] यत्र वर्षा पर्याप्तमात्रायां भवति स्म प्रादुर्बभूव पर्वतेषु सोमः जल सततं वर्धमान आसीत्। यथोक्तमृग्वेदे-

''असाव्यंशर्मदायाप्सु वक्षो गिरष्ठा-ऋक्. 9।62।4

पृथिव्या अधिसानवि............ ऋक्. 9।63।27

''वर्जिष्ठे अधिसानवि ..............। ऋक्. 9।31।5

''यददि्भः परिषिच्यसे ...............। ऋक्. 9।67।6

पर्वतीयप्रदेशे प्रायः जलाभावे वर्षाभावेन वा जलेन सिच्यते स्म सोमः सम्बर्धनार्थम्। (यथा-यददि्भः परिषिच्यते। ऋक्. 6।67।6)

समनुकूल प्राकृतिकदशाभिः सोमः मूजवत[20] परावताववित शर्यणावत क्षेत्रेषु[21] प्रादुर्भूव ऋग्वैदिक काले।

**सोम प्रत्यभिज्ञानम्**

सोमस्य प्रत्यभिज्ञानविषयेऽधोलिखितानां पाश्चात्य पौरस्त्यविदुषां गवेषणापूर्णानि मतानि विचारणीयानि सन्ति-

पश्चात्यविद्वांसौ सासन[22] मूइरौ[23] सोमं Sar costemma-Viminale Asilepias acida (Sar Costema brevistigma) वा वनस्पतिरिति स्वीकुरुत।

राथस्य[24] विचारेण सोमः Sarcostema acidum नाम्न्याः वनस्पतेः प्रकृत्याऽधिक समानोऽस्ति। मैक्समूलर आर.एल. मित्रौ इमं यवसुरारूपे

मत्वा सोमपादपं Humulas-Lupulus वनस्पतेरभिन्नं प्रतिपादयतः[25] वेदाधीती वाटः सौमं अश्वकानक्षेत्रीय द्राक्षारसः (Sarcostema brestigma) मनुते, राइसश्चायमिक्षुरसः इति स्वीकरोति[26]।

डॉ. मायर्सः सोमं इफिड्रा बलगेरिक वनस्पतिरिति प्रतिपादयति। अमेरिकादेशस्य सुप्रसिद्धःकवक शास्त्री रिचर्डगार्डनवासन[27]। सोमं कवक जातीयामानिता मस्करियावनस्पतिना समं समीकरोति, या कुक्कुर मूत्रीय जातेरस्ति।

पौरस्त्यविद्वत्सु-डॉ. रामनाथ चौपड़ा सोमं गिलोयजातोटो नोस्पोरा कार्डीफोलिया रूटा ग्रावेओ लेंस वनस्पतिरिति मुनुते।

डॉ. उस्मान अली नारायणः स्वामी च सोम सिरोपेजियेति वनस्पतिदिति स्वीकुरुतः। निरञ्चनचन्द्रशाहः ऋग्वेदे वर्णितं सोमं गुणाधारेण अमानितामस्करियायाः क्षारीयं तत्त्वं प्राप्यामुं पलाई एगोरिकात् कवकात् लोकभाषाव्हतकुकुरमुत्ताजातेरभिन्नं प्रतिपादयति[28]।

श्रीमजनसिंह शतपथब्राह्मणे किरातानां स्थानीय भाजायां सोम-मसनोसनाशब्देन व्यवह्नियमाणं प्राप्य मूलेऽस्य 'शण' शब्दस्य समानार्थिनी कन्नं शब्दं गृहीत्वा भगादभिन्नं स्वीकरोति, यस्याऽपिवणं हरित्पीत स्वर्णिमञ्च भवति।

**समीक्षा**

ऋग्वेदे वर्णित सोमस्य गुणान् आयुः ज्ञान बल स्फूर्तिवर्धक रोगवाशका दीन अस्य सेवनविधिं (प्रस्तरे, कुटित्वा, रन्ध्रवत्या परिष्कृत्य फल बीज मूलरहित

सिरस (छत्र) अमसुञ्च) दृष्टिप्रथमवधार्यै व पाश्चात्य पौरस्त्यविद्वदभिः सोमः सुराद्राक्षेक्षु भंगकवादिभिः समं समीकृतः किन्तु अमीजां सभीकरणप्रयासोऽसमीचीनः प्रतीयते यतः एतेजां समीकृत खत्तत्पदार्थेषु सोमस्य गुणसाम्यं सर्वथा न संलक्ष्यते।

रिवर्डगार्डनवासनेन गवेषितस्य कवकजातोयस्य अमानिता मस्करयायाः (फ्लाई एगेरिक स्य वा) यद्यपि बाह्यस्वरूपः ऋग्वेदे (1।84।8) समुल्लेखः पृथगेव वर्तते, कोमलतामवधार्यं इमं सोमाद्विषमगुणयुक्तं प्राप्नुमो वयम्। सेवनात्पूर्वं सोमः प्रस्तरेण पेषणार्थं उलूखले कुट्टयते स्म। अतएवाऽस्य कोमलतायाः स्थाने कठोरतैव अनुमीयते। अनने विजया भगोवा।[29] सोमवत् प्रतीयते पेषणीये पेयपदार्थरूपे।

यदि सोमः फ्लाईएगेरिक (अमानिता मस्करिया) वनस्पतेः कवक जातेभिन्नः कोपि पादपोऽस्ति, तर्हि स सोमेनावश्यमेव समीकर्त्तव्यः।

अस्मदीयावधारणाऽस्ति यत् ऋग्वैदिकयुगस्य सप्तसिन्धुप्रदेशस्य स्थलीयस्वरूपे जलवाय्वादि प्राकृतिकदशासु च प्रभूतपरिवर्तनेन[30] ऋग्वेदे ईदृशः संकेतः आभासो वा प्राप्यते, (यत्) वास्तविकसोमः मूलरूपे तस्मिन् युगेऽपि दुर्लभः आसीत्[31]। अस्य तथ्यस्य प्रमाणं परवर्तिवैदिक साहित्ये[32] उल्लिखतेन पूतीकपदेनापि प्राप्यते।

प्रतीयेते, पूतीकः सोमस्य स्थानापन्न पादपोऽस्ति, यः गुलेण्डिना-बाण्डिकात् बेसेला कार्डीयाफोलिया वनस्पतेर्वाऽभिन्नः स्वीकृतोऽस्ति वनस्पतिशास्त्रिभिः[33]।

अतएव साम्प्रतमपि सोमस्य पूर्णतया प्रत्यभिज्ञानं स्वरूपगतं सुनिश्चितं समीकणं वा केनचित् विशिष्टवनस्पतिना सह कर्त्तु न शक्यते; तथाप्याशास्यते यत् ऋग्वैदिकयुगस्य अस्य महत्त्वपूर्ण वनस्पतेरविलम्बमेव सत्यप्रत्यभिज्ञानं सततानुसन्धानेने वनस्पतिशास्त्रविद्भिः करिष्यते, येन पुनरपि सोमपादपं परिचिन्वन्तो जनाः जीवने परमलाभान्विताः स्युः। वस्तुतः सोमस्य गवेषणायां साफल्ये वैज्ञानिक वनस्पतिज्ञानां महप्युपलब्धिः भवित्यति।

**संदर्भ :**

1. *ऋग्वेदे 9।92।1*

2. *ऋक् 7।9।1, 10।94।3, 8।144।5*

3. ऋक् 9 ।42 ।1 वसानो गा हरिः ।

4. वैदिक माइथोलाजी 1 ।14 ।18, 1 ।241, 244

5. ऋक् 3 ।53 ।14

6. ऋक् 1 ।168 ।3, 3 ।48 ।2

7. ऋक् 1 ।9 ।1

8. ऋक् 4 ।20 ।4

9. ऋक् 1 ।28 ।7, 3 ।48 ।1, 4 ।16 ।1

10. ऋके. 2 ।14 ।1, 19 ।135 ।1

11. जीम ब्ंउइतपकहम भ्पेजवतल व ि प्दकपं टवस 1ए 1962ए च्ण 72ण

12. हिन्दूसभ्यता, 19-66 दिल्ली पृष्ठ 86

13. - तदेव पृ. 86 (अनुवादकस्य टिप्पणी)

14. ऋग्वेद 1 ।83 ।6, 135 ।7

15. ऋक्. 1 ।130 ।2, 135 ।5, 137 ।1

16. ऋक्. 1 ।28 (मुसल-मन्था;) ऋक् 10 ।101 ।11 (उलूखल)

17. ऋक्. 9 ।74 ।9

18. ऋक्. 3 ।30 ।1, 9 ।46.3, 66 ।23 (प्रचस्) 9 ।79 ।5, 86 ।27 (अभिश्री), ऋक्. 9 ।69 ।5 वासस् ऋक्. 9 ।69 ।4 (अत्क)

19. ऋक्. 9 ।113 ।2 मंत्रमिममाधारीकृता डॉ. सूर्यकान्तः सोमोत्पत्तिः ऋजीकपर्वते प्रतिपादयति द्रष्टव्या सम्मेलन पत्रिका सं. 2012 वि.पृ. 92

20. ऋग्वेदे-10 ।34 ।1 सोमस्येव मोजवतस्य भक्षो ।

21. ऋग्त. 9 ।65 ।22 । ये सोमासः परावति ये अर्वावति ............. ये शर्यणावति

22. इण्डिचेद आल्टरथुम्स कुण्डे, 12, 231 ।

23. संस्कृत टैस्ट्स 5, 561, परश्च ।

24. सीक्रिफ्ट गेसेलस्केफ्ट, 35, 680 ।

25. वैदिक इण्डेक्स, द्वितीय भागः, पृ. 554 ।

26 वेदिशे माइथोलाजी, 17, वैदिक इण्डेक्स, द्वितीयोभागः पृ. 454 ।

27. धर्मयुगसाप्ताहिके; द्रष्टव्यः ऋग्वेद का सामे, शीर्षक लेखः, 3 जून, 1973 पृ.

28. तदेव, शोधलेखः साप्पताहिके धर्मयुगे, 3-6-73, पृ. 23

आर्यों का आदिनवास-मध्य हिमालय, 1968, प्रयान पृ. 93 ।

*29. द्रष्टव्योऽस्मद्रीधशोधग्रन्थः सप्तसेंधवप्रदेश, (ऋग्वैदिक भूगोल)। साहित्यः निकेतनं, कर्णपुरम, 1985, पृष्ठ 64-69।*

*30. हावडा संस्कृत समाजन 27,28/12-87 दिनांङ्के समायोजिते निखिल-भारतसंस्कृतमहासम्मेलने वैदिक विभागे लेखकेन प्रस्तुतमस्मिन् विषये शोधपत्रं यदभवत् बहुचर्चितं विचारितञ्च। सम्नेलनस्य मुख्यातिथिः प्राक्तनकेन्द्रीय मंत्री डॉ. कर्णसिंहः आसीत्।*

*31. ऋक. 10।75।3 सोमं मन्यते पपिवान्यत् संपिजां योषधिम्। सोमं यं ब्रह्माणों विदुर्न तस्याश्नाति कश्चन्।।*

*32. काठकसंहिता- 34।3, शतपथब्रा. 14।12।12, पंचविंश ब्रा. 8।*

*33. वैदिक इण्डेक्स, द्वितीयो भागः रामकुमार राय, पृ. 13।*

# 16

# भारतीयशिक्षायां वेदस्योपयोगिता

*देवेन्द्रनाथपाण्डेयः*

आधुनिकभारतीया शिक्षा वेदविज्ञानविहीना तथैव न शोभते यथा कश्चिदधमर्णः उत्तमर्णाद् गृहीतधनेन स्वाभिख्यां प्रदर्शयंल्लोके न शोभते।

वैदिकवाङ्मयस्य सर्वविषयव्यापकत्वमवलोक्य भारतस्य वर्तमान-शिक्षा योगस्य प्रवेशो भारतीयसंस्कृतिरक्षणायात्यावश्यकतत्त्वेष्वन्यतमो, अतो हेतोः आधुनिकभारतनिर्माणव्यवसायव्यस्तैः विविधविद्याविद्योतितान्तकरणैः विद्वद्भिः श्रुतिसाहित्यंकुलस्य सम्यग्गवेषणां विधाय भारतस्य विकासायास्य वैज्ञानिकानि तत्त्वानि प्रकाश्य भारतभूमिचिह्नभूतस्यातिप्राचीनतमवैज्ञानिकसाहित्यस्याधुनिक-शिक्षायामनिवार्यरूपेणाध्ययनाध्यापनस्थानं निर्धारणीयं येनास्माकमाधुनिके भारतेऽत्याधुनिक-पाश्चात्त्यशिक्षामवाप्तुं चेष्टामानाः छात्राः स्वसंस्कृतेः सभ्यतायाश्च वैशिष्ट्यादनभिज्ञाः न भवेयुः। तेभ्यः छात्रेभ्यः इदानीं भारतीयसंस्कृतेः परिचयप्रदायकानि कतिपयानि रामायण-महाभारत-सम्बद्धानि संकलितानि पद्यानि, यथाकथञ्चित् पाठ्यन्ते, येन ते छात्राः तद्गतवैज्ञानिकतत्त्वान्वेषणे न प्रभवन्ति। तेषाञ्चारम्भिकशिक्षासंस्कारे पाश्चात्त्यसंस्कृतिप्रचारिकाङ्ग्लभाषा स्थानं लभते यस्याकर्णपरिणतिरद्यास्माकं समाजेऽवलोक्यते। अद्य भारतीयनागरिकेषु नैतिकन्यूनत्त्वन्नितरां विलोक्यते; यद्वैदिक-वाङ्मयशिक्षणाभावादेवेति मन्ये। अतः ''सर्वं वेदात् प्रसिध्यति'' इति ऋषिवाक्यगतस्य वैज्ञानिको भावः तदैव सार्थकत्वं भजिष्यते यदास्माकं भारतस्य भविष्णवः छात्रा माध्यमिककक्षास्वेव वैदिकविज्ञानेन परिचिता भविष्यन्ति। अत्र सर्वकारस्य सौजन्यं, शिक्षामर्मज्ञानां भारतीयां संस्कृतिं प्रति निष्ठावतां विविधविधप्रशासनिकपदमलङ्कुर्वतां विशेषरूपेण संस्कृतसाहित्यसेवासुधास्वादस्वादूनां सुधीनां, विभिन्नविश्वविद्यालय- स्थानां

विभागाध्यक्षाणाञ्च नैकविधाः सफलप्रवृत्तिजनकाः प्रयासा अभीप्सितं राधयिष्यन्ति। कथमिदं वैदिकसाहित्यं भारतभूमिमुर्वरां विधास्यतीति-

अत्र मम मनसो मीमांसाऽस्ति यन्मेदिन्यां मानवस्य मस्तिष्कविशेष-विशेषमृत्तिकानिर्मितमहीखण्डनिवाससंर्गादितरभूनिवासकृतात् नराद्विशिष्यते। तन्मृत्तिकानिवासविशेषादेवैको मानवसमुदायोऽन्यमानवसमुदायाद्भिन्नोऽवलोक्यते। तथैव प्राकृतिकपरिवेशविशेषश्रयत्वान्नैकेदेशाः संसारे परस्परं भिन्नाः इति सिद्धम्। अतोऽस्माकं भारतमपि पाश्चात्त्यप्राकृतिकपरिवेशोत्पन्नेभ्यो देशेभ्यः प्रकृत्या भिन्नम्। इमामार्यावर्त्तधरां धर्मप्रतिपादकयज्ञानुष्ठानोद्‌भूतधूमजन्यजलधरजलं सर्वदैव सस्यश्यामलामकरोदतोऽत्र राजते भारतीयत्वस्याधिष्ठात्रीभारतीदेवी प्राकृतमयी, इयमेव भारतं भासयति भूतले। परन्त्वस्याभिप्रायोऽयं नास्ति यत्प्रेयोमार्गानुवर्त्तिनः पाश्चात्त्याः जना भारतीयेभ्यो हीना अविकसितबुद्धयो वा; परन्त्वत्राभिप्रायोऽयमस्ति यद्यस्य देशस्य यादृशी प्रकृतिर्भवति तदनुसारेण तत्रस्थं ज्ञानविज्ञानं विकसते यतोहि विज्ञानवल्लरी तु प्रकृतिपादपमेवावलम्बते तस्याः प्रकृतेः अवस्था-विशेषमेव विज्ञानं विश्लेषयति यस्यां प्राकृतिकावस्थायां तद्विज्ञानबीजं तिष्ठति। तत्प्रकृत्यनुसारेण नूतनं तत्त्वमन्विष्यति वर्द्धयति च। अतो नानाविधेषु विश्वं व्याप्य स्थितेषु देशेषु नानाप्रकृतिविशिष्टावस्था विज्ञानानि च सन्ति। सर्वे देशाः स्व-स्वप्रकृत्यनुसारेण ज्ञान-विज्ञानक्षेत्रे विकासं कुर्वन्तो दृश्यन्तेऽतो भारतीयसंस्कृतिगतविज्ञानसूत्र मनुज्झित्यास्माकमपि देशस्य विकासो भविष्यति; तच्च सूत्रं श्रुतौ निहितमतोऽस्य वैदिकवाङ्मयस्याध्यापनंमावश्यकमस्ति। भारतस्य विकासावरोधे वित्तदौर्बल्यं यदुच्यते तन्न भारतस्य दौर्बल्यं प्रत्युदस्माकं भावनादौर्बल्यमस्तीति मन्ये।

यावत्कालपर्यन्तं भारतीयेषु आत्मसम्मानाङ्कुरस्फुरणे न भवतः तथा च स्वकीयवैदिकवाङ्मय एव विज्ञानतत्त्वान्वेषणप्रवृत्तिर्न जागर्ति तावत्ते भारते स्वतन्त्ररूपेण वसन्तोऽपि सर्वविधविकासप्रासादे वैदेशिकीमेव तकनीकि शिक्षावधूमाश्लिष्यन्ति, सर्वञ्च स्वपौरुषप्रभावं पाश्चात्त्यप्रकृतिप्रांगणप्रमार्जन एव दर्शयिष्यन्ति। विकसिताश्च ते पाश्चात्यदेशाः पिशाचवदाचरन्तः, मानवजाति-जीवनाहुतिप्रदपरमाणुशस्त्रसंघातसमुत्पादनेन लब्धप्रतिष्ठाः संसारे दरीदृश्यन्ते। वयमपि भारतीयाः, तेषामेव द्वाराणि समुपगन्तुकामाः प्रभवामः। सर्वत्रैव तेषां विज्ञानसूत्राणि आधारीकृत्य शोधकार्ये कृतप्रयासाः भारतीया वैज्ञानिका विलोक्यन्ते।

अनेनानुधावनविधिना विज्ञानक्षेत्रे पाश्चात्त्यवैज्ञानिकोच्छिष्टसंसेवनेन विविधविधविज्ञानविकासे तोषदं स्थानं नावाप्तुं क्षंस्यन्तेऽतोऽस्यौषधं वैदिकविज्ञानवाङ्मयस्य माध्यमिककक्षातः स्नातकोत्तरकक्षां यावदनिवार्यरूपेणाध्ययनाध्यापने स्तः।

अत्र प्रसंगानुसारेण वैदिकसाहित्यवैशिष्ट्यविषये किञ्चिदुपस्थाप्यते नूत्नं परिशीलनम्-

वेदस्य परिभाषास्तु पूर्वपाश्चात्त्यविपश्चिद्वर्यैर्नेकविधाः प्रोक्ताः सन्ति तस्मात्खलु परिभाषावर्णनं विहायाधुनिकविज्ञानदृष्ट्याऽस्य वेदविज्ञानस्य विश्लेषणं वेदविज्ञानोदयोद्देश्यभूतस्य कर्मकाण्डभागस्य प्राधान्यं, महद् वैज्ञानिकत्वञ्च यथाकल्पितं वर्णयामि। वेदा हि यज्ञार्थमभिप्रवृत्ता इत्येषोक्तिर्वेदे यज्ञतत्त्ववैशिष्ट्यं तनोति; तथा चाधुनिकलोकरञ्जनायास्य यज्ञस्य प्राधान्यमपि दर्शयति। अस्य निबन्धानुसारेण वेद एकः सूर्योऽस्ति यस्यानेकेषु किरणेषु त्रय एव ज्ञानकाण्ड-कर्मकाण्ड- विज्ञानकाण्डात्मकाः प्रधानाः कराः सम्पूर्णसंसारस्य सर्वविधव्यवहारमात्मसात्कृत्यालौकिकाध्यात्मिकवैज्ञानिकं महत्त्वं बिभर्ति। अत एवोक्तं वेदोऽखिलो धर्ममूलमिति। यद्यपि वेदः ज्ञानमित्यनर्थान्तरं तथापि व्यवहारनिर्वाहार्थं वेदः पृथक्ज्ञानकाण्डरूपेण खल्वस्माकंपुरःपतति। यतो हि दर्शन-भक्ति-योगात्मिककालौकिकधारा लोकस्य चरमपुरुषार्थत्वं राधयितुं पृथिव्यां वेदादेवागत्य पुनन्ति प्राणिनः। केचनाधुनिकविज्ञानविभागा अपि कर्मकाण्डस्यैव प्रपञ्चरूपाः सन्तीति जाने। अर्थात् एकस्मिन्नेव कर्मकाण्डे ज्ञानविज्ञानयोरैक्यं निहितं विद्यते तथापि व्यवहारसौकर्यात्कर्मकाण्डादिस्वरूपं वेददेवस्य हि पृथगुक्तमस्तीति।

भगवतः वेदस्य यज्ञात्मकं स्वरूपं वैज्ञानिकं प्रतीयते। अस्मादेव कारणात् वेदत्रय्यामपि सर्वप्रथमं यज्ञस्यैव वृत्तान्तोपवर्णनमुपलभ्यते। पुनश्चास्य कर्मकाण्डात्मकस्य किरणस्य समाज-धर्म-विज्ञानात्मकाः उपविभागाः समस्तेऽस्मिन्संसारे समाजशास्त्र-धर्म-शास्त्रविज्ञान-शास्त्र-रूपेषु परिणमन्ति।

समाजशास्त्रीयं खण्डं व्यावहारिकव्यवस्थायै महत्त्वं बिभर्ति, यतोहि सर्वे समाजशास्त्रसंकायस्य (इतिहास-भूगोल-राजनीति-अर्थ-कलादीनाम्) विषया गुम्फिता वर्तन्ते। ज्ञानकरस्य तु लौकिकक्षेत्रे साधारणज्ञानप्रकाशनाय महत्त्वमनुमीयते यथा ''अहं ब्रह्म'' शिवोऽहमिति खल्वसाधारणं ज्ञानम्। लोकं वेद्मि,

अमुककलां विद्यां वा जानामीति साधारणम्। अत्रैवाहमिति पदार्थस्य वैशिष्ट्यान्मायास्वरूपमपि मानवैरनुभूयते यथामहायज्ञः, अहं सुखी, अहं दुःखी, अयं मम पुत्रः, इदं ममेत्यादि। आधुनिकमनोविज्ञानस्याप्यन्तर्भावः यज्ञविज्ञानखण्ड एव भवितुमर्हति। अतः वेदपदार्थः लोकनिर्वाहहेतोरात्मानं कर्मकाण्डत्मकमेव रूपं लोके दर्शयति। अत एव वेदस्य कर्मकाण्डं सर्वविधं महत्त्वं बिभर्ति। धर्मरूपं कर्मकाण्डमेव विशुद्धविज्ञानतत्त्वरूपेण लोके सर्वत्रैव व्याप्तं विद्यते। कर्मकाण्ड एव भौतिक-रसायन-जीवविज्ञानसूत्रोपलब्धिः दरीदृश्यते। अस्मादेव कारणात् यज्ञो वै श्रेष्ठतमं कर्म यज्ञो वै विष्णुः ''विष्णुर्वै यज्ञः'' इत्यादिवाक्यानां परिशीलनेन यज्ञात्मकस्य कृत्यस्याभ्यर्हणीयत्वं ज्ञायते। अस्य श्रेष्ठत्वञ्च तन्निहितसात्त्विकधारणामेव विलोक्य पूर्वाचार्यैः प्रतिपादितम्। वैदिकमंत्राणां सामान्यासामान्यार्थो भवतः, अतः वैदिकमंत्राणां सामान्यार्थैः समं विज्ञानतत्त्वानुकूला अपि अर्थाः स्फुटीभवन्ति।

यज्ञोक्तेष्टिकुलानुष्ठाने संयमविधानान्मानवानां मनमालिन्यमपसरति। लोभमोहरागजा दोषा यज्ञानुष्ठानावसरे यज्ञकर्मणि व्यापृतेषु सदस्येषु देवावाहनध्यानश्रद्धाव्याप्तपरिवेशकारणान्नावलोक्यन्तेऽतोऽनेनैव विधिना मानवेषु सौमनस्यसंचारो भवतीति ज्ञायते। इयमेव समाजशास्त्रस्य चरमा परिणतिः। अतो यज्ञस्य समाजे व्यापकत्वात्समाजोपकारित्वाच्चास्य यज्ञो वै विष्णुरिति व्यपदेशोऽन्वर्थको भवति। दर्शपूर्णमासेष्टि किलानुष्ठानप्रसंगे गोदोहनकृत्यानुष्ठानं निहितमस्ति तत्रोक्तस्य गोदोहनस्य केवलं यज्ञजन्यादृष्टफलावाप्तिरेव महत्त्वं नास्ति। प्रत्युततस्यादृष्टफलसाधनेन सह दृष्टफलसाधनमप्यस्य कर्मणः प्रतिपादितम्। अस्य दर्शपूर्णमासाभिधेयस्य कृत्यस्याध्यात्मिकतत्त्वैः सह भारतीय-ग्राम्यप्रधानस्य देशस्यार्थिकस्रोतोरूपेण ग्राम्याः पशवः ग्राम्यान्नानि च व्यञ्जितानि सन्ति। भारतीयानां धर्मसाधनं यज्ञानुष्ठानमस्ति, यज्ञानुष्ठानञ्चावश्यककर्तव्येषु श्रेष्ठकर्मसु चान्यतमम्। तदनुष्ठानञ्च हविर्द्रव्यसाध्यमस्ति। तद्द्रव्यञ्च कृषिकर्माधीनमस्ति। कृषिकर्मानुष्ठाने च सामाजिकजीवनसाफल्यं निहितमस्ति। अतोऽत्र दर्शपूर्णयज्ञानुष्ठानेन भारतीय - ग्राम्यजीवनस्य वैज्ञानिकत्वं, शारीरिकमानसिकशुद्धता, कर्तव्यनिष्ठता, देशभक्तिः सर्वविधानन्दविषया व्यञ्जिताः प्रतिभान्ति।

''द्रव्यं देवतात्यागः'' इति कात्यायनश्रौतसूत्रेण यज्ञस्य परिभाषा द्योतिता भवति। यज्ञोपकारकाणामेषामुक्तानां वैज्ञानिकदृष्ट्या परीक्षणेन द्रव्यस्य

रसायनशास्त्रदृष्ट्या, देवतानां पुनर्भौतिकशास्त्रदृष्ट्या च महत्त्वमङ्गीकर्तुं शक्यते। त्यागस्तु निःस्वार्थभावनादृष्ट्या राष्ट्रीयभावनादृष्ट्या चाभ्यर्हणीयः।

देवतायाः प्रसन्नतायै मन्त्रा ऋत्विग्वर्गेभ्यो ननूच्चार्यन्ते, हविष्यान्नानि चाग्नौ प्रक्षिप्यन्ते यस्य हुतान्नस्य लोकोपकारित्वं हवनकुण्डादुत्थितभूमौ निहितं मन्यते। उक्तं यथा-

अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिस्ततोऽन्नं ततः प्रजाः।।

अतः कर्मकाण्डस्य सर्वविधवैज्ञानिकत्वं सम्यगवगम्यते परिशीलनेन। एतादृशा विशुद्धवैज्ञानिकपदार्था वैदिक-साहित्याऽलंकारिकभाषायां बाहुल्येन विलोक्यन्ते। यदि वयं उदाहरणार्थमथर्ववेदसंहितामुद्घाटयामस्तदा नैकविधाः चिकित्साशास्त्रीयविषया दृष्टिपथमुपयान्ति। अथर्ववेदे सर्वविधज्वराभिधेयः तक्मन् इतिशब्दः बहुशः प्रयुक्तोऽस्ति। अस्य 'तक्मन्' शब्दस्य विश्लेषणेनाद्यतनीनाः सर्वविधज्वरसंकेताः तत्रान्तर्भूताः प्रतिभान्ति। तथैव शतपथब्राह्मणे 'आपो वै वज्रः' इति वाक्यमुपलभ्यते, यस्यानुशीलनेनाधुनिकविद्युदुत्पादनसिद्धान्तस्य सामञ्जस्यमवलोक्यते। तत्कथानुसारेणैकदा 'इन्द्रः' हस्ते जलं नीत्वा तेन जलेन वृत्रं जघान इत्यत्रावधेयमस्ति यज्जलमतिशयवेगेन वृत्रस्योपरि प्रचिक्षेप एवञ्च कृते सति विद्युत्प्रवाहो जातो येन स वृत्रः घातित इति कल्प्यते। एतन्नास्ति तिरोहितं यदद्यापि जलस्पर्शनप्रकरणं कर्मकाण्डभागस्य प्रथमं कर्म वर्तते। परन्तु लोका वैदिकसाहित्यानभिज्ञत्वान्नाङ्गीकर्तुं शक्नुवन्ति एतद् वैज्ञानिकं रहस्य वेदस्यातोऽत्र संश्लिष्टानि वैज्ञानिकवस्तूनि रहस्यगर्भ एव शेरते। अतो वैदिकसाहित्यस्यानिवार्य-रूपेणाधुनिक-भारतीयशिक्षया सह सम्बन्धो भवेत्, येन तत्रस्थाभिः वस्तुस्थितिभिः भारतीया छात्राः सम्यक् परिचिताः भवेयुस्तथा तत्रस्थैः वैज्ञानिकतत्त्वैः सहाधुनिकविज्ञानलतासन्तानं तुलयितुं च ते समर्था भवेयुः। उदाहरणरूपेण यद्यथर्व-वेदस्य राष्ट्राभिवर्धनसूक्तस्य वैज्ञानिकं विश्लेषणं क्रियते चेत्तदान्तरिक्षयुद्धस्य (Star war) शस्त्रसंकेतो लब्धुं शक्यते। अस्य राष्टाभिवर्धनसूक्तस्य वर्णनीयो विषयो ''मणि'' इत्यस्ति, यस्य स्वरूपमाकाशे भ्रमणशीलपदार्थरूपेण प्रोक्तमस्ति। मणेः गुणेषु आकाशे गत्वोपर्येव शत्रुं निरीक्ष्य हन्ति। अतः अत्र वैज्ञानिकैरन्वेषणीयो-विषयोऽस्ति।

यजुर्वेदस्याप्याधुनिक-विज्ञानदृष्ट्या महत्त्वन्न हीयते। तत्रापि प्राचीनगणितशास्त्रस्य निदर्शनं भवति। अनेनोपर्युक्तोपवर्णनेन श्रुतिसाहित्यस्य लौकिकालौकिकविज्ञानमयं स्वरूपं प्रकटीभवति। इदानीमस्य वैदिकवाङ्मयस्याधुनिकशिक्षागतविषयानुसारेण वर्गीकरणविधिरूपवर्ण्यते- सर्वप्रथमं सम्पूर्णस्योपलब्धवैदिकवाङ्मयस्याधुनिकशिक्षानुकूला विषयाः संकलनीयाः तथा विज्ञानतत्त्वं पूर्णानि सूक्तानि संकलय्याधुनिकशिक्षापाठ्यक्रमे निर्धारितैः विषयैः सह सामञ्जस्यं स्थापनीयम्। अवशिष्टवैदिकसाहित्यस्य विषया अपि पृथग्रूपेण संचित्य साहित्यिकविषयसम्बद्धैः पाठ्यग्रन्थैः सहाध्यापनीया भवेयुर्येन साहित्यसंसारेऽपि सौन्दर्यातिशयं वर्धेत। एतच्च साहित्यसिद्धान्तसंकलनं साहित्यसर्जनासिद्धान्तसमृद्धिहेतुर्भविष्यति। इमे नूतना विभागा वेदस्याधुनिक-शिक्षायै सुफलदाः भविष्यन्ति। विषयविभागानुसारेण वैदिकवाङ्मयस्याधुनिकोच्च-तरमाध्यमिक- स्नातक-स्नातकोत्तरकक्षास्वध्यापनेनाद्यतनीयानां यूनां वैदिक-साहित्यसुधातो विरागो न भविष्यति। माध्यमिककक्षासुतान्येव सूक्तान्यध्यापनाय पाठ्यक्रमे निर्धारणीयानि यानि राष्ट्रभक्तिं, नैतिकबलं, बौद्धिकविकासं, छात्र-छात्रासु समुद्भावयितुं क्षमाणि स्युः।

# 17

# श्रुतिस्मृत्यनेकान्तवादः

*हर्षनारायणः*

हिन्दुधर्मः श्रौतो धर्मः, श्रुतिप्रमाणको धर्मः। 'श्रुति' शब्दः 'प्रमाण'-शब्दश्च व्याख्यासापेक्षौ। श्रुतिप्रमाणकत्वं तु सामान्यं धर्मलक्षणम्। अन्येऽपि धर्मा इस्लामादयस् तत्तच्छ्रुत्यनुसारिणः। तथा हि-यहूदीयानां श्रुतिरेका, 'ओल्ड-टेस्टामेन्ट' इति ख्याता, ख्रीष्टीयानां श्रुतिरेका, 'बाइबिल' इति ख्याता; इस्लामस्यापि श्रुतिरेका, 'कुर्आन' इति ख्याता। ते सर्वे श्रुत्येकान्तवादिनः। हिन्दवस् तु श्रुत्यनेकान्तवादिनः। हिन्दूनां श्रुतिनरेकसङ्ख्याका। हिन्दुधर्मो 'बह्वाश्रयो बहुमुखो धर्मः' (महाभारतम्, शान्तिपर्व 280.26)। तथा-

**'अनेकान्तं बहुद्वारं धर्ममाहुर् मनीषिणः।।'**

(तत्रैव, अनुशासन-पर्व, 22.28)

**'बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः।।'**
**'तस्मान् न वाच्यो ह्यकेन बहुज्ञेनापि संशये।।'**

(बौधायन-धर्मसूत्राणि 1.1.13; बौधायन-स्मृतिः 1.13)

**'शाखानां विप्रकीर्णत्वात्, पुरुषाणां प्रमादतः,**
**'नानाप्रकरणस्थत्वात् सूक्ष्मा दुरनुगा गतिः।।'**

(तट्टीकायामुदाहृतं वचनम्)

सत्यं यच् चत्वारो वेदा हिन्दूनां श्रुतित्वेन प्रसिद्धाः, किं तु 'वेद'-शब्दोऽपि विशेषव्याख्यासापेक्ष इति सद्य एव स्फटीभविष्यति।

श्रुतीनामनैक्यं महाभारतादौ सुस्फुटमेवोररीकृतम्। तद् यथा-

**'तर्कोऽप्रतिष्ठः, श्रुतयो विभिन्ना, नैको ऋषिर् यस्य मतं प्रमाणम्।**
**'धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः।।'**

(वनपर्व 313.117)

तैत्तिरीयब्राह्मणानुसारेण (3.10.11) 'अनन्ता वै वेदाः।' महाभारतस्य कुम्भकोणसंस्करणानुसारेण यत्किञ्चित् ज्ञानविज्ञानं भुवि प्रवृत्तिमस्ति तद् 'वेद एव तु सर्वशः'। अत्रावैदिकानामागमोऽपि वेदाख्यां भजते। तद् यथा-

भूयः स भगवान ध्यात्वा चिरं शूलधरः प्रभु।
असृजत् सर्वशास्त्राणि महादेवो महेश्वरः।।
दण्डनीतेः प्रयोगार्थं प्रमाणानि च सर्वशः।
विद्याश् चतस्त्रः कूटस्थास् तासां भेदविकल्पनाः।।
अङ्गानि, वेदाश्चत्वारो, मीमांसा, न्यायविस्तरः।
'पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।
आयुर्वेदो धनुर्वेदो, गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं तुविद्या ह्यष्टादशैव तु।।
दश चाष्टौच विख्याता एता धर्मस्य संहिताः।
एतासामेव विद्यानां व्यासमाह महेश्वरः।।
शतानि त्रीणि शास्त्राणां महातन्त्राणि सप्ततिः।
व्यास एव तु विद्यानां महादेवेन कीर्तितः।।
तन्त्रं पाशुपतं नाम, पाञ्चरात्रं तु विश्रुतम्।
योगशास्त्रं च साङ्ख्यं च तन्त्र लोकायतं तथा।।
तन्त्रं ब्रह्मतुला नाम, तर्कविद्या दिवौकसाम्।
सुखदुःखार्थजिज्ञासा, कारणं चेति विश्रुतम्।।
तर्कविद्यास् तथा चाष्टौ, स चोक्तो न्यायविस्तरः।
दश चाष्टौ च विज्ञेयाः पौराणा यज्ञसंहिता।।
पुराणाश्च प्रतणीतास्तावदेवेह संहिताः।
धर्मशास्त्राणि तद्वच्चैकार्थानि च नान्यथा।।
एकार्थानि पुराणानि, वेदाश्चैकार्थसंहिताः।
नानार्थानि च सर्वाणि ततः शास्त्राणि शङ्करः।।
प्रोवाच भगवान् देवः कलाज्ञानानि यानि च।
चतुःषष्ठिप्रमाणानि आयुर्वेदं च सोत्तरम्।।
अष्टादशविकल्पां तां दण्डनीतिं च शाश्वतीम्।

गान्धर्वमितिहासं च नानाविस्तरमुक्तवान्।।
इत्येताः शङ्करप्रोक्ता विद्याः शब्दार्थसंहिताः।
पुनर् भेदसहस्रं तु तासामेव तु विस्तरः।।
ऋषिभिर् देवगन्धर्वैः सविकल्पः सविस्तरः।
शश्वदभ्यस्यते लोके वेद एव तु सर्वशः।।

(अध्यायः 122; दाक्षिणात्य सं., म. 113)

हारीत-मते श्रुतिर्द्विविधा-'वैदिकी तान्त्रिकी च' (मन्वर्थ-मुक्तावली 2.1)। देवीभागवतमते (11.12.9-12) तथैव। पद्मपुराणे (400.1,3) भागवते (11.27.7) च स त्रिविधा-वैदिकी, तान्त्रिकी, मिश्रा च। बृहद्धर्मपुराणानुसारेण (मध्यखण्डः 5. 138) तन्त्रं वेदात् प्रतन्तरः। देवीभागवतमते (7.39.27-32) वराहपुराणमते (66. 11) च वेदाधिकारहीन एव तन्त्रेऽधिकारवान् भवेत्।

ईश्वरसंहितानुसारेण कश्चिदेकायनवेदः सर्वेषामपि वेदानां मूलभूतमासीत्। प्रचलिताश्चत्वारो वेदा एकायनवेदापेक्षया विकारवेदाख्यां भजन्ते। तद् यथा-

श्रृणुध्वं मुनयः सर्वे वेदमेकायनाभिधम्। (ईश्वर-संहिता 1.18)
मूलभूतस्तु महतो वेदवृक्षस्य यो महान्। (1.20)
एष प्रकृतिधर्माख्यो वासुदेवैकगोचरः। (1.22)
'प्रवर्त्यते कृतयुगे, ततस्त्रेतायुगादिषु
'विकारवेदास्सर्वत्र देवतान्तरगोचरः।
'महतो वेदवृक्षस्य मूलभूतौ महानयम्,
स्कन्धभूता ऋगाद्यास्ते शाखाभूताश्च योगिनः।। (1.23-24)

जयन्तस्तु 'द्विविधो वेदः-श्रूयमाणोऽनुमीयमानश्च। श्रूय-माणश्च श्रुतिरित्युच्यते, अनुमीयमानश्च स्मृतिरिति। द्वावपि चैतावनादी।' (न्यायमञ्जरी, प्रमाण-प्रकरणम्, पृ.240) पुनरपि- 'आप्तप्रत्यक्षमूलत्वेन वेदानामिव धर्मशास्त्राणां हि पञ्चमं वेदमाहुः।' (तत्रैव, पृ. 241) 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति छान्दोग्योपनिषद्वचनम्। (7.1.4) शास्त्रेषु इतस्ततः पुराणवेदः, इतिहास-वेदः' (आश्वलायन-श्रौतसूत्रम् 10.7; गोपथ-ब्राह्मणम् 1.1.10; शतपथ- ब्राह्मणम् 13.4. 3.6-14 'सर्पवेदः, पिशाचवेदः,' 'असुरवेदः' (गोपथ ब्राह्मणम् 1.110) अपि वेदत्वेन

गृह्यन्ते। तद् यथा-'स दिशोऽन्वै- क्षत-प्राचीं, दक्षिणामुदीचीं, ध्रुवामूर्ध्वामिति। तास् तत्रैवाश्राम्यदभ्यतपत् समतपत्। ताभ्यः श्रान्ताभ्यः सन्तप्ताभ्यः पञ्चवेदान् निरमिमत- सर्पवेदं, पिशाचवेदमसुरवेदमितिहासवेदं, पुराणवेदमिति। स खलु प्राच्या एव दिशः सर्पवेदं निरमिमत, दक्षिणस्याः पिशाचवेदं, प्रतीच्या असुरवेदमुदीच्या इतिहासवेदं ध्रुवायाश्चोर्ध्वायाश्च पुराण वेदम' इति। (तत्रैव) गोपथ एवान्यत्र (1.2. 21;1.5.10) चतुर्थ-मथर्ववेदं शान्तमाथर्वणं घोरमाङ्गिरसं चेति रूपेण द्विधा कृत्वा वेद- पञ्चकत्वमुररीकृतं दृश्यते। तद् यथा-'तां पञ्चस्वपश्यद्-ऋचि, यजुषि, साम्नि, शान्तेऽथघोरे ... ' (1.2.21); 'या वेदे व्यष्टिरासीत् तां पञ्चस्वपश्यन्नृचि, यजुषि, साम्नि, शान्तेऽथ घोरे ...।' (1.5.10) महाभारतं पञ्चमं वेदं (महाभारतम्, आदिपर्व 64.130-131) कार्ष्ण वेदं (1.268) च मन्यन्ते अहिर्बुध्न्यसंहितायाम् (12.14) इतिहासपुराणं उपवेदत्वेन गृहीतम् तद् यथा-

इतिहासपुराणाख्य उपवेदः प्रकीर्तित।'

अपि च सायणः-'अस्य (अथर्व) वेदस्य सर्पवेदादय = पञ्चो-पवेदा अङ्गत्वेन समनन्तरं ब्रह्मणा सृष्टाः।' (अथर्ववेदभाष्य-भूमिका, पृ.22) शौनकीये चरणव्यूहे आयुर्वेदादय उपवेदत्वेन मताः। तद् यथा-'तत्र वेदानामुपवेदाश् चत्वारो भवन्ति-ऋग्वेदस्यायुर्वेद उपवेदो, यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेदो, ऽथर्ववेदस्यार्थशास्त्रं च इत्याह भगवान् व्यासः स्कन्दो वा।' (चतुर्थः अथर्वखण्डः, पृ. 47)

सामान्यविशेष भेदेन 'वेद-पदस्य द्वावर्थौ प्रत्येतव्यौ। तस्य सामान्या 'अनन्ता वै वेदाः,' वेद एव तु सर्वशः, इत्यादिनोदाहृतं प्राक्। विशिष्टार्थस् त्वस्य महाविवादपरः सम्प्रदायोऽस्ति।

'आद्यो वेदश् चतुष्पादः शतसाहस्रसंमितः।'

(विष्णुपुराणम् 3.41; वायुपुराणम् 60.6, अग्निपुराणम् 150.23)

प्रायः पञ्चमांश एवास्योपलभ्यतेऽधुना। आदिमो वेदः प्रणव आसीदिति भागवतवचनम्-

'एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः।

'देवो नारायणो नान्यः, एकोऽग्निर, वर्ण एव च।।' (भा. 9.14.48) वैदिकवाङ्मये 'वेद' पदमेकवचनान्तं बहुवचनान्तं च दृश्यते। तद् यथा-

‘यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये।
‘यो नमसा स्वध्वरः।। (ऋ. 8.19.5)
‘यस्मिन् वेदा विहिता विश्वरूपास् तेनौदनेनाति तराणि मृत्युम्’।
(अथर्व. 4.35.6)
‘ब्रह्मा प्रजापतिर् धाता, लोका, वेदाः, सप्त ऋषयो,ऽग्नयः।।
(अथर्व. 19.9.12)
‘वेदेभ्यः स्वाहा।’ (तैत्तिरीयसंहिता 7.5.11.2; काठकसंहिता 5.2)

मूलभूतो वेदः प्राजापत्यैः श्रुतिरप्यभिधीयते। स एव कालान्तरे चतुर्धा कृतः- ऋग्वेदो यजुर्वेद सामवेदो,ऽथर्ववेद इति कृत्वा। एवं चतुर्धा विभक्तो वेदः शाखाशतैर् विभागं गच्छतीति पुराणवचनम्-

‘वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर् विभुः। (वि.पु.3.2.57)

कालक्रमेण तच्छाखाभेदाः सहस्रशोऽभूवन्

‘वेदद्रुमस्य मैत्रेय! शाखाभेदास् सहस्रशः।’ (वि.पु. 3.3.4)
‘एकविंशतिसाहस्रमृग्वेदं मां प्रचक्षते।
‘सहस्रशाखं यत् साम ये वै वेदविदो जनाः।।’
(म.भा. शान्विपूर्व 342.97)

प्रायस् त्रिंशदधिक-शताधिक-सहस्रस्यैव परिगणनं सम्प्रत्युपलभ्यते। तथा च पतञ्जलिः, ‘...चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः-एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेद, एकविंशातिधा बाह्वृच्यं, नवधाऽथर्वणो वेद...।’ (महाभाष्यम्, पस्पशाह्निकम्, पृ.54) मुक्तिकोपनिषदि (1.12.13) शाखाभेदा एवं वर्गीकृताः-

ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसङ्ख्यकाः।
नवाधिकशतं शाखा यजुषो मारुतात्मज।
सहस्रसङ्ख्यया जाताः शाखाः साम्नः परन्तप।
अथर्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे।

महिर्बुधन्यसंहितायां (12.8-9) च-

एकविंशतिशाखावान् ऋग्वेदः परिगीयते।।
शतं चैका च शाखाः स्युर् यजुषामेकवर्त्मनाम्।
साम्नां शाखासहस्रं स्युः, पञ्चशाखा अथर्वणाम्।।’

अन्यत्रापि शाखासङ्ख्यविषये बहवो विप्रतिपत्तयो दृश्यन्ते। तत्र पतञ्जलेरेव विवरणं प्रामाणिकतया ग्रहीतव्यम्। बल्लभाचार्य-युगे त्वेकादशैव शाखाः प्रचरन्ति स्म। तद् यथा- '....एकादश-शाखा साम्प्रतं प्रचरन्ति . . . ।' (तत्त्वार्थदीपनिबन्धः, शास्त्रार्थप्रकरणम्, 82, पृ. 277)

प्रत्येका वेदशाखा चतुर्धा विभक्ता-

1. वेदसंहिता। उपवेदसंहिता
2. ब्राह्मणमनुब्राह्मणं च (अष्टाध्यायी 4.2.62)
3. आरण्यकम्
4. उपनिषद् (महाभारतम् शान्तिपर्व 47.26; सेश्वरमीमांसा 1.1.2, पृ. 38),

उपनिषच्चाद्य तावत् तासु त्रिंशदधिकैकादशशतशाखानां वेदः संहितासु प्रायोऽधोऽङ्किता द्वादशैवेदानीं समुपलभ्यन्ते-

| वेदः | शाखा-सङ्ख्या | | लब्ध-संहिता-सङ्ख्या | लब्ध-संहिता-नामानि |
|---|---|---|---|---|
| ऋग्वेदः | 21 | | 1 | शाकला-तैत्तिरीया संहिता |
| यजुर्वेदः | 100 | (शुक्लयजुर्वेद- | | वाजसनेयी-माध्यन्दिन संहिता |
| | | संहिते | 2 | काण्व-संहिता |
| | | (कृष्णयजुर्वेद- | | तैत्तिरीय-संहिता |
| | | संहिताः) | 4 | मैत्रायणी संहिता |
| | | | | कठ-संहिता |
| | | | | कपिष्ठलकठ-संहिता |
| सामवेदः | 100 | | 3 | कौथुम-संहिता |
| | | | | राणायनीय-संहिता |
| | | | | जैमिनीय-संहिता |
| अथर्ववेदः | 9 | | 2 | शौनक-संहिता |
| | | | | पैप्पलाद-संहिता |

वेदशाखा वेदपादपाद् वेदपादपानां वा भिन्ना प्रतिभान्ति। ताः प्राजापत्यश्रुतेर्विकल्पा इति स्मर्यते। तद्यथा-

'प्राजापत्या श्रुतिर्नित्या, तद्विकल्पास्त्विमे स्मृताः।

(वायुपुराणम्- 1.61.74-75)

उपवेद-संहिताः त्वशेषेणैव लुप्ता इदानीम्।

विस्मृत्यैतत् सर्वं द्वादशास्वप्युपलब्धासु वेदसंहितासु शाकलतैत्तिरीय संहितैव ऋग्वेदसंहितात्वेन, वाजसनेयीमाध्यन्दिनसंहिततैव यजुर्वेद-संहितात्वेन, कौथुमसंहितैव सामवेदसंहितात्वेन, शौनकसंहितैव चाथर्ववेदसंहितात्वेनेदानी प्रसिद्धिं गताः।

ब्राह्मणानामनुब्राह्मणानां च सङ्ख्या संहितानां सङ्ख्यावदासीत्। इदानीं तु 'ब्राह्मण'-पदभाजां ग्रन्थानां सङ्ख्योपलब्धानां वेदसंहितानां सङ्ख्यावदेव प्राप्यते प्रायशः। आर्षेय-सामविधान-देवताध्याय-वंश-संहितोपनिषद्ब्राह्मणानि सत्यव्रतसामश्रमिगुरोर् मतेऽनुब्राह्मणानीदानीं नष्टान्येव।

आरण्यकान्यपि पञ्चैव षडेव वोपलब्धानीदानीम्। निषामधेयं वाङ्मयं साकल्येन नष्टमित्याभाति।

उपनिषदाख्य-ग्रन्थानां सङ्ख्या सपाद-शतद्वयमेव सम्प्रति, किं तु तेषु प्रामाणिकाः प्राचीना उपनिषदः प्रायो विंशति-पञ्चविंशती एवेति वक्तुं शक्यते।

शाखा काश्चिदतीव विचित्राः स्मर्यन्ते। शान्तरक्षितः सूचयति यत् पुरा ब्राह्मणैरधीयमाना काचिद् बुद्धप्रशंसिनी निमित्त-शाखाऽऽसीत्। तद् यथा-

किं तु वेदप्रमाणत्वं यदि युष्माभिरिष्यते।
तत् किं भगवतो मूढैः सर्वज्ञत्वं न गम्यते?
निमित्तनाम्नि सर्वज्ञो भगवान् मुनिसत्तमः।
शाखान्तरे हि विस्पष्टं पठ्यते ब्राह्मणैर्बुधैः।।
योऽसौ षड्दन्तमात्मानमवदातद्विपात्मकम्।
स्वप्ने प्रदर्श्य सञ्जातो बोधिसत्त्वो गुणोदधिः।।
विघुष्टशब्दः सर्वज्ञः कृपात्मा स भविष्यति।
प्राप्तामृतपदः शुद्धः सर्वलोकपितेति च।।' (तत्त्वसंग्रहः 3510-3513)

निमित्तशाखायाः शाखात्वं दर्शयन्नाह-

अथ शाखान्तरं वेदं वेदान्तर्गतमिष्यते।
तदत्रन निमित्तं वो द्वेषं मुक्त्वाऽवधार्यते।।
स्वरादयश्च ते धर्माः प्रसिद्धाः श्रुतिभाविनः।
कर्तुमत्रापि शक्यास्ते नरेच्छामात्रसम्भवात्।। (तत्रैव 3514-3515)

रत्नकीर्तिनाऽप्युच्यते- 'प्रत्युत निमित्तनाम्नि शाखान्तरे स्फुटतरमेव सर्वज्ञः प्रतिपादितः।' (रत्नकीर्तिः, 'सर्वज्ञसिद्धिः', रत्नकीर्तिनिबन्धावली, पृ. 25)।

प्रपञ्चहृदयाख्य-ग्रन्थादवगम्यते यत् कदाचित् काचित् तुरुष्कशाखाऽपि भूतले प्रवृत्ता '... यजुर्वेदस्य ... तुरुष्क ...शाखा।' (प्रपञ्चहृदयम्, पृ. 19)। के ते तुरुष्का येषां शाखाऽत्र विवक्षिता? तत्र तर्कताण्डवे (पृ. 255) तुरुष्कागमस्य नामसङ्कीर्तनं प्राप्यते। गुणरत्नश्च तुरुष्काणां सृष्टिविषयं मतमुदाहरन् भणति .. ''अथवा लोकस्वरूपेऽप्यनेके वादिनोऽनेकधा विप्रवदन्ते। तद् यथा-केचिन् नारीश्वरजं जगन् निगदन्तिः, परे, सोमाग्निसम्भवम्...; तुरुष्का, गोस्वामिनामैकदिव्यपुरुषप्रभवम्।' (तर्करहस्यदीपिका, पृ. 20) बाशममतानुसारेण गुणरत्नस्य 'तुरुष्क'-शब्देन ख्रीष्टीया आख्यायन्ते, न तु मुस्लिमाः, तथा चात्र 'दिव्यपुरुषः' ख्रीष्टो, न तु 'अल्लाहो' मुहम्मदो वा। अस्मन्मते तु बाशमस्य कल्पना क्लिष्टा कल्पना। अत्र 'गोस्वामिपदेन मुस्लिमानां 'रसूल' इत्युपाख्या धर्मप्रवर्तका धर्मसंस्कर्तारो वा विविक्षताः प्रतीयन्ते। 'दिव्यपुरुष' पदेन च ज्योतिर्मयो मुहम्मद इति वक्तुं शक्यते। सूफीनये मुहम्मदः आदिज्योतिः ('नूर') परमेश्वरस्य, मुहम्मदायैव तज्ज्योतिःप्रभवा वा सर्वा सृष्टिरियम्। अतस् 'तुरुष्क' शब्देन 'मुस्लिमोऽभिप्रेतो गुणरत्नकृतौ। इस्लामस्योदयात् प्रागपि कनिष्कादयस् 'तुरुष्काः' इति स्मर्यन्ते आर्यमञ्जुश्रीमूलकल्पादौ। अतः केषां तुरुष्काणां शाखा चर्चिता प्रपञ्चहृदये इति वक्तुं न शक्यतेऽद्य सम्यक्। अकबरयुगे प्रणीता संस्कृतार्व्यसमन्वितामल्लोपनिषन्नाम्न्युप- निषदत्र बलाद् विचारपथे आयाति।

अपूर्वः कश्चिद् विचारः सहसा प्रादुर्भवति। श्रीमद्भागवतादि पुराणेषु शङ्कर-भगवत्पादस्य दशावतारस्तोत्रेऽपि च भगवान् बुद्धो भगवदवतारेषु परिगणितः, शङ्कराचार्येण तु स बहुशः स्तुतोऽपि दृश्यते। तद् यथा शङ्करस्य दशावतारस्तोत्रे नवमं पद्यम्-

**'धराबद्धपद्मासनस्थाङ्घ्रियष्टिर्नियम्यानिलं न्यस्तनासाग्रदृष्टिः,**
**'य आस्ते कलौ योगिनां चक्रवर्ती स बुद्धः प्रबुद्धोऽस्तु मच्चित्तवर्ती।।'**

बुद्धस्यैतादृशमाहात्म्यस्य मूल-प्रणष्टा निमित्त-शाखैवाभाति। अत्रेदमपिध्येयं यत् स्कन्दपुराणान्तर्गतायां सूतसंहितायां (यज्ञवैभव-खण्डे अ.20, श्लोक 16) बुद्धागमस्य वेदमूलत्वं स्पष्टमेवोररीकृतं प्राप्यते। तद् यथा--

**'समूलेषु च धर्मेषु बुद्धागम-समन्वितः।**
**धर्मः श्रेष्ठ इति प्रोक्तो मया वेदार्थपारगाः।'**

'बुद्ध-प्रोक्ता आगमा बुद्धागमाः' इति सायणाचार्यः तत्र। बुद्धो वैदिकलोकव्यवस्थायां वर्णव्यवस्थायां श्रद्धालुर्दृश्यते। खुद्दकनिकाय- दीघनिकाय-मज्झिमनिकायगतेषु बहुषु सुत्तेषु सङ्कलितेषु बुद्धवचनेषु वर्णव्यवस्थाया आर्षपरम्परानुसारि-समुज्ज्वलरूपस्य माहात्म्यं कण्ठतः स्वीकृतं गम्यते। बुद्धेनेतसृततः प्रत्नर्षीणां प्रशंसाऽपि भूरिशः कृता। तद्देशनासु श्रमणानां ब्राह्मणानां च तुल्यमादरार्हत्वमपि ध्वन्यते। बोधिसत्त्वाः क्षत्रिय-ब्राह्मण-कुलयोरेवा जायन्त इति बुद्धवचनं ललितविस्तरे (अ.3)। इति निमित्तशाखा-प्रसन्नात् सर्वमपि युज्यते, सर्वमपि हृदयङ्गमो भवति। अनया दृष्टिभङ्ग्या विचारितो मूलबौद्धसमयोऽनवैदिक एवेत्यवधारितव्यः।

श्रौत-स्मार्त-धर्मस्तु शाखानैकान्तवादी। तत्तत्कुलेन ततच्छाखैवाध्येतव्या, न ताः सर्वाः शाखाः सर्वैरध्येतव्याः। 'स्वाध्यायोऽध्येतव्यः' इति शतपथब्राह्मणवचनस्य (11.3.8.3) व्याख्यानावसरेऽभियुक्ता व्यवस्थापयन्ति यत् स्वसम्प्रदायानुसारिणीं कामपि शाखामधीयीत। (तत्रवार्तिकम् 2.4.9, पृ. 223) मनुपरिशिष्टे (पृ.4) इदमपि धृतं यत् परशाखोक्तं कर्म नैवानुष्ठेयम्-

**''आत्मशाखां परित्यज्य परशाखासु वर्तते।**
**न जातु परशाखोक्तं बुधः कर्म समाचरेत्।।**
**अत एव सर्वा एव शखाः सर्वत्र न प्रचरन्ति।**
**भूयसी शाखा-राशिस्तु प्रनष्टैवेदानीम्।।''**

न च सर्वे वेदाः सर्वैः समादृताः। चतुर्णामपि वेदानां माहात्म्यसाम्यं तु कैश्चिन् नैवाङ्गीक्रियते। तथा हि-क्वचित् क्वचित् सामवेदमाहात्म्यपराणि क्वचित् क्वचित् च तद्विगानपराण्यपि वचनान्युपलभ्यन्ते। तद् यथा- छान्दोग्योपनिषदनु-सारेण 'ऋचः साम रसः' (1.1.2), श्रीकृष्णवाक्यं च-'वेदानां सामवेदोऽस्मि' (गीता 19.22) इति। मनुः तु सामवेदस्याशुचित्वं दर्शयन्नाह-

**सामध्वनावृग्यजुषी नाधीयीत कदाचन**
**वेदस्याधीत्य वाऽप्यन्तमारण्यकमधीत्य च।**

**ऋग्वेदो देवदैवत्यो, यजुर्वेदस् तु मानुषः।**
**सामवेदः स्मृतः पित्र्यस्ः तस्मात् तस्याशुचिर्ध्वनिः।।**

(मनुस्मृतिः 4.123-124)

तथा च विष्णुपुराणम्-

**सर्गादौ ऋङ्मयो ब्रह्मा, स्थितौ विष्णुर् यजुर्मयः।**
**रुद्रः साममयोऽन्तायः तस्मात् तस्याशुचिर्ध्वनिः।।**

(वि.पु. 2. 11. 13.)

ऋग्वेदेऽप्यशुच्यंशा वर्तन्त एव। तस्मिन् वसिष्ठद्वेषिण्योऽभिशापरूपाश् चतस्र ऋचो (ऋ. 3.53.21-24), याभिविश्वामित्रो वसिष्ठमशपत्। तत्र शौनकः-

**परश्चतस्रो यास् तत्र वसिष्ठद्वेषिणो विदुः।**
**विश्वामित्रेण ताः प्रोक्ता अभिशापा इति स्मृताः।।**
**द्वेषद्वेषास् तु ताः प्रोक्ता विद्याच्चैवाभिचारिकाः।**
**वशिष्ठास् तु न शृण्वन्ति तदाचार्यकसंमतम्।।**
**कीर्तनाच् छ्रवणाद्वाऽपि महान् दोषः प्रजायते।**
**शतधा भिद्यते मूर्द्धा कीर्तितेन श्रुतेन वा।।**

'तेषां बालाः प्रमीयन्ते, तस्मात् तास् तु न कीर्तयेत्।' (बृहद्देवता 4.3)। हन्त! वेदमन्त्रोच्चारणाच्छ्रवणाद् वा पापं जीवनहानिश्च! नेयं लोकायतिवाचोयुक्तिः, इयं तु वैदिकानामेव घोषणा। निरुक्तवृत्तिकृद् दुर्गाचार्यः कापिष्ठलो वसिष्ठ आसीत्, अतः स काचिदुपर्युलिखितां ऋचं न निरब्रवीत् विलिखति सः- 'यस्मिन् निगमे एष शब्दो (लोधम्) सा वसिष्ठद्वेषिणी ऋक्। अहं च कपिष्ठलो वासिष्ठः, अतः तां न निर्ब्रवीमि।' (निरुत्तःवृत्तिः,4.14, खण्डः 1 पृ.323)

क्वचित् कदाचिच् च शास्त्रेषु वेदसंहितास्वपि च गाथानाराशंस्योर-विगानमपि प्राप्यते। 'अनृतं हि गाथा, अनृतं नाराशंसी' इति काठकसंहिता (स्थानकम् 14, अनुवाकः 5)। केषांचिन् मते प्रचलितानां वेदसंहितानां केचिदवमानामेव गाथा-नाराशंसी-संज्ञे।

श्रौतस्मार्त-परम्परायां श्रुतिमूलकानि स्मृतयः पुराणानि चापि सात्त्व-राजस तामस-भेदात् त्रिविधानीति गम्यते। तत्र सात्त्विकानि मोक्षादानि, राजसानि स्वर्गदानि, तामसानि च निरयदानीत्यपि स्मयते। तथा च पद्मपुराणम् (उत्तरखण्डः, अध्यायः 263, श्लोकाः 86-90)-

**तथैव स्मृतयः प्रोक्ता ऋषिभिस् त्रिगुणान्विताः।**
**सात्त्विका, राजसाश् चैव तामसाः शुभदर्शने!।।**
**वासिष्ठं चैव, हारीतं, व्यासं पाराशरं तथा।**
**भारद्वाजं, काश्यपं च सात्त्विका मुक्तिदाः शुभाः।।**
**याज्ञवल्क्यं, तथाऽऽत्रेयं, तैत्तिरं, दाक्षमेव च।**
**कात्यायनं वैष्णवं च राजसाः स्वर्गदाः शुभाः।**
**गौतमं बार्हस्पत्यं च, संवर्तं च, यमं स्मृतम्।**
**साङ्ख्यं चौशनसं देवि! तामसा निरयप्रदाः।।**
**किमत्र बहुनोक्तेन? पुराणेषु स्मृतिष्वपि।**
**तामसा नरकायैव, वर्जयेत् तान् विचक्षणः।।**

तत्रैव (263.81-85) पुराणान्यपि त्रिविधानीति दर्शितम्-

**'मात्स्यं, कौर्मं, तथा लैङ्गं, शैवं, स्कान्दं तथैव च।**
**'आग्नेयं च-षडेतानि तामसानि निबोध मे।**
**'वैष्णवं, नारदीयं च, तथा भागवतं शुभम्,**
**'गारुडं च, तथा पाद्मं, वाराहं शुभदर्शने।**
**'सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै।**
**'ब्रह्माण्डं, ब्रह्मवैवर्तं, मार्कण्डेयं तथैव च,**
**'भविष्यं, वामनं, ब्राह्मं राजसानि निबोध मे।**
**'सात्त्विकाः मोक्षदाः प्रोक्ता, राजसाः स्वर्गदाः शुभाः,**
**'तथैव तामसा देवि! निरयप्राप्ति हेतवः।।'**

मत्स्यपुराणे (53-67-68) तत्त्रिविधविभागानुसारी देवभागोऽपि प्राप्यते। तद् यथा-

**'सात्त्विकेषु पुराणेषु माहात्म्बमधिकं हरेः,**
**'राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः,**
**'तदवदग्नेश् च माहात्म्यं तामसेषु शिवस्य च,**
**'सङ्कीर्णेषु सरस्वत्याः पितृणां च निगद्यते।'**

देवीभागवते (1.1.14) तत्त्रिविधविभागानुसारी श्रौतानां दर्शना- नामपि विभागः परिकीर्तितः-

'सात्त्विकं तत्र वेदान्तं, मीमांसा राजसं मतम्'
'तामसं न्यायशास्त्रं च हेतुवादाभियन्त्रितम् ।'

विश्वेष्वपि विश्वधर्मेषु विश्वमपि शास्त्रं विश्वमपि लोकं पुण्यमार्गे प्रवर्तयितुं प्रवृत्तिमिति स्थितिः। श्रौतस्मार्तधर्मावलम्बिनां त्वयं विशेषो यत् तेषां मते कानिचित् शास्त्राणि लोकं पापमार्गे प्रवर्तयितुं प्रवृत्तानीत्यपि वक्तुं शक्यते। तत्र कूर्मपुराणानुसारेण गौतमर्षेः शापाद् वेद-ब्राह्यत्वं गतानां रक्षणार्थाय विष्णुनेरितः शिवः शिवेरितश् च विष्णुर-वैदिकशास्स्त्राणि प्रणिनाय। तद् यथा-

**'तस्माद्धि वेदबाह्यानां रक्षणार्थाय पापिनाम्**
**'विमोहनात्र शास्त्राणि करिष्यावो वृषध्वज।**
**'एवं सम्बोधितो रुद्रो माधवेन मुरारिणा**
**'चकार मोहशास्त्राणि केशवोऽपि शिवेरितः।**
**'कापालं, नाकुलं, वामं भैरव पूर्व-पश्चिमम्,**
**-पाञ्चरात्रं, पाशुपतं, तथाऽन्यानि सहस्रशः**
**'सृष्ट्वा तानाह निर्वेदाः कुर्वाणाः शास्त्रचोदितम्**
**'पतन्तो नरके घोरे बहून् कल्पान् पुनः पुनः।**
**'एवं तु मानुषे लोके क्षीणपापचयास् ततः**
**'ईश्वराराधनबलाद् गच्छध्वं सुकृतां गतिम्।'**

(कू.पु., पू. भा., 16-115-119)

तुलनीयमत्र कू.पु., भा. 12.257-259; उ.भा. 37-147-148; शिवपुराणम् रुद्रसंहिता, युद्धखण्डः, 3.17-18 'मायी शास्ता' विष्णुः षोडशलक्षश्लोकात्मकं मायामयं शास्त्रमसृजच् छ्र तिस्मृतिविरुद्धं वर्णाश्रमधर्मशून्यं, परलोकापतापकं, उन्मार्गप्रेरकं चेति लिङ्गपुराण-वचनम् (1.71.72.80)-

**'विचार्यैवं ततस् तेषां भगवान् पुरुषोत्तमः**
**'कर्तुं व्यवसितश् चाभूद् धर्मविघ्नं सुरारिणाम्।**
**'असृजच्च महातेजाः पुरुषं चात्मसम्भवम्**
**'मायी मायामयं तेषां धर्मविघ्नार्थमच्युतः।**
**'शास्त्रं च शास्ता सर्वेषामकरोत् कामरूपधृक्**
**'सर्वसम्मोहनं मायी दृष्टप्रत्ययसंयुतम्।**

**'एतत् स्वाङ्गभवायैव पुरुषायोपदिश्य तु**
**'मायी मायामयं शास्त्रं ग्रन्थषोडशलक्षणम्,**
**'श्रौतस्मार्त - विरुद्धं च, वर्णाश्रमविवर्जितम्,**
**'इहैव स्वर्गनरकं प्रत्ययं नान्यथा पुनः।**
**'तच्छास्त्रमुपदिश्यैव पुरुषायाच्युतः स्वयम्**
**'पुरत्रयविनाशाय प्राहैनं पुरुषं हरिः।**
**'गन्तुमर्हसि नाशाय भो! तूर्णं पुरवासिनाम्।**
**धर्मास् तथा प्रणश्यन्तु श्रौतस्मार्ता न संशयः।**
**'ततः प्रणम्य तं मायी मायाशास्त्रविशारदः**
**'प्रविश्य तत् पुरं तूर्णं मुनिर्मायां तदाऽकरोत्।**
**'श्रौतं स्मार्तं च संतज्य तस्य शिष्यास् तदाऽभवन्।'**

अहिर्बुध्न्यसंहितायामपि-

**'हिंस्राणां मोहनार्थाय सङ्गत्या एव वैष्णवाः**
**'शास्त्राभासाः प्रवर्तन्ते देवब्रह्मर्षिवक्त्रतः'**

इति शास्त्राभासानां विष्णुप्रवर्तित्वमुररीकृतम्। अन्यत्रापि बहूनि 'मोहशास्त्राणि' नारायणादिदेवाधिदेव - प्रवर्तितानीति प्रकीर्तितम्। तद् यथा-

**'एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति।**
**'त्वं च रुद्र! महाबाहो! मोहशास्त्राणि कारय।।'**

(वराहपुराणम्, अ.70)

**'ये वेदमार्गनिर्मुक्तास् तेषां मोहार्थमेव च**
**'नयसिद्धान्तसंज्ञाभिर्मया शास्त्रं तु दर्शितम्।'**

(तत्रैव 70.41)

तथा च यतीन्द्रमतदीपिका-प्रकाशे उदाहृतं कस्यचिद् वचनम्-

**'पाञ्चरात्रं, भागवतं, तन्त्रं वैखानसाभिधम्**
**'वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान्'**

क्वचित् क्वचित् तु वेदेभ्योऽपि गरीयस्त्वं पुराणानां प्रपञ्चितं दृश्यते। तद् यथा-

**'वेदार्थादधिकं मन्ये पुराणार्थं वरानने।**
**'वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।'**

(नारदीयपुराणम् 2.24.17)

महाभारतेऽपि निगदितं यत्-

**'पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्ना प्रकाशिता।'**

प्रासङ्गिक्यत्र वाचोयुक्तिर् यन् निखिलो वेदग्रन्थराशिरनित्य-स्तदात्मभूतं तत्त्वज्ञानं ब्रह्मापरं नाम च नित्यं यथोक्तं महाभारते (शान्तिपर्वणि, 206.16-18)

**ऋचो, यजूंषि, सामानि, शरीराणि व्यपाश्रिताः**
**'जिह्वाग्रेषु प्रवर्तन्ते यत्नसाध्या विनाशिनः।**
**'न चैवमिष्यते ब्रह्म, नादिमध्यं, न चान्तवत्।**
**'ऋचामादिस्, तथा साम्नां, यजुषामादिरुच्यते।**
**'अन्तश् चादिमताद्दष्टो, न त्वादिर् ब्रह्मणः स्मृतः।;**

महाभाष्यकृन्मते या वेदवर्णानुपूर्वी साऽनित्या नित्यस्तु वेदार्थ एव--'यद्यप्यर्थो नित्यो, मा त्वसौ वर्णानुपूर्वी साऽनित्या।' (महाभाष्यम् 4.3.11, पृ. 460) पूर्वमीमांसा-समये वेदानां शब्दाराशिरपि नित्यः--न केवलं वर्णः शब्दश् च, प्रत्युत शब्दवर्णानुपूर्व्यावपि नित्ये। किं तु-

**'तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे,**
**छन्दांसि जज्ञिरे तस्माद् यजुस् तस्मादजायत।**

(ऋ. 10.90.9)

इति वेदवाक्यादेव ऋचामनित्यत्वमेवसिध्यति। वस्तुतस् त्वृषीणां कृतिर् वेदग्रन्थराशिरिति वेद एवोद्घोषयति। वेदेषु 'तक्ष'-'जन्' 'कृ'-'सृज्'-प्रभृतिधातूनां स्तोमावतारविषये प्रयोगो वेदशब्दानामनित्यत्वं स्फुटमेव दर्शयति। उदाहरणतः, एकस्यामृचि (ऋ. 1.61.4) भणितं यत् कवयः 'रथं न तष्टेव' स्तोमं कृण्वन्ति।

वेदमन्त्रार्थस्यापौरुषेयत्वं तु अधस्तनर्चा ध्वन्यते-

इयं वामस्य मन्मन इन्द्राग्नी! पूर्व्यस्तुतिः

अभ्राद् वृष्टिरिवाजनि। (ऋ. 4.48.6)

श्रुतिस् तु प्रतिमन्वन्तरमन्या चान्या च भवतीति शास्त्रेष्वितस् ततः स्फुटमेवे ङ्गितं प्राप्यते। तथा च वायुपुराणम् (पूर्वभागः, 59,56)-

'प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते।'

स्मृतयोऽपि प्रतियुगं भिन्नैवेत्यवधारितं स्मृतिष्वेव, क्वचित् स्फुटं क्वचिदस्फुटं च। तद् यथा-

कृते तु मानवा धर्मास्, त्रेतायां गौतमाः स्मृताः ।
'द्वापरे शङ्खलिखिताः, कलौ पाराशराः स्मृताः' ।। (पराशरस्मृतिः 1.24.25)

सर्वास्वपि श्रुतिस्मृतिषु कलिवर्ज्यांशा अपि मन्यन्ते धर्मशास्त्र-निबन्धकाराः । तथा च श्रुतिप्रतिपादितमश्वालम्भगवालम्भादिकं स्मृति- प्रतिपादितं संन्यासादिकं ते कलौ कण्ठत एव वर्जयन्ति ।

स्थितमेतदतो यत् श्रुतिस्मृत्येकान्तवादः श्रुतिस्मृतिभ्यामननुमोदितः । श्रुतिस्मृतिप्रतिपाद्यराद्धान्तस्तु श्रुतिस्मृत्यनेकान्तवाद एव ।

# 18

# कारकप्रसङ्गे वैदिकभाषामुपलक्ष्य विशेषतः पञ्चपाणिनीयसूत्राणां प्रयोगविमर्शः

*कल्याणः पण्डा*

भाष्यतेऽनयेति भाषा। यस्या माध्यमेन मानवाः स्वीयं मनोभावम् अन्यस्मै ज्ञापयन्ति सा हि भाषा। भाषां विना मानवानां दैनन्दिनजीवनयापनमसम्भवमेव। अतः पृथिव्यां लोकव्यवहाराय नैका भाषाः समुत्थिताः।

प्राचीनभारतीयार्यभाषायाः प्राचीन-मध्य-नव्यभेदेन विभागत्रयं प्राप्यते। तत्र तु वैदिकभाषातो लौकिकसंस्कृतस्य केषुचित् स्थलेषु पार्थक्यं शेमुषीमतां ग्गोचरतामुपैति। वैदिकभाषातो लौकिकं संस्कृतं ध्वनितात्त्विक–दृष्ट्या तथा रूपतात्त्विक दृष्ट्या च भिन्नम्।

वैदिकलौकिकसंस्कृतयोः रूपतात्त्विकवैशिष्ट्याधारेण कारकप्रसङ्गे विभक्त्यर्थप्रकरणप्रसङ्गे वा यानि पाणिनीयसूत्राणि प्रयुज्यन्ते तेषु पाणिनीयसूत्रेषु विशेषतः पञ्चसूत्राणां केषाञ्चन वार्तिकानां च प्रयोगः केवलं वैदिकभाषामुपलक्ष्यैव विहित इति ज्ञेयोऽस्माभिः। इदमत्रवधेयं यत् पाणिनिना कारकप्रसङ्गे यानि सूत्राणि रचितानि तानि सर्वाणि एव यथा लौकिकभाषायां प्रयुज्यन्ते तथा वैदिकभाषायामपि प्रयुज्यन्ते। परन्तु सन्ति पञ्च विशेषसूत्राणि कारकप्रसङ्गे यत्तु केवलं वैदिकभाषामुपलक्ष्यैव हि प्रयुक्तानि इत्यवधेयमस्माभिः।

तानि सूत्राणि अधस्ताद् आलोच्यन्ते। 'तृतीया च होश्छन्दसि (२/३/३)'। अस्य सूत्रस्य व्याख्यायां दीक्षितेनोक्तं- ''जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च''। 'यवाग्वा अग्निहोत्रं जुहोति' अग्निहोत्रशब्दोऽत्र हविषि वर्तते- 'यस्याग्निहोत्रमधिश्रितमेध्यमापद्येत' इत्यादि प्रयोगदर्शनात्, अग्नये हूयते इति व्युत्पत्तेश्च। यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः।

अस्याशयो हि लौकिकभाषायां 'हु' धातोः कर्मणि केवलं द्वितीया विधीयते, वैदिकभाषायां तु द्वितीया तृतीया च भवति। यथा लोके 'यवागूमग्निहोत्रं जुहोति' इति। परन्तु वेदे 'यवाग्वा अग्निहोत्रं जुहोति'/यवागूमग्निहोत्रं जुहोति' इति वाक्यद्वयमेव साधु। तेन 'यवाग्वा अग्निहोत्रं जुहोति' इति वाक्यस्य विवक्षितार्थस्तु एवं यवाग्वाख्यं हविः देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः। अत्र हुधातोः कर्मत्वेन यवागूपदे तृतीया द्वितीया च वेदे प्रयुज्यते, परन्तु लौकिकसंस्कृते केवलं द्वितीयैव भवतीति विशेषोऽस्माभिरवधेयः।'

द्वितीया ब्राह्मणे'(2/3/60)। अस्य सूत्रस्य वृत्तावुक्तं भट्टोजिदीक्षितेन ''ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात्। षष्ठ्यपवादः''। इति।

अस्याशयो हि वेदस्य ब्राह्मणांशो द्युतक्रीडार्थे क्रयविक्रयरूपव्यवहारार्थे च दिव्यधातोः कर्मणि षष्ठीनिषेधेन द्वितीया विधीयते। अस्योदाहरणं हि 'गामस्य तदहः सभायां दीव्येयुः' इति (मै ब्रा. 1/6/11)।

अत्रोदाहरणे गामिति द्वितीयाविभक्तयन्तं पदं 'दीव्येयुः' इति क्रियायाः कर्मरूपेण व्यवहृतम्। लौकिके तु 'दिवस्तदर्थस्य' (6/3/52) इति सूत्रानुसारेणात्र षष्ठी स्यात्। अत्रेदमवधेयं यद् 'व्यवहृपणोः समर्थयोः' (2रु3/57) इति सूत्रस्थेन समर्थशब्दार्थेन द्युतक्रीडाक्रयविक्रयव्यवहाररूपौ यौ अर्थौ बुध्येते, तावर्थौ एव 'दिवस्तदर्थस्य च' इति सूत्रे तदर्थपदेन ग्रहणीयौ। तस्मादेव वृत्तावुक्तं दीक्षितेन 'द्युते क्रयविक्रयरूपव्यवहारे चानयोस्तुल्यार्थता' इति।

परन्तु स्तुत्यर्थकत्वेन दिव्यधातोः प्रयोगे वेदे द्वितीया एव प्रयुज्यते। यथा 'राजानं दीव्यति स्तौतीत्यर्थः। अत्रापि काशिकावृत्तिवचनं स्मर्तव्यमस्माभिः ''अनुपसर्गस्य षष्ठ्यां प्राप्तायामिदं वचनम्। सोपसर्गस्य तु छन्दसि व्यवस्थितविभाषयापि सिद्ध्यति।'' इति। अस्यार्थः सोपसर्गदिव्-धातोरपि कर्मणि षष्ठीनिषेधेन द्वितीया व्यवस्थितविभाषयैव सिध्यति। परमनुपसर्गदिव्-धातोः कर्मणि षष्ठीनिषेधेन द्वितीया सिध्यति केवलं वेदस्य ब्राह्मणभागे इत्यवधेयमस्माभिः।

चतुर्थ्यर्थे बहुलं छन्दसि (2/3/62) अस्य सूत्रस्य वृत्तौ उक्तं दीक्षितेन- ''षष्ठी स्यात्। पुरुषमृगश्चन्द्रमसः। गोधा कालका दार्वाघाटस्ते वनस्पतीनाम्।'' इति। अस्याशयो हि वेदे चतुर्थ्यर्थे प्रायः षष्ठी विभक्तिः भवति। तदुदारणं यथा- 'पुरुषमृगश्चन्द्रमसो गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्'(मे. ब्रा 3/14/16)

(वाज सं 24/35) इति। अस्यार्थो हि चन्द्रमसे देवाय पुरुषमृगस्य वनस्पतिदेवताभ्यः च गोधाकालकादार्वाघाटानाञ्च वलिः कार्यः। परन्तु वेदे चन्द्रमस्-शब्दोत्तरं वनस्पतिशब्दोत्तरं च सम्प्रदानार्थे चतुर्थीं न प्रयोज्य षष्ठी प्रयुक्ता। परन्तु अयं नियमो बाहुलकविशिष्ट इत्यवधेयमस्माभिः। किञ्चवेदे अस्य विपरीतमपि भवति। तद्द्था 'षष्ठ्यर्थे चतुर्थीति वाच्यम्' इति कात्यायनवार्तिकानुसारं वेदे षष्ठ्यर्थे चतुर्थी विभक्तिरपि क्वचित् क्वचित् भवति। यथा - 'या खर्वेण पिवति तस्यै खर्वः' इति। खर्वः पानपात्रविशेषः। तेन या खर्वेण पात्रेण पिवति, तस्याः खर्वः इत्येवं प्रयोगः काम्यः। परन्तु छन्दसि षष्ठ्यर्थे चतुर्थी विभक्तिः प्रयुक्ता।

अन्यानि उदाहरणानि यथा-

''अस्यै पृथिव्यै रसं विदुः'' (शत. ब्रा.2/9/1)

''प्राचीनं वसोर्धारायै'' (शत. ब्रा.10/1/5/3)

''अहल्यायै जारः''(शत.ब्रा.3/3/4/17)इति।

''यजेश्च करणे'' (2/3/67) अस्य वृत्तावुक्तं दीक्षितेन् 'यज्-धातोः प्रयोगे इह छन्दसि बहुलं षष्ठी भवति। घृतस्य घृतेन वा यजते' इति।

अस्याशयो हि वेदे यज् धातोः प्रयोगेन करणेन विकल्पेन षष्ठी विभक्तिः भवति। लोके यज्-धातोः प्रयोगेन करणे तृतीया भवति, षष्ठी न भवति। परन्तु वेदे तृतीया षष्ठी वा भवति। यथा घृतस्य घृतेन/सोमस्य सोमेन वा यजते।

'अनुप्रतिगृणश्च (1/4/41)। अस्य वृत्तौ दीक्षितेनोक्तम् 'आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्'। इति। अस्याशयो हि अनु-उपसर्गपूर्वकात्प्रत्युपसर्गपूर्वकाच्च गृधातोः प्रयोगेन शस्त्रपाठे यं प्रोत्साहयति तस्य सम्प्रदानसंज्ञा भवति, ततश्च चतुर्थी प्रयुज्यते। अत्रेदमवधेयं यत् कर्मणि एव सम्प्रदानम् उपचर्य चतुर्थी विधीयते। लोके तु द्वितीया प्रयुज्यते। अस्योदाहरणं तावद्- होत्रेऽनुगृणाति प्रतिगृणाति वा। होता प्रथमं शंसति, तम् अध्वर्युः प्रोत्साहयतीत्यर्थः। होता शस्त्रं पठति, अध्वर्युः 'ओथ मोदै व' इत्युक्ता प्रोत्साहयति। अत्र आध्वर्यवे होतारमुद्दिश्योत्साहकार्ये प्रेरयति होतुः शास्त्रपाठ एव। तस्मादत्र होतृपदे कर्मणि सम्प्रदानत्वेन चतुर्थी प्रयुक्ता।

किञ्च 'कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' इति कात्यायनरचितवार्तिकेन एकस्मिन् वाक्ये यज्-धातोः कर्मणि करणसंज्ञया तृतीया

विभक्तिस्तथा सम्प्रदानस्य कर्मसंज्ञया द्वितीयाविभक्तिः भवति। यथा 'पशुना रुद्रं यजते' इत्यस्य यज्-धातोः कर्मणः पशोः करणत्वं तथा सम्प्रदानस्य रूद्रस्य कर्मत्वं प्रसक्तम्।

किञ्च 'अव्ययप्रतिषेधे तोसुन्-कसुनोरप्रतिषेधः' इति वार्तिकेन तोसुन्-कसुन्प्रत्ययाभ्यां गठितेन अव्ययशब्देन कर्तरि कर्मणि च षष्ठी भवति। यथा 'पुरा सूर्यस्योदेतोराधेयः। पुरा क्रूरस्य विसृपो विरप्शिन्' इति। अत्रेदमवधेय यत् 'न लोकाव्ययनिष्ठाखलर्थतृणाम्' इति सूत्रानुसारं 'कृन्मेजन्तः' तथा 'क्त्वातोसुन्-कसुनः' इति सूत्रयोः बलेन क्त्वाच्-तुमुनादिप्रत्ययप्रयोगेन कर्तरि कर्मणि च षष्ठी न भवति। परन्तु उपर्युक्तवार्तिकेन तोसुन्-कसुन्-प्रत्ययप्रयोगे कर्तरि कर्मणि षष्ठी भवत्येव।

पाश्चात्यवेदगवेषकैः Macdonell प्रभृतिभिः वैदिकभाषायाः कारकप्रसङ्गे केचन विशिष्टा नियमा प्रोक्तास्ते हि-

प्रथमतः - वाक्ये विधेयांशस्य कर्तरि क्वचित् क्वचित् सम्बोधनपदानां प्रयोगो भवति। यथा 'अभूरेको रयिपते रयीणाम्। (इन्द्र आत्मानं) गौतम ब्रवाण'।

द्वितीयतः - वेदे सम्बोधनपदद्वयं च शब्देन यस्मान्न युक्तं भवति तस्मादेकस्मिन् पदे एव कर्तरि प्रथमा भवति। यथा 'वायविन्द्रश्च चेतथः' इति। 'इन्द्रश्च सोमं पिवत बृहस्पते' इति।

तृतीयतः - वेदे उपसर्गविशिष्टस्य अञ्च्-धातोः प्रयोगेन द्वितीया भवति। यथा 'प्रत्यङ् उषसम्'। 'अनूची गार्हपत्यम्'।

चतुर्थतः - 'ऋते' योगेन ऋक्-संहितायां पञ्चमी भवति। ब्राह्मणे तु द्वितीया एव भवति। यथा 'इन्द्रम् ऋते' इति। किञ्च 'एत्' इत्यव्यययोगेनापि द्वितीया भवति। ब्राह्मणे- 'एद् धतं वृत्रम्' इति।

पञ्चमतः - Dative infinitive bR;L; प्रयोगेन कर्मणि चतुर्थी भवति। Dative means by attraction, यथा 'शरवे हन्तवा उ। दृशये सूर्याय- इति।

षष्ठतः - समग्रस्य अंशविशेषार्थे षष्ठी भवति - Partitive Genitive यथा 'सोमस्य पिब। सोमस्य त्वा यज्ञि। मित्रो वै शिवो दैवानाम्'। इत्यादीनि।

सप्तमतः - अधि, अन्त्, अपि, आ, उप, सचा इत्येतेषाम् अव्ययानां प्रयोगेन सप्तमी विभक्तिरपि वेदे भवति। यथा- देवेष्वधि। आ चास्मिन्।

एवं भावेन वैदिकभाषायां रूपतात्त्विकवैशिष्ट्याधारेण कारकप्रसङ्गे पाणिनीयसूत्रेण सह पाश्चात्यवेदगवेषकानां मतं यथामति सविशेषं पर्यालोचितमित्यलं पल्लवितेन। इति शिवम्।

**सहायकग्रन्थाः**


1. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्त्ववोधिनीसंहिता) चतुर्थोभागः, सम्पा. श्रीगिरिधरशर्मा, श्रीपरमेश्वरानन्दशर्मा च, मोतीलाल- बनारसीदास, सं 2008, वाराणसी।*
2. *वैदिकव्याकरणम्, सम्पा. श्रीश्यामाचरणकविरत्नः, संस्कृतपुस्तक भाण्डारः, कलिकाता सं 1999।*
3. *वैदिकव्याकरणम्, अमरकुमारचट्टोपाध्यायः संस्कृतपुस्तकभाण्डारः कलिकाता सं 2011।*
4. *पाणिनीयवैदिकव्याकरणम्, सम्पा. अशोककुमारवन्द्योपाध्यायः संस्कृत-पुस्तक भाण्डारः, कलिकाता सं. 2006।*

# 19

# अथर्ववेदेऽग्नितत्त्वम्

*नन्हेप्रसादद्विवेदी*

कृत्स्नमप्येतद् ब्रह्माण्डं पंचतत्त्वमयम्। तत्त्वेषु च अग्निः श्रेष्ठ। तं विना तत्त्वान्तराणि जगद्भावमासादयितुं न क्षमेरन्। अत एवोच्यते वैदिकेन तत्त्वविदा-

वैशानरः रश्मिभिः नः पुनातु वातः प्राचीन इषिरो नमोभिः।
द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये नः पुनीताम्।।

(अ.का. 6।62।1)

अत्र वैश्वानरः (अग्निः) वातः (वायुः) इषिरः (जलम्) द्यावा (आकाशम्) पृथिवी (पृथ्वी) शब्दा व्यवह्रियन्ते। अत्र वैश्वानरशब्दस्य प्रथमस्थानत्वात् तत्प्रधानं विश्वमिदमित्यपि मंत्रादस्माद् ध्वन्यते। अतो हि अथ-र्ववेदोल्लिखिता अग्नेर्गुणाः समुपस्थाप्यन्ते तद्यथा-

(1) शत्रुनाशकः - 5।3।10, 10।3।14, 16।6।11, 11।5।61, 6। 103।2, 6।10।42-3, 16।9।1-2, 12।1।6, 7।34(35)।1, 7।62(64)।1, 7।110(115)।2, 7।71(74)।1, 7।53।(55)।10।

(2) शत्रुसेनाविध्वंसकः - 11।10।4, 9।2।4, 9।2।6, 9।2।9।

(3) दीर्घायुष्यप्रदाता - 7।53।(55)।3, 7।61(63)।1-2, 7।33 (34)।1, 7।82(87)।2, 8।2।21, 8।5।19, 9। 1।15, 13।1।17, 13।1।20, 10।5।47, 3। 31।1, 2।29।1, 2।28।5, 3।11।4, 6।76।2, 12।2। 13, 12।2।6, 9।1।15

(4) धनप्रदाता - 3।20।1, 1।9।4, 2।29।1-2, 3।20।5, 5।7।6,

| | | | |
|---|---|---|---|
| | | | 3 ।15 ।8, 7 ।82(87) ।2, 7 ।78 (83) ।1-2, 7 ।-97(102) ।3, 6 ।5 ।42, 6 ।63 ।4, 7 ।17-18 ।4, 12 ।2 ।46, 2 ।6 ।5 ।, 18 ।1 ।26 |
| (5) | दस्युघातकः | - | 1 ।16 ।1, 1 ।28 ।1, 18 ।2 ।28 । |
| (6) | यज्ञ-रक्षकः | - | 6 ।53 ।1, 6 ।3 ।2, 6 ।35 ।1, 5 ।3 ।2, 3 ।15 ।7 3 ।15 ।7, 3 ।20 ।4, 18 ।4 ।9, 16 ।4 ।4, 8 ।3 ।9, 8 ।2 ।27 । |
| (7) | मृत्यु-दस्युरक्षकः | - | यज्ञरक्षकवत् |
| (8) | विजयदाता | - | 5 ।3 ।1, 16 ।9 ।1-2, 11 ।1 ।1-2, 11 ।9 ।19, 12 ।2 ।46 । |
| (9) | स्वपक्षोन्नायकः | - | 5 ।3 ।1, 16 ।9 ।1-2 । |
| (10) | देवहविष्प्रापकः | - | (1) 5 ।8 ।1, 5 ।8 ।3, 5 ।27 ।12, 1 ।7 ।3, 11 ।1-16, 3 ।10 ।6, 4 ।23 ।4 ।(2) पितृहविष्प्रापकः 18 ।1-56, 18 ।3 ।42, 18 ।2 ।34 । |
| (11) | देवपुरोहितः | - | 5 ।12 ।11 । |
| (12) | होता | - | 5 ।17 ।2, 18 ।4 ।15, 6 ।71 ।1 । |
| (13) | शत्रुसेनापराजयिता | - | 5 ।14 ।8, 3 ।1 ।1 । |
| (14) | हव्यभक्षकः | - | 5 ।12 ।10 । |
| (15) | वसुप्रदाता | - | 5 ।12 ।3, 6 ।73 ।1, 8 ।3 ।9 |
| (16) | ज्ञानप्रदाता | - | 8 ।3 ।22, 7 ।78(87) ।2, 7 ।78(83 ।1-2) |
| (17) | प्रकाशकः | - | 8 ।3 ।24, 7 ।84(89) ।1, 6 ।34 ।3, 12 ।2 ।18, 18 ।4 ।59, 6 ।35 ।3 । |
| (18) | सौभाग्यदाता | - | 7 ।73(77) ।10, 6 ।110 ।1, 14 ।1 ।49 । |
| (19) | तेजः प्रदाता | - | 8 ।3 ।22, 7 ।82(87) ।2, 7 ।78(83) ।1-2, 6 ।35-6 ।35 ।3, 9 ।1 ।15, 13 ।1 ।17-20, 10 ।5 ।46, 3 ।38 ।1, 6 ।58 ।3, 6 ।34 ।1, 12 ।2 ।46, 18 ।1 ।33, 2 ।6 ।5 । |
| (20) | संतानप्रदाता | - | 7 ।74(78) ।4, 10 ।6 ।35, 10 ।5 ।47, 2 ।29 ।1, 11 ।1 ।1, 9 ।1 ।15, 6 ।5 ।1 । |

(21) ऐश्वर्यप्रदाता - 7 ।82(87) ।3, 7 ।82(87) ।2, 6 ।94 ।3, 6 ।5 ।1

(22) पापमोचकः - 4 ।33 ।1, 4 ।23 ।1, 12 ।2 ।12, 12 ।2 ।47, 11 ।6 ।1, 2 ।6 ।5 ।

(23) शत्रुविजेता - 4 ।31 ।1 ।

(24) कृमिनाशकः - 5 ।23 ।1, 5 ।23 ।13, 5 ।29 ।10, 5 ।29 ।14-15 ।

(25) ज्वरनिवारकः - 5 ।22 ।1 ।

(26) रोगपहारकः - 3 ।11 ।1, 14 ।2 ।69, 5 ।29 ।13, 18 ।3 ।55,7 ।84 (89) ।1,6 ।85 ।3,6 ।112 ।1,12 ।2 ।14,2 ।28 ।1 ।

(27) स्वर्गप्रापकः - 18 ।4 ।13, 18 ।4 ।10, 18 ।4 ।1, 18 ।2 ।54, 11 ।1 ।4, 4 ।14 ।2 ।

(28) शवदाहकः - 18 ।3 ।71, 18 ।2 ।36, 58 ।

(29) सर्वज्ञः - 18 ।2 ।35 ।

(30) पितृलोकप्रापकः - 18 ।2 ।54 ।

(31) शरीरपोषकः - 2 ।29 ।2, 5 ।29 ।12, 3 ।15 ।8 ।

(32) रक्षोनाशकः - 5 ।29 ।11, 6 ।34 ।2, 6 ।32 ।1,

(33) दुःखमोचकः - 5 ।28 ।2, 3 ।15 ।3 ।, 1 ।8 ।4 ।

(34) वसुवर्धकः - 5 ।28 ।4 ।

(35) वीरत्वप्रदाता - 10 ।6 ।6

(36) समुतिदाताः - 10 ।6 ।35 ।

(37) कल्याणकरः - 10 ।6 ।35, 12 ।2 ।11, 5 ।30 ।12 ।

(38) दुष्टसंहारकः - 10 ।5 ।4 ।, 8 ।1 ।17, 8 ।1 ।2, 1 ।28 ।1 ।

(39) दूतः - 5 ।12 ।1, 1 ।7 ।6 ।, 2 ।12 ।7, 3 ।2 ।1,

(40) वर्चस्वदाता - 10 ।5 ।47, 1 ।9 ।1, 2 ।28 ।5, 2 ।22 ।3, 6 ।5 ।1 ।,

(41) विश्वव्यापक - 11 ।7 ।1, 3 ।21 ।7, 7 ।110(115) ।1 ।

(42) ज्ञानस्वरूपः - 5 ।12 ।1, 7 ।71(74) ।1, 8 ।3 ।22, ।

(43) तेजोरूपः - 3 ।21 ।5 ।

(44) सत्यभाषी - 3 ।21 ।5 ।

(45) ज्ञानयज्ञयोवर्धकः - 3 ।2 ।5 ।

(46) क्रोधस्वरूपः - 7 ।70(73) ।4-5 ।

(47) पालकः - 7 ।84(89) ।1, 12 ।2 ।47, 2 ।16 ।4 ।

(48) प्रेरकः - 7 ।97(102) ।3, 9 ।3 ।22,

(49) हव्यप्रदाता - 7 ।109(114) ।2 ।

(50) जलप्रदाता - 7 ।109(114) ।2 ।

(51) अमरत्वप्रदाता - 7 ।116(111) ।1 ।

(52) उग्रस्वरूपः - 7 ।108(114) ।1 ।

(53) घृतप्रदाता - 7 ।109(114) ।2 ।

(54) वंशवर्धकः - 6 ।112 ।1 ।

(55) बंधनमोचकः - 6 ।121 ।2, 16 ।8 ।27, 6 ।112 ।2 ।

(56) मेघाप्रदाता - 6 ।108 ।4, 7 ।61(63) ।1-2, 12 ।1 ।53 ।

(57) शीतापहारकः - 6 ।106 ।3 ।

(58) ऋणमोचकः - 6 ।119 ।1

(59) उन्मादमोचकः - 6 ।111 ।4

(60) मुक्तिप्रदाता - 6 ।111 ।1, 2 ।34 ।3, 6 ।120 ।1 ।

(61) साक्ष्यप्रदाता - 6 ।117 ।1-2 ।

(62) कामोन्मादकः - 6 ।130 ।4 ।

(63) यशोदाता - 6 ।39 ।3 ।

(64) दुःस्वप्ननिवारकः - 6 ।45 ।2 ।

(65) दाहकः - 6 ।20 ।3

(66) मलापहारकः - 12 ।2 ।19 ।

(67) कष्टप्रदाता - 12 ।2 ।15 ।

(68) शचिप्रदाता - 12 ।2 ।17, 12 ।2 ।11 ।

(69) प्रणापहारकः - 12 ।2 ।16 ।

(70) जलतापकः - 12 ।3 ।25 ।

(71) नास्तिकदुःखप्रदाता- 12 ।3 ।25 ।

(72) मित्रस्तुत्यः - 18 ।1 ।33 ।

(73) देवसहायकः - 11 ।1 ।4 ।

(74) कुमार्गवरोधकः - 8 ।5 ।5 ।, 1 ।8 ।4 ।

(75) कवचप्रदाता - 8 ।5 ।5 ।, 8 ।5 ।18

(76) अमृतस्वरूपः - 9 ।3 ।23, 3 ।12 ।9 ।

(77) अन्नपाचकः - 9 ।5 ।5 ।

(78) सत्यप्रकाशकः - 6 ।36 ।1

(79) अशुभनिवारकः - 6 ।29 ।1 ।

(80) सर्वतो द्रष्टा - 6 ।34 ।4

(81) विश्वधारकः - 2 ।1 ।4

(82) अमृतदाता - 4 ।23 ।6 ।

(83) सिद्धिदाता - 3 ।15 ।3 ।

(84) शत्रुचित्तमोहकः - 3 ।2 ।2 ।

अथर्ववेदेऽग्निवर्णनमृग्वेदवदेव काव्यात्मकमस्ति। अग्निस्तु वैदिकानामृषीणो मुख्य आराधनीयः। आराधक आराध्यं प्रति यदा आत्मविस्मृतो जायते तदा तस्मै स्वाभाविकी उपमा निस्सरति तन्मुखात्। अतोऽथर्ववेदेऽग्नेवर्णनमुपमेयोपमानतया बहुत्र लभ्यते। तदेवेदानीमुपस्थाप्यते-

(1) आयुवर्धकोऽग्निः पितेव पुत्रानभिरक्षति। (2 ।13 ।1)

(2) यथाग्निर्यजमानाय सर्वान्कामान् दोग्धि तथैव तृणानि प्रशुभ्यः सर्वान्कामान् दुहन्ति। (18 ।1 ।22)

(3) यथाज्यं प्रगृहीतमालुम्पेत स्रुचो अग्नये।
एवा ह ब्रह्मभ्यो वशामग्नय आ वृश्चतेऽददत्। (12 ।4 ।34)

अत्राग्निर्विप्रत्वेन वर्णितः। यथा कश्चित् पुरूषोऽग्नये स्रुचा गृहीतं घृतं भूमौ पातयन् तद्दोषभाग्भवति। तथैव विप्राय गोदानं प्रतिज्ञाय न ददद् दोषभाग्भवति।

(4) यथा ज्वलन्नग्निः जलस्थानं परित्यजति। दद्वत् हे दुष्टभाषण। त्वमस्मान् त्यज। (6 ।37 ।2) अत्र दुष्टभाषणेनाग्निरुपमीयते।

(5) यथाश्वा वाहकान् पुरुषान् गन्तव्यस्थानं नयन्ति तथैवाग्नयो याजकान् स्वर्ग प्रापयन्ति। (18 ।4 ।10)

(6) यथा गोपः स्वगोसमूहं सुष्ठुतया जानाति तथैवाग्निर्देवसमूहं सुष्ठुतयावगच्छति। (18 ।3 ।23)

(7) विवाहकाले यथा वरो वध्वा दक्षिणहतं गृहणाति तथैवाग्निभूम्या दक्षिणहस्तं गृहणाति। दाम्पत्यजीवनस्य निदर्शनमिदम्। (14 ।1 ।18)

(8) अग्निः कृष्णाया रात्र्याः पुत्रः। यतो हि रात्रावेव सविशेषं स प्रकाशते। पश्चात् प्रातः सूर्यो भूत्वा द्यामधिरोहति। अत्राग्निराज्योर्मातृपुत्र-योस्संबंधः। (3 ।13 ।26)

(9) वेदा अग्निं स्तुवन्ति। तान् रक्षत्यग्निः। स ज्येष्ठभ्रातृवदुपदिशत्यस्मान् सदा। (18 ।1 ।19)

(10) विप्रद्रोहोऽग्निद्रोहवद् भवति। यो विप्रं ताडयति तमग्निर्दहर्ति। (5 ।18 ।4-6) ''न ब्राह्मणो हिंसितब्योग्निः प्रियतनोरिव'' (5 ।18 ।6) इति वेदवचनात्। अग्निरत्र विप्रत्वेनोपमीयते।

(11) यथा यज्ञशाला अग्निगर्भा जायते तद्वत् पत्नयपि पुत्रत्वेनाग्निगर्भा भवति। (9 ।5 ।21)

(12) यथौषध्यो रोगापनयनसमर्थात्तद्वदग्नयोऽपि तस्मिन् समर्थाः सन्ति। (8 ।7 ।15)

(13) यथोधिर्दहन्तमग्निं प्रशमयति तथैवौषधिर्दहन्तमीर्ष्याग्निमपि प्रशमयितु शक्नोतीति। (7 ।45-46-47 ।2)

विज्ञानं द्विविधम्-भौतिकमाध्यात्मिकञ्चेति। वेदेष्वस्य विज्ञानद्वयस्य वर्णनप्राधान्यं वर्तते। भौतिकं विज्ञानं मानवजीवनस्य वाह्यावरणम्। तेनैव मानवः स्वोद्देशं प्रपूर्य सुखी भवितुमिच्छति। परञ्च तस्यान्तिमं लक्ष्यमाध्यात्मिकविज्ञानमेव भवति। भौतिक विज्ञानस्य कृतेऽग्निर्मुख्यतमं साधनं येन तत्र सर्वाः क्रियाः सम्पद्यन्ते।

अतोऽथर्ववेदे भौतिकविज्ञानदृष्टया तस्य तत्त्वानि प्रस्तूयन्ते-

(1) 'तेषां वो अग्निमूढानामिन्द्रो हन्तु वरम् वरम्' (6 ।67 ।2) अस्मिन् मंत्रे ''अग्निमूढ'' इति पदस्य ''अग्निना मूढ'' अग्निमूढ इति व्याख्यया अग्निनिर्मितं किंचिदस्त्रं प्रतीयते,येन जना मोहिता जायन्ते। अस्य प्रयोगो युद्धे क्रियते। प्रयोक्ता चास्येन्द्रः।

(2) ''विश्वभृदग्निः पिपर्त्वयसा सजोषाः'' (5 ।28 ।5) अत्र मंत्रभागे ऋषिः ''अयसा अग्निरस्मान् पालयतु'' इति स्तौति। सत्यत्वेनाग्निरयोमयो

भूत्वा शरीरं पालयति येन स्वास्थ्यमभिवर्धते। शरीरेऽयोभागस्य (Iron) न्यूनतया विविधानां रोगाणामुत्पत्ति भवति।

(3) पूतिरज्जुरुपध्मानी पूर्ति सेनां कृष्णोत्वमूम्।

धूममग्निं परादृश्यामित्रा हृत्स्वा दधतां भवम् (8/8/2) अत्र गन्धयुक्तं अग्निधूमं दृष्ट्वा शत्रवः स्वहृदि भयं धारयन्त्विति मंत्रार्थः। मंत्रास्य प्रथम-द्वितीय-तृतीयभागे क्रमशः ''उपध्मानीपूतिरज्जु पूर्ति सेनाम्'' ''धूममग्निम्'' एभिः पदैरग्निद्वाराथर्ववेदकालेऽपि शत्रुसंहारात्मकम्य कस्यचिद् द्रव्यविशेषस्याविष्कारः प्रतीयतें।

(4) अग्नेर्वातस्य ध्राज्या तान् विषूचो विनाशय (3।2।3)

अस्मिन् मंत्रे आग्नेयास्त्र-वायव्यास्त्रयोः संकेतः स्पष्टतयावलोक्यते। शत्रुविनाशयास्त्रद्वयस्य प्रयोगं कर्त्तुं वाञ्छति ऋषिः।

(5) तां विध्यत तमसापव्रतेन। (3।2।6)

इत्यमत्रापि ''तमसा'' इति शब्दप्रयोगादन्धकारास्त्रस्य वर्णनं प्राप्यते। अनेनान्धकारो जायत इत्यनुमीयते। अस्यापि प्रयोगो युद्धप्रसंगे शत्रुनाशायेव भवति।

(6) विज्ञानसाहित्ययोरेकत्र प्रकाशो दर्शनीयः। यथा पृथिवी धेनुस्तस्या वत्सोऽग्निः। एवं वत्सवती पृथिवी जनानां सर्वान् कामान् पूरयति। पृथिव्यामग्निनैव अन्नाद्युत्पत्तिभवति। एवं पृथिवी अग्निसाहाय्येन परिवर्तन्ते। (4।39।2)

(7) अग्नेः सविता जातः। सुवर्णानि जलाानि अग्निं धारयन्ति। जलानामग्निगर्भत्वेन ततो विद्युज्जायते। जलाग्निसंयोगेन विद्युदाविष्क्रियते। (1।33।1) इति विज्ञान-सम्मतम्।

इत्यं भौतिकविज्ञानदृष्ट्याग्नितत्त्वं प्रदर्श्यसाम्प्रतमाध्यात्मिकविज्ञानमभि लक्ष्याथर्ववेदान्तर्गतमग्नितत्त्वमुद्धियते।

(1) ये जना अग्निं परित उपविश्य तस्मिन् हवनं कुर्वन्ति, तं च चक्षुषा पश्यन्ति, तेषां हृदि अलौकिक आत्माग्निः प्रज्वलति। तपोनिष्ठा योगिन एतत्कार्यं मोक्षलाभाय कुर्वन्ति। (6।76।1)

(2) अग्निः प्राणचक्षुषोः शक्तिमुत्पाद्यामृतत्वाय जनान् प्रेरयति सदा। (5।30।14)

(3) समस्तकर्मसाधनभूतं पार्थिवरीरं यज्ञचमसस्वरूपं तद्रक्षां करोत्यग्निः। शरीरेणैव जगति जनानामस्तित्वं विद्यते। (6 ।76 ।1)

(5) शरीरस्थितमजभागं शवदाहकलेऽग्ज्वाला द्युलोकं प्रापयन्ति। पश्चात् क्रव्यादग्निः शरीरं दहति। (18 ।2 ।8-9)

(6) प्रथममेकोऽग्निरेव सदासीत्। यथा ''एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः''। (9 ।10 ।28)

(7) विद्वांसः प्रथममादित्यं ततोऽग्निं त्रिवृतात्मानं हंसरूपं जानन्ति। (10 ।8 ।17)

(8) अजः (जीवात्मा) अग्नेः (परमात्मनः) शोकात् (तेजसः) प्रादुर्भूतोऽग्निरत्र ब्रह्मत्वेन वर्णितः। (9 ।5 ।13) इत्यमेव ''अजोह्यग्नेरजनिष्ट शोकात्''। (4 ।14 ।1)

(9) सर्वेषां हृदि कामाग्नित्वेनाग्निरेव वर्तते। येन स्त्रीपुंसोः रिरंसा जायते। इत्थमग्निः कामो भूत्वा विश्वं तापयति। अग्निस्वरूपस्य शिवस्य कामदाहः स्वस्मिन् संयमप्रतीकात्मकत्वेन प्रतीयते। (3 ।21 ।4)

अग्नेर्महत्त्वं विभिन्नदृष्ट्या प्रतिपादयितुं शक्यते। तेषु राष्ट्रिय-दृष्ट्या प्रतिपादनं प्रशस्यतरम्। यथा-

(1) राष्ट्रेऽग्निप्रेरितान् जनान् शत्रवोऽभिभवितुं न शक्नुवन्ति। क्रान्तित्वेनात्राग्निवर्णितः। (4 ।40 ।1)

(2) देशवासिनां शरीरे उत्साहो भूत्वाग्निर्निवसति। अत्रापि उत्साहेन राष्ट्ररक्षा भवत्येवं ध्वन्यते। (4 ।40 ।1)

(3) शस्त्रधारिणो नरोऽग्निस्वरूपा एव भवन्ति। (4 ।31 ।1)

(4) राष्ट्ररक्षणे वैश्वानरस्याग्नेर्महत्त्वं न न्यूनम्। अस्मिन् विषये ऋषिः कथयति- ''वैश्वानरस्याग्नेः दंष्ट्रयोः शत्रून् स्थापयामि''। (4 ।36 ।2)

(5) राष्ट्रे राष्ट्रियभावनाप्रवर्तयिता वर्ततेऽग्निः। क्रान्तिरति नामना स तदाभिहितो जायते। (3 ।81)

(6) अथर्ववेदस्य ऋषिरिच्छति यद् विराधरहितं वचनं परस्परं बुवद्भिः राष्ट्रनिवासिभिर्जनैस्सदा राष्ट्रियाग्निः प्रज्वालयितव्यः। अत्राग्निः संगठनप्रतीको वर्ण्यते। (3 ।8 ।3)

(7) वैश्वानरेणाग्निना राष्ट्रयज्ञः प्रवर्तितः। तेनैव संघशक्तिरपि उद्भूता। (8 ।9 ।6)

(8) राष्ट्रसमृद्धये ऋषिः स्तौति 'अग्ने इदं राष्ट्रं पिपृहि सौभगाय' (7 ।35 ।36 ।1)

अग्नि-स्वरूपाणां मध्ये क्रव्यादिति रूपं तस्य कठोरत्वं प्रतिपादयति। इदं च तस्य निम्नलिखितैः कार्यैः स्पष्टम्।

(1) क्रव्यादग्निः सदा पापरतं पापिनं दण्डयति। (12 ।2 ।50)

(2) क्रव्यादग्निः श्रद्धाहीनं लोलुपं परसवुप्रेक्षकं जनं दहति (12 ।2 ।51-52)

(3) कृष्णाविः,सीसकः,अयः, माषाश्चेति तस्य भागो निर्धारितः। (12 ।2 ।53)

(4) तस्मिन् इषिका-तिलपुंज-समित्-तृणानामाहुतयो दोयन्ते। (12 ।2 ।54)

(5) क्रव्यादग्निः सर्वनाशं करोति। (12 ।2 ।35-36)

(6) विद्वान् ब्राह्मण एव तमसारयितुं शक्नोति। (12 ।2 ।39)

(7) क्रव्यादग्निा पितृयानमार्गो यजनाग्निना देवयानमार्गश्च प्रशस्तो भवति। (12 ।2 ।10)

(8) एष पितृदाहकाग्निः कथ्यते। अनेन पितृयज्ञो भवति। यजनाग्निना देवयज्ञो भवति। यजनाग्निदेवेभ्यो हविष्प्रापयति। (12 ।2 ।7-8)

(9) क्रव्यादग्निः शत्रून् नाशयति (13 ।1 ।29-30-31)

(10) गार्हपत्याग्निः क्रव्यादग्निं शास्ति। प्रथमो वंश वर्धते। द्वितीयस्तु तं नाशयति। अतो विवाहकाले पथमेनाग्निना कार्य भवति। (12 ।2 ।9)

एतानि खल विशिष्टानि अग्नेः रूपाणि, साम्प्रतं सामान्यानि वर्ष्यन्ते।

(1) अग्निरात्मदो बलदश्च वर्तते। तस्याज्ञां सर्वे पायन्ति। स एव द्विपादचतुष्पादयोः स्वामी वर्तते। (13 ।3 ।24)

(2) तस्मिन्नेवाग्नौ सर्वे देवास्तिष्ठन्ति। स एवैकाकी पुञ्जीभूतं तेजः। स्वतेजसा प्रजाभ्यः सुखं संपादयति। (13 ।4 ।12)

(3) विवाहकाले वरवध्वौ अग्निप्रदक्षिणां कुरुतः। (14 ।1 ।39)

(4) अग्निरायुषा वर्चसा सह पत्ये पत्नीं प्रयच्छति। (14 ।2 ।1)

(5) स्त्रीणां प्रथमः पतिः सोमो द्वितीयो गन्धर्वस्तृतीयोऽग्निस्तुरीयस्तु मनुष्यो भवति। इत्थमग्निः पत्न्यै पति प्रयच्छति। (14 ।2 ।3)

(6) कुमारीभिरुत्तमपतिप्राप्त्यर्थमग्निरुपासनीयः। (24 ।2 ।25) (2 ।3613)

(7) अग्निर्मनुष्याणां हिताभिलाषी वर्तते। (15 ।14 ।14-15)

(8) प्रथमजस्य व्रात्यपुरुषस्याग्निः प्रथमः प्राणो वर्तते। (15 ।15 ।3)

(9) तस्य व्रात्यपुरुषसयाग्निर्दक्षिणाकर्णो वर्तते। (15 ।18 ।3)

(10) व्रात्यपुरुषवर्णनप्रसंगे आहवनीय-गार्हपत्य-दक्षिणाग्रीनामुल्लेखः प्राप्यते। (15 ।14)

(11) युवावस्थायां नरनारीणां शरीरेऽग्निनस्तेजोरूपेण तिष्ठति (12 ।3 ।2)

(12) अग्निः प्राची दिग्वर्तते। (12 ।3 ।7)

(13) सर्वेऽग्नयः स्वं परस्परं जानन्ति। (12 ।3 ।50)

(14) मनुष्यदेवयोर्मध्ये गार्हपत्याग्निस्सदा निवसति। (12 ।2 ।45)

(15) विदिताग्निर्यजमानः कस्मादपि न बिभेति। (6 ।25 ।2)

(16) अग्निर्वै ऋतुयोनिः ।(6 ।36 ।2)

(17) भूतभविष्यत्वर्तमानकाले जगत्कामनानां पूरयिताग्निः सम्राडिव विराजते। (6 ।36 ।3)

(18) अग्निर्होता, विद्वान्, देवानां जन्मदातास्ति ।(2 ।28 ।2)

(19) अग्नेस्तपन-हरणार्चन-शोधन-तेजनमिति पंचकार्याणि सन्ति। (2 ।19-32 ।1-5)

(20) अग्निः प्राणत्वेन द्यावापृथिवीं तर्पयति। अपानत्वेन समुद्रस्य जठरं पिपर्ति। (13 ।3 ।4-5)

(21) सायंप्रातर्जनैः प्रक्षिप्तया समिघा अग्निर्यज्ञोत्पादको भवति। (13 ।2 ।46)

(22) भ्रष्टधा भूत्वा देवानां जनिता, मतीनां जनिता, उग्रः, वह्निः, सर्वत्र अतति। (13 ।3 ।19)

(23) पृथिवीद्युलाोकान्तरिक्षस्थानीयोऽग्निः। अतस्त्रेधा स विराजते।(13 ।3 ।21)

(24) सूर्यरश्मिभिर्यज्ञेन चाग्निः प्रज्वलति। (13 ।3 ।23)

(25) आत्मत्वेनाग्निः सर्वत्र एक एव। य एवं तं जानाति पूजनीयः स तं रक्षति। (18 ।1 ।34)

(26) जनसुखकरान् ग्राह्यान् पदार्थानग्निर्धारयति। (18 ।1 ।30)

(27) स द्यावापृथिवीं वितनोति। (18 ।1 ।28)

(28) स एव याजकत्वेन जनान् याजयति। स (18 ।1 ।29)

(29) मनुष्यदेवयोर्मध्ये स मध्यगो वर्तते। (18 ।1 ।25)

(30) अग्निमित्रो जनो धनधान्यादिभिः समृद्धो जायते। (18 ।1 ।24)

(31) सूर्यवदग्निः पितृन् प्रकाशयति। (18 ।1 ।21)

(32) याजकाास्तस्य साहाय्येन सोमपानं कुर्वन्ति। (18 ।1 ।21)

(33) स एव प्रथममुषारूपेण प्रकाशते। पश्चात् सूर्यकिरणत्वेन पृथिव्याकाशयोरन्तरालं व्याप्याधितिष्ठति। इत्थं सूर्यादयोऽग्निरूपा एव। (18 ।1 ।27)

(34) स्वज्वालाभिः प्रदीप्तः सन्नग्निः पृथिवी-जलान्तरिक्षादिषु स्थानेषु विभिन्नतया प्रतिभाति। (18 ।3 ।65)

(35) विभिन्ना अग्नयश्चतसृषु दिक्षु वसन्ति। (18 ।4 ।8)

(36) त्रेधापि अग्निरेको भूत्वा याजकान् रक्षति। (18 ।4 ।11)

(37) प्रदीप्ताग्निर्जनो देवयानमार्गेण गच्छति। (18 ।4 ।14)

(38) हविषा तृप्तोऽग्निः पितु न पोषयति। (18 ।4 ।35)

(39) अग्निर्जनान् सुकर्मणि नियोजयति। (18 ।4 ।13)(5 ।27 ।2)

(40) ऋषिभिर्वाणीवर्धनायाग्निः स्तूयते। (18 ।3 ।24)

(41) पितृभ्यः क्रव्यं प्रयच्छत्यग्निः। (18 ।1 ।56)

(42) वनस्पतीनामधिपतिरग्निः। (5 ।24 ।2)

(43) मार्गदर्शकोऽग्निः ''अग्निर्वै नः पदवायः'' इति वेदवचनात्। (5 ।18 ।14)

(44) भूतभविष्यत्वर्तमानेषु सदा प्रकाशकोऽग्निः। (4 ।23 ।7)

(45) येऽग्निं नमन्ति ते पृथिव्यां समृद्धिमन्तो जायन्ते। (4 ।36 ।4)

(46) देवेष्वग्निः प्रथमजो मनुष्यदेवयोश्चक्षुष्टवेनाभिहितः। (4 ।14 ।5)

(47) प्रातस्मरणीयोऽग्निः। (3 ।16 ।1)

(48) येऽस्माकं कार्योपघातकास्तानपसारयति वह्निः।(3 ।15 ।5)

(49) अग्नयो बुद्धौ निवसन्ति। (2 ।35 ।1)

(50) अग्निर्वैद्यो भूत्वा रोगानपाकरोति। (5 ।29 ।1)

(51) अग्निना स्वर्णं जातम्। अतस्तं ''हिरण्यरेताः'' इति कथयन्ति विद्वांसः। (5 ।28 ।6)

(52) अग्न्युपासनया सूर्यवद् ज्ञानमुदेति। (5।30।11)

(53) स्तुत्योऽग्निर्घृतेन जीवति। (5।27।4)

(54) आहुतिभक्षणद्वाराग्निर्यज्ञं प्रेरयति। (5।27।3) (5।26।1)

(55) नारीणां गर्भेग्निस्तिष्ठति। ततः पुत्रत्वेनोद्भवति। (5।25।4)

(56) विश्वस्य भूतस्य गर्भेऽग्निरेव वसति। (5।25।7)

(57) विश्वरूपस्य वृषभस्यग्निर्ललाटं वर्तते। (9।7।1)

(58) विष्णोः पदक्रमोऽग्नितेज एवास्ति। (10।5।25)

(59) वैश्वानरत्वेनाग्निब्रह्मणः शिरोभागः। (10।7।18)

(60) धावापृथिव्योरत्नराले विश्वसंचालकत्वेन तिष्ठत्यग्निः। (1।8।39)

(61) गवि भवत्यग्निवासः। (10।1।7)

(62) द्विपदां चतुष्पदां घ्राणवायुरग्निवर्तते। (8।2।4) (8।2।13) (3।20।2)

(63) अग्निरन्तरिक्षे संचरन् दुष्टान् स्वजम्भेन नाशयति। (8।3।3)

(64) अग्निः प्रातरुषारूपेण प्रकाशते। स सूर्यस्य रश्मीन् धावापृथिव्याां विस्तारयति। (7।8287।4-5)

(65) अयोदंष्ट्रोऽग्निर्दुष्टान् स्वमुखे स्थापयति। (8।3।2)

(66) घृतमग्निस्थानम्। तेन स यज्ञे ज्वलति। (7।52।87।6)

(67) गोः स्तनेषु अग्निनिवसी भवति। तेन तत्र दुग्धमुष्णं भवति। यदुच्यते ''श्रातं मन्य ऊधनि श्रातमग्नौ सुशृतं मन्ये''। (7।72।3)

(68) अग्निः भूम्याम्, औषधिषु, अश्मसु, पुरुषेषु, गोष्वन्तस्तिष्ठिति। आपः तं बिभ्रति च। (12।1।29) (3।21।1)

(69) ''अग्नेरग्निरजायत'' (11।8।8) इति वचनादग्निः स्वयं जातः।

(70) मरणान्तरमग्निः पितृलोकं प्रापयति स तेषां दूतत्वमपि करोति। (18।4।64-65)

(71) दृश्यादृश्यान् पितृन् जानात्यग्निः। अतस्तान् प्रति हव्यं प्रापयितुं स समर्थो जायते। (18।4।41)

(72) विराट्पुरुषस्याग्निर्जिह्वा-वर्तते। (11।3।36)

(73) अग्निर्द्विविधः। एकः पृथिव्यामपरस्तु द्युलोके। द्वयोः संगमोऽन्तरिक्षे भवति। अग्निद्वयस्याधिष्ठाता ब्रह्मचारी वर्तते। (11।5।11)

(74) अग्निः प्राचीदिगधिपतिः। (3 ।27 ।1)

(75) अग्निर्जठरे प्राणान् दधाति। (3 ।31 ।6)

(76) शरीरस्थितानि समस्तानीन्द्रियाणि वर्धयत्यग्निः। (4 ।4 ।6)

(77) मधुविद्याग्नेरुद्भवति। (9 ।1 ।1-3-10)

(78) अग्निस्थानं गृहमस्ति। (9 ।3 ।7)

(79) पशवो मनुष्याश्चाग्निमन्तो धारयन्ति। (9 ।3 ।14)

(80) अग्निनाग्निरेधते। (9 ।5 ।6)

(81) अजोऽग्निर्ज्योतीरूपः सन्नन्धकारं नाशयति। (9 ।5 ।7)

(82) सर्वज्ञेन सहस्रवाहकेनाग्निा याजकाः स्वर्ग नीयन्ते। (9 ।5 ।14)

(83) वृषभः, पयस्वान्, पुमानग्निः सर्वत्र प्रकाशते। (9 ।4 ।3)

(84) अग्नये सोमो रोचते। (9 ।1 ।12)

(85) चौर्यकर्मरतं जनमग्निर्दण्डयति। (8 ।3 ।17)

(86) पापिनमग्निः सर्वत्र दहति। (8 ।3 ।19)

(87) कविः, अमर्त्योऽग्निः मर्त्यानस्मान् रक्षति। (8 ।3 ।20)

(88) अग्नियातुधानान् संहरति। (8 ।3 ।18-23)

(89) स्वतेजोरूपेण शृंगेणाग्निर्दुष्टान् संहरति। (8 ।3 ।25)

(90) दक्षिणाग्निरेव विराट् वर्तते, येन यज्ञः प्रवर्तते। (8 ।10 ।6)

(91) असत्यवादिनेऽग्निः क्रुध्यति। (8 ।4 ।14)

(92) औषध्योऽग्निभक्षणार्थं सन्ति। (8 ।7 ।8)

(93) तेन गृहस्थाश्रमे शुभकार्याणि भवन्ति। (6 ।122 ।3)

(94) अन्नरसविद्रावकान् पशुघातकान् चौर्यकर्मरतान् जनानग्निः प्रज्वलयति। (8 ।4 ।10)

(95) प्रकाशवान्, स्तुत्यः, पवित्रोऽग्निः रक्षांसि नाशयति। (8 ।3 ।36)

(96) जना अग्निसाहय्येन जरावस्थापर्यन्तं होमादिकार्यं कृत्वा स्वर्गं लभन्ते। (6 ।122 ।4)

(97) कामाग्निः (वीर्यम् अप्स्वन्तः योनौ सिंचति। (6 ।132 ।4)

(98) वसुगर्भोऽग्निवर्तते। (7 ।53 ।52 ।3)

(99) दुरवस्थायामग्नी रक्षको भवति। (7 ।63, 65 ।1)

(100) अग्निः पृथिवीं वशीकरोति। (6।86।2)

(101) अग्निः शत्रून् जयति। (6।97।1)

(102) अग्निः शुक्रत्वेनामिहितः। (6।97।1)

प्रकृत्युपादानभूताः पदार्था एव देवत्वेन कल्प्यन्ते। वैदिकदेवेषु श्रेष्ठोऽग्निस्तात्कालिकैः समस्तैदेवैः सह सम्बद्धोऽस्ति। सर्वे देवास्तेनैव प्राणन्ति। स एवानेकधाः सर्वत्र व्याप्य तिष्ठति। अतस्तस्याथर्ववेदोल्लिखितैदेवैः सह संबन्धः प्रस्तूयते।

(अ) - सूर्यण सह-

(1) तिग्मश्रृंगो रोहितो नाम वृषभोऽग्निः सूर्यं परिवभूव। यो द्विधा भूत्वा पृथिवीं द्युलोकं च विभर्ति, येन देवाः सृष्टिं कुर्वन्ति। (13।1।25)

(2) तृतीये द्युलोके निवसन् सूर्यत्वेनाग्निः सर्वान् प्रियपदार्थान् निर्माय स्व-तीक्ष्णेन प्रकाशेन तत्र प्रकाशते। (13।1।11)

(3) सूर्यः स्वप्रकाशेन सर्वं प्रकाशते। तेनैवाग्निः प्रदीप्तो भवति। तमेवाग्निं श्रेष्ठमामनन्ति विद्वांस। (13।1।40)

(4) रोहितो नाम सूर्यः शीतोष्णकालयोर्द्वाविग्नी गृह्णाति। (13।1।46)

(5) प्रातस्सायंकालद्वये सूर्योदयास्तयोरनन्तरमेव यज्ञाग्निः प्रदीप्तो भवति। (13।1।49)

(6) सूर्यायाग्निः प्रज्वलितः।(13।1।51)

(7) ''वह्निसूर्यस्य वाजिनम्'' इत्यस्मिन् मन्त्रभागे वह्निः सूर्याश्वत्वेन वर्ण्यते। वह्नयः सूर्यकिरणा एव सन्ति। (13।2।26)

(8) भ्राजन्तोऽग्नयः प्रज्वलन्ति। तथैव सूर्यस्य केतवः (रश्मयः) भ्राजन्ते। सूर्योऽग्निना विश्वं प्रकाशयते। (13।2।18) अतस्तत्रैवास्मिन्नपि मंत्रे ''जातवेदसं देवं वहन्ति केतवः'' इत्युक्तम्। (13।2।16)

(9) रोहितशब्दस्य प्रयोगोऽग्निसूर्ययोः कृते सामान्यतयोपलभ्यते(सूर्यस्य कृते) 13।2।22-23, 39-40 मन्त्रे, अग्नेकृते (13।1।13-14) मंत्रे।

(10) अग्निः सूर्यरश्मियज्ञयोरुत्पादको वर्तते। (13।3।23)

(11) पापमुक्तयेऽग्निसूर्यो सततमुपासनीयौ स्तः। ''अग्निष्ट्वा तस्मादेनसः सविता च प्रमुञ्चताम्''। (14।2।59)

(12) अग्निसूर्यवर्णनं ब्रह्मक्षत्त्रत्वेनोपलभ्यते यथा ''अयं वा उ अग्निब्रह्मासा-वादित्यः क्षत्रम्''(15 ।10 ।7)

(13) अग्निसूर्ययोर्मध्ये तिष्ठन् जनः कदापि एवं गोपायितु समर्थो न भवति। (13 ।1 ।57)

(ब) जलेन सह-

(1) अग्निर्द्यूलोकाज्जलं वर्षयति। येन जना ऋतुयागं कुर्वन्ति। इत्यं वृषा, सोऽधृष्यः, पूजनीयो भवति। (18 ।1 ।18)

(2) अग्निर्जलवर्षकः। दिव्या अग्नयो लत्वेन मुक्ताः। (16 ।1 ।1)

(3) जलं भूत्वाग्निः समुद्रं गच्छति तत्र प्रविशति च। (16 ।1 ।8)

(4) सुवर्णा आपोऽग्निगर्भाः सन्ति।(1 ।33 ।2)

(5) अग्निजलं प्रविश्य तद्दहति। (1 ।25 ।1)

(6) यदग्निर्जलं वर्षयति तदा पृथिवीस्थाः पदार्थाः स्वस्वजीवनं धारयन्ति। (18 ।1 ।32)

(7) जलानि पितृनग्निं च प्रेरयन्ति। (18 ।3 ।40)

(8) अग्निरपां पितमस्ति। (18 ।3 ।5)

(9) अग्निः शवं दग्ध्वा स्वतलवृष्ट्या तत्स्थानं निर्वापयति। येन दूर्वादि-तृणानि पुनस्तत्र रोहन्ते। (18 ।3 ।6)

(10) मेघस्थितोऽग्निर्विद्युन्मयो भूत्वा जलं वर्षयति। येन प्रजा जीवन्ति। (4 ।15 ।10)

(11) अग्नीषोमौ जलं धारयतः। (3 ।13 ।5)

(12) जले याजकाग्नयस्तिष्ठन्ति। (10 ।5 ।21)

(13) अग्निभागो जलमस्ति। (10 ।5 ।7)

(14) येऽग्नयोऽप्स्वन्त आसन्।(12 ।1 ।37)

(स) उषसा सह-

(1) उषा होतारमग्निमुत्पादयांमास। एवमुषा देवी मातृस्थानीया वर्तते। (18 ।1 ।20)

(2) अग्निरुषसः प्रकाशयिता वर्तते। (18 ।6 ।21)

(द) इन्द्रेण सह

(1) अग्निसहायः सन्निन्द्रोऽसुरान् जयति ।(4 ।23 ।5)

(2) विश्वसंचालकोऽग्निः सरथइन्द्रेण सहायाति। सोऽस्माकं युद्धे विजयं दास्यति। (3 ।21 ।3)

(3) इन्द्राग्नी शालां रक्षतः (9 ।3 ।11)

(4) विप्रत्वेनाग्निः क्षत्रियत्वेनेन्द्रश्च राष्ट्रं रक्षतः। (6 ।88 ।2)

(ङ) वाचा सह-

(1) वागग्निं धारयति। (4 ।30 ।1)

(2) अग्निवाचौ शरीरं सममेव प्रविशतः। यतो हि यदाग्निः शरीरं प्रविशति तदा वाणी असुं प्रविशति। (2 ।12 ।8)

(च) सोमेन सह-

(1) अग्नीषोमौ यज्ञस्य पक्षौ इत्येवमृषयः कथयन्ति। (8 ।9 ।14)

(छ) विष्णुना सह-

(1) अग्नविष्णु यज्ञस्वरूपो यज्ञं गत्वा घृतं प्राश्नुतः। सूर्यत्वेन सप्तरश्मि-युक्तावपि एतौ। (7 ।29-30 ।1-2)

(ज) रूद्रेण सह-

यो अग्नौ रूद्रो यो अपस्वन्तर्य ओषधीर्वीरुध आ विवेश।

य इमा विश्वा भुवगति चाक्तृपे तस्मै रुद्राय नमो अस्त्वग्नये।।

(7 ।87 ।92 ।1) अन्येषु वेदेषु रुद्राग्निसंबंद्धा मंत्राः प्रचुरतया प्राप्यन्ते। किन्त्वथर्ववेदे तु एक एव मन्त्रः स्पष्टतयोपलभ्यते।

(झ) अश्विनीकुमाराभ्यां सह-

(1) सूर्यपुत्रौ अश्विनीकुमारावग्निना कार्यक्षमौ स्तः। तस्मादेव वैद्यत्वेना भिहितााावेतौ। (7 ।73-77 ।1)

(2) अग्निः सूर्यपुत्रत्वात् ताभ्यामश्विनीकुमाराभ्यां दुग्धमुष्णीकरोति। (7 ।73-77 ।2)

(ल) हेतिना सह -

(1) प्राच्यां दिशि हेतयो नाम देवास्तेषामिषवोऽग्निवर्तते। (3 ।26 ।1)

साम्प्रतमग्निविषयेऽथर्ववेदीयस्य ऋषेरभिलाषः प्रस्तूयते-

(1) अग्निर्हयं रयिं पुत्रान् ददातु। (14 ।2 ।4)

(2) हे नरनाथौ! तेजोरूपं पवित्रमग्निं धारयताम्। (12 ।3 ।3)

(3) प्राचीदिगधिपतिरग्निरायुर्बलादिवर्धनं करोतु। (12 ।3 ।55)

(4) योऽग्निर्दिव्योऽमृतः सर्वहृदन्तःस्थितस्तमहं धाग्यामि। सोऽस्मान् मा द्विषतु। (12 ।2 ।33)

(5) अग्निः प्रातः सबने पात्वस्मान् वैश्वानरो विध्वकृद् विश्वशम्भूः।
स वः पावको द्रविणे दघात्वायुष्मन्तः सहभक्षाः स्याम। (6 ।47 ।1)

(6) अग्निकृतो घातकः प्रयोगो दूरमपसरतु। (5 ।30 ।5)

(7) अपशब्दवक्तारं जनं नानाविधेन वधोपायेनाग्निर्विध्यतु। (5 ।30 ।12)

(8) वैश्वानरोऽग्निर्यज्ञं प्रतयागच्छतु। (6 ।35 ।2)

(9) घृताहुत्या समृद्धोऽग्निः मम सपत्नान् विनाशयतु। (13 ।1 ।28)

(10) अग्निस्थितं प्रच्छतं ज्ञानं वयं न जानीमः। तेन सोऽस्मानवगच्छतु। (18 ।1 ।36)

(11) वैश्वानरो वृषाग्निः शत्रुन् दहतु। (4 ।36 ।1)

(12) ऋतुयोनिरग्निः प्रकाशितः सन्नस्मभ्यं धनं यच्छतु। (3 ।20 ।1)

(13) ऋतुभिः समृद्धोऽग्निः शत्रुनाशको भवतु। (8 ।3 ।1)

(14) अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।(10 ।7 ।34)

(15) एकीभूय अग्निं पूजयत। (3 ।30 ।6)

(16) क्रव्यादग्निः दूरमपसरतु। (3 ।21 ।8)

(17) अग्ने। वर्चसा आयुषा संसृज। (7 ।89 ।94 ।2)

(18) अद्भिः सहाग्निः शं भवतु। (2 ।10 ।2)

(19) इन्द्राग्नी वर्च आत्मनि ध्रियाताम्। (9 ।1 ।12)

(20) अग्नीषोमौ सुमतौ स्याताम्। (6 ।93 ।3)

(21) अग्निर्हि विप्रो जुषतां हविर्नः। (6 ।27 ।2)

(22) क्रव्यादग्निजलस्थितानग्नीन् गच्छतु। (11 ।2 ।4)

(23) शालापतयेऽग्निपुरुषाय नमः। (9 ।3 ।12)

(24) आयुर्नो विश्वतो दघदयमग्निर्वरेण्यः। (7 ।53 ।6)

(25) गार्हपत्योऽग्निः पापान्मुंचतु। (7 ।64-66 ।2)

(26) हव्यवाहनोऽग्निः ममानुकूलो भवतु। (7।20-21।1)

अग्नेः सर्वदेवत्वम्-

(1) सोऽग्निः अर्यमा, वरुण, रुद्र, महादेवः, सूर्यः, महायमो वर्तते। (13।4।4-5)

(2) स एवाग्निः समुद्रे वरुणः द्युलोके मित्रः, अन्तरिक्षे इन्द्रो भूत्वा तपति। (13।3।13)

(3) अधुना अग्निपर्यायवाचिनः केचन शब्दा विचार्यन्ते।

(1) अग्नेरुर्ध्वगमनं प्रसिद्धम्। तस्य ज्वालाः सदोपरि गच्छन्ति। उन्नतिप्रतीकत्वेनाग्निरुर्ध्वगन्ता कथ्यते। (5।27।1)

(2) अग्नेः किरणस्वरूपा ज्वाला एव तस्य पाणयः। तैः स स्वकार्यं करोति। अतोऽसौ भूरिपाणिरित्यभिहितः। (5।27।1)

(3) तनावग्निवासो भवति। तेनैव शरीरस्थितिर्जायते। अतस्तनुं शरीरं न पातयति यः स तनूनपादिति कथ्यते। (5।27।1) (5।12।2)

(4) सर्वत्र समर्थत्वात् स परमेष्ठी वर्तते। (1।7।4)

(5) जगति स्थितानां समस्तानां वस्तूनां वेदयिताग्निः। अतः स जातवेदाः कथ्यते। (1।7।4)

(6) समस्तानां नराणां कृते सूर्यत्वेन दिवसे, अग्नित्वेन रात्रौ, चक्षुष्टवेन ''नृचक्षा'' इत्यभिहितोऽग्निः। (1।7।4)

(7) देवेभ्यः स हविष्प्रापयति, अतः स हव्यवाडिति कथ्यते। (4।23।4)

(8) वैश्वानरशब्दोऽग्नेः संगठनात्मकरूपो वर्तते। विश्वस्मिन् तस्यानेन संघशक्तेः परिचयो जायते। (4।36।1)

(9) वेदेऽस्मिन्नग्निः कविरिति संज्ञा लभते। तस्यानेन काव्यपुरुषत्ववाण्यधिसृष्ठातृप्वातीन्द्रियार्थदर्शित्व-साहित्यकर्तृत्वादिस्वरूपोऽभिव्यज्यते। (5।12।1) (8।3।20)

इत्थमग्निः सर्वेषां कृते व्यवहारविज्ञानद्वष्ट्योपासनीयो विचारणीयश्च। प्राचीनानामृषीणां सर्वाणि कार्याण्यनेनैव संपादितानि। साम्प्रतमस्य ज्ञानाय वैदिकसाहित्यस्याध्ययनमपेक्षत इति।

# 20

# वेदाख्यानव्याख्यानपरम्परायां यमः

*धर्मानन्दशर्मा*

वेदार्थनिरूपणपरम्परायामस्यामष्टौ पन्थानः प्रथन्ते। यथा (1) नैरुक्ताः, (2) याज्ञिकाः, (3) वैयाकरणाः, (4) ज्योतिष्काः, (5) भाषाविदः, (6) सम्प्रदायविदः, (7) आध्यात्मविदः, (8) ऐतिहासिकश्चेति। यास्कसमयेऽपि नैरुक्ता ऐतिहासिकाः प्राकृतिका वैयासिकाश्चेति विविधा वादा आसन्निति विज्ञायते। यथोच्यते तत्र इन्द्रवृत्राख्यानप्रसङ्गे-''तत्को वृत्रः ? मेघ इति नैरुक्ताः। त्वाष्ट्रो असुर इत्यैतिहासिकाः, अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्ष-कर्म जायते। तत्र उपमार्थेन युद्धवर्णा भवन्ति। अहिवत् तु खलु मंत्रवर्णाः, ब्राह्मणवादाश्च। विवृद्ध्या शरीरस्य स्रोतांसि निवारयाञ्चकार, अद्यापि सन्ति विवदमाना वादिनः यथा महर्षि दयानन्दप्रभृतय, ईश्वरस्तुतिवादिनः श्रीमदरविन्दादयो मनोवैज्ञानिकरहस्यवादिनः, रैलेसदृशाः शरीरविज्ञानवादिनः, अय्यरप्रमुखाः भूगर्भशास्त्रानुयायिनः, वासुदेवअग्रवाल सदृशा सृष्टिरहस्यवादिनश्चेति। नात्र विस्मरणीया नृतत्त्व-शास्त्रावलम्बिनः टोटमवादिन गणचिह्नवादिनो वा टामसादयोऽपि।

दृश्यन्ते हि प्रायो देवता आख्यानमाश्रित्यैव वर्तमानाः काश्चित्तु आख्या-नान्तरमन्तर्भूय नामावशेषतामपि गता इति स्पष्टं परिज्ञायते देवशास्त्रानुशीलनेन। आख्यानं विहाय सन्ति येऽन्ये वेदार्थवादाः, बुद्धिबादाधिष्ठिता हि ते वर्गविशेष-प्रयोजनकाः, न तु जनसामान्यसुलभाः। आख्यानं च वेदार्थस्य मनोहरं मनोरमं च व्याख्यानम् आख्यानं आख्यायिका चेत्यनर्थान्तरम्। आख्यायिका किल काल्पनिकी कथा। यथा ऋग्वेदे 'अजोहवदश्विना[1] इति मन्त्रस्य व्याख्यानावसरे यास्क आह-आह्वयदुषा अश्विनावादित्येन ग्रस्ता, तामश्चिनौ प्रमुमुचतुरिति आख्यानम्'। विस्पष्टमनेन यत्प्रतिदिने घटिता घटना कल्पनाकौशलेन समलंकृत्य उपकल्प्यते।

नैयामिकनये काल्पनिकंआख्यानं पुराकल्पपदेन व्यपदिश्यते-'स्तुतिनिंन्दा परकृकृतिः पुराकल्प इंत्यर्थवादः[2] वात्स्यायनः-ऐतिहासमाचरितो विधिः पुराकल्प)। स्मरणीयमत्र भाष्यं दुर्गाचार्यस्य-'यः कश्चिदाध्यात्मिकः आधिदैविक आधिभौतिको वार्थ आख्यायते। दिष्ट्युदितावभासनार्थं स इतिहास उच्यते। स पुनरयमितिहासः सर्वप्रकारो हि नित्यमविवक्षितत्त्वार्थस्तदर्थंप्रतितृणामुपदेशपरत्वात्'[3] इति। यथा विषयेऽत्र स्कन्दस्वामी एवमाख्यानस्वरूपाणां यजमाने नित्येषु च पदार्थेषु योजना कर्तव्या। एव शास्त्रे सिद्धान्तविधिशेषभूताः'' इति। तथा सर्वे इतिहासाश्चार्थवाद-मूलभूताः ते चान्यपर वररुचिरपि तदर्थे एव रुचिं दर्शयति यथा-औपचारिकोऽयं मंत्रेष्वाख्यानसमयो नित्यत्व-विरोधात् परमार्थेन तु नित्यपक्ष एवेति नैरुक्तानां सिद्धान्तः''[4]-इति। आख्यानकल्पनायां न असुकरं सत्यान्वेषणं वास्तविकोपकल्पने तु तेषां सर्वथा सुदुष्करमर्थाविष्करणम्। अवश्यमवधेयमत्र यदुक्तमस्माकं पूर्व प्रधानमंत्रिणा नेहरूमहोदयेन समीक्ष्य आख्यानसाहित्यम्ः[5] विपुलमपूर्वमप्रतिमं भव्यं नित्यं चास्मकं पुराकथाशास्त्रं नूनमिदं कमनीयकल्पनीपकल्पितमनववद्यं हृद्यं च पद्यम्। यदि चेत्तत्सत्यं वस्तुजातं वा भनुयात् तन्नूनं सर्वमसंगतमुपहसनीयं वा स्यात् इति।

भवतु नाम आख्यानानां कल्पनिकत्वं कथं पुनस्तत्रार्थाविष्करणं स्यात्। को न खलु वेत्तुमर्हति यदस्य आख्यानस्येदं रहस्यम्। अथवा अस्य मूले एषा च प्राकृतिकीघटना। कथं पुनरिदं संघटितमाख्यानमिति। नूनमिदं दुःसाध्यं न पुनः सर्वथा असाध्यम्, तत्कृते अलोडनीयं निखिलं साहित्यं तदैव शक्यते अधिगन्तुं किमपि तत्त्वम्। किं खलु तत्साहित्यमित्युच्यते-(1) संहिता-ब्राह्मणानि (2) यास्कस्य निरुक्तम् (3) बृहद्देवता (4) सर्वानुक्रमणी (5) वेदार्थप्रकाशः (सायणस्य) (6) नीतिमंजरी (द्याद्विवेकः) (7) रामायणं महाभारतं च (8) पुराणानि (9) प्राचीनं भारोपीयं च साहित्यम्। सन्ति एतानि स्रोतांसि आख्यानानाम्। स्वरूपमप्येतेषां सप्तधा शक्यते सन्धातुम् यथा-ऋतुवैज्ञानिकं शरीरिकमैतिहासिकं याज्ञिकं कलात्मकं आचारशास्त्रीयं लाक्षणिकं चेति। नैकमपि आख्यानं वैदादारभ्य पुराणपर्यन्तमेकरूपतामापद्यमानं दृश्यते।

तदिदमाख्यानं क्वचिद्वस्तुतत्त्वव्याख्यानरूपं क्वचिदज्ञातघटनाघटनंपरं क्वचिच्च सर्वजनोपदेशहेतुकं भवतीति कृतं कथनेन। जडचेतनावादोऽथ प्रायः वेदेषु

व्यवस्थाप्यते। सिद्धान्तो ननूमाख्यानमूलकः। यदा प्राकृतिका अचेतना कापि घटना चेतनवदुपकल्प्यते तदैव कलयति कल्पना किमपि कमनीयमाख्यानम्। अतो मूलमाख्यानस्यकास्मिन्नपि घटनासंघटने एवान्वेषणीयम्। तेन तत्रत्ये जीवनस्य दर्शनस्य वा अध्ययने आख्यानमेव सरलं वैज्ञानिकं साधनम्।

विपुलं हि वैदिकंदेवशास्त्रम्। अस्ति तत्रैकः विचित्रचरित्रो देवो यमः। स खलु नायको बहूनां वेदोत्तरवर्तिनामाख्यानानाम्। निखिलेऽपि वैदिके साहित्ये नूनमनुपमो यमयमीसंवादः। अस्त्तयेषा संवादसंवाहिका ऋग्वेदे सूत्रत्रयी यत्र रतिकामा यमस्य भगिनी यमी यमं परिणयाय प्रेरयति। अत्यल्पकोऽप्ययं संवादौ विशिष्टं वहति महत्त्वम्। कोऽसौ यम इति न शक्यते झटिति यथातथ्येनावज्ञातुम्। ऋग्वेदादारम्भ्य पुराणपर्यन्तं यमविषयकमाख्यानं नैकरूपम्। वैरूप्यमपि तेषु क्वचित्। ऋग्वेदे हि यमः प्रथममन्र्यत्वेनोपकीर्त्यते पुराणेषु तस्य अजत्वमुपगीयते। स्मरणीयमत्र यन्न यमौ नाम देवता। नापि जीवितैः सहास्ति तस्य कश्चित्सम्बन्धः। वस्तुतः स नामको मृतानाम्। शास्ता हि स, न देवः। मृतेषु आसीत् स प्रथमो योऽग्रमामी पितृणां मार्गस्य। यमो यमो च सर्वप्रथमं मृतेषु परलोकं प्रविशतः कुलतश्च शासनम्। प्रयत्यते हि अत्र सर्वं समीक्ष्य किमपि तत्त्वं निश्चेतुम्। पूर्वं तावद्दृश्यते यमानुगामिनी संख्याद्वयौ। यथा -

(1) सहजातौ जातकौ यमौ यमलौ वोच्यते।

(2) कृष्णः श्वेतश्च द्वौ वर्णौ यमस्य।

(3) प्राणेन अपानेन च यमस्य विशेषः सम्बन्धः।

(4) यमस्य तिथिः द्वितीया।

(5) यमस्य द्वौ दूतौ प्रथितौ।

(6) यममाशंक्य द्वौ पुरुषौ वैद्यमाह्वयितुं शंकेते।

कालोऽपि यमस्य पर्यायः-'काले' दण्डधरः, इत्यमरः[6], कालः समयो मृत्युश्चेति।[7] आङ्गलकोषे (रायल डिक्शनरी *Period of death*) समयवाचकः कालशब्दः मृत्युः=यमः इत्यर्थमपि कलयति।

वैवस्वतं यमस्य विशेषणम्। (वैवस्वतं संगमनं जनानाम् 10।-14।1) विवस्वान् सूर्यः सूर्योदयादारभ्य सूर्योदयपर्यन्तं अष्टौ प्रहराः प्रकल्पयन्ते ये खलु यामा इति कथ्यन्ते। यमस्यायमिति यामः समयस्य भागः। सूर्यसिद्धान्ते[8] च सूर्यः

कालकृत् समयव्यवहारप्रवर्तकश्वाभिमतः यमस्य दूतौ चतुरक्षौ श्वानौ[9] दिवसस्य निशायाश्च प्रतिचत्वारः प्रहराः। (श्यामश्च त्वा मा शबलश्च प्रषितौ यमस्य यौ पथिरक्षी श्वानौ-अथर्ववेदः (8।1।9), यथोच्यते जैमिनीयब्राह्मणे 'अथो हेतौ श्यामशबलावेव यदहोरात्रे इति। (जैमि. 1.6) जैमिनीयब्राह्मणे च 'अहर्वै शबलो रात्रिः श्यामः इति (1.6) कर्बुरः शबल इत्यमरः (1।5।17) शबलेन शर्वरेण तमसा' इति निरुक्तभाष्ये दुर्गः। एतदति स्पष्टं कौषीतकि ब्राह्मणे 'अहर्वै शबलो रात्रिः श्यामः' (कौषीतकि ब्रा. 2।9) इति। काठकसंहितायामप्युच्यते 'एतौ वै यमश्वा अहश्व रात्रिश्व' (का.सं. स्थानक 37 खण्डः 14) इति। शतपथब्राह्माणं च शुक्लं कृष्णं च तदिति पक्षत्वेन प्रकीर्तयति (शत. 7।3।1।38) तथोक्तं यजुष्यपि[10] 'अहेः शुक्लं पिङ्गाक्षं रात्र्यै कृष्णं पिङ्गाक्षम्', श्रुयते हि यमस्य सारमेयौ श्वानौ इति। (अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधूना पथा ऋ. 10।14।10)। तौ च सरमाया अपत्यौ। सरमा नाम उषा (मैक्समूलरः) सारमेयौ तावद् अहोरात्ररूपी श्वानौ तौ च उषासम्भूतौ। नैतयोः यमदूतयोः किमपि दृश्यते वेदे विशिष्टं प्रयोजनम्। पुराणेषु यमदूतानां माहात्म्यं न कस्यापि तिरोहितम्। यथोक्तं पद्मपुराणे[11]-

**यमदूताः समायान्ति दारुणा चोरदर्शनाः।**
**लम्बोदरा वक्रमुखाः क्रूरा पिंगलचक्षुषः।।**

अथर्ववेदे यमस्य दूतः मृत्युः श्रूयते (18।2।27 मृत्युर्यमस्यासीद्दूतः) मैत्रायणी-संहितायां (2।5।6) काठकसंहितायां (16।2) च यमः मृत्युरिति पर्यायौ (मृत्युर्वै यमः, मृत्युर्यमः)। द्रष्टव्यमत्रान्यदपि तद् यदुक्तं ब्राह्मणेषु यत्र सूर्यः अहोरात्रस्य संवत्सरस्य समयस्य च कारणत्वेनाम्नातः। स एव कारण मृत्योरपि। स्वयमपि च मृत्युरूपः। यथोक्तं जैमिनीय-ब्राह्मणे[12] 'एतौ पुनर्मृत्यू अतिमुच्यते तदहोरात्रे' इति कौषीतकिब्राह्मणमाह मृत्युर्वा एतौ वज्रबाहू यदहोरात्रे (कौ. 2।9) इति। एवमेव शतपथब्राह्मणे[13] 'स यः संवत्सरोऽसौ स आदित्यः' इति, य एष (सूर्यः) तपत्येष हीदं सर्वं यमयत्येनेदं सर्व यतम् (शत. 14।1।3।4) यजुर्वेदे च 'एष वै यमः इति श्रूयते। ऋग्वेदस्य भाष्ये[14] सायणः 'यमः सूर्य' इति वैंकटमाधवश्च 'यमस्य नियन्तुरादित्य' इति मंत्रार्थ चक्रतुः। निरुक्ते तु 'देवैः संगच्छते यमः रश्मिभिरादित्य' इति पठ्यते दुर्गभाष्ये। 'अस्तं गच्छन्नादित्यः। अस्तमिते यमो भवति' इति श्रूयते जैमिनीयोपनिषदि।

सुविदितं तावदेतद् यज्जीवनस्य मृत्योश्च सम्बन्धः प्राणेन वायुना वा। नानयोः समीकरणमस्वाभिविकं यमेन मृत्युना वा। श्रूयते हि अथर्वसंहितायाः[15] 'प्राणो मृत्युः' इति। तैत्तिरीयारण्यके[16] प्राणपानौ मृत्योर्मा पातम्' इति ऐतरेयारण्यके 'मृत्युरपानो भूत्वा नाभिं प्राविशत्' (2।42) इति देव राजयज्वकृते च निरुक्तभाष्ये[17] 'यमः मध्यस्थानवायु' इति निरूप्यते। शतपथब्राह्मणे हि आकाशसादृश्यात् यमी पृथिवीति कल्पते[18] इयं पृथिवी यमी आभ्यां हीदं सर्वं यतम् इति।

न यमः केवलं लौकिकं भौतिकं च स्वरूपं वहति, अपि तु मनोवैज्ञानिकी भूमिकामपि निर्वहति। यः खलु कश्चित् शयानः स्वप्नान् पश्यति तस्य स्वप्नदर्शनस्य कारणं यम एव, तदुच्यते शाखायनाराण्यके[19] 'येनैतत्पुरुषः स्वप्नया चरति' कौषीतकौ उपनिषदि च 'स्वप्ने यम' इति। यमनं नियमनं वा यमस्य विशेषो गुणः प्रतीयते। स भौतिकं सूर्यं संवत्सरं समयं दिशं यमयति। मृतानां जीवनं यमयति जीवितानां च मनांसि। यमनगुणविशिष्टत्वेनायं वेदे 'यमराजः'[20] इति श्रूयते। पुराणेषु चास्य यमनरूपमेव स्वरूपमधिकमुपचीयते। यथा-

**कर्मणामनुरूपेण यस्माद् यमयसे प्रजा।**
**तस्माद वै प्रोच्यसे देव यम इत्येव नामतः।।**

इदमेव यमस्य वैदिकं लौकिकं च स्वरूपं समीक्ष्य राथप्रभृतयः केचिदालोचकाः यमं जीवलोकस्य प्रथमं नृपं कल्पयन्ति। यमं च कमपि ऐतिहासिकं पुरुषं प्रमाणयन्ति। मैक्समूलरो हि अस्य सम्बन्धः सूर्येण सह हिलेब्रांडश्च चन्द्रमसा सह योजयतः[21]। वैदिका ऋषयः प्राची जीवनस्य पश्चिमां च दिशं मृत्योः प्रतीकत्वेनाभ्युपगम्यमाना दृश्यन्ते। कालनियमनेन विवस्वान् प्राणिनामायुर्नाशयतीति तस्य सम्बन्धः मृत्युनाऽपि योज्यते। अस्ताचलोन्मुखः[22] सूर्य एव प्रथमो मर्त्यो यश्च किमपि अज्ञातं लोकमनुविशतीति मन्यते मैक्समूलरः। द्रढयति च मतमिदं भारोपीयपुराकथनामनुसन्धातः कॉरनायोऽपि तुलयन् स्वरूपं वेदोक्तस्य यमस्य अवेस्तोक्तस्य च यिमस्य। मतं तावदेतयोः द्वयोः यत्सूर्यस्य आकाशीयमार्गस्य मनुष्यस्य जीवनयात्राया निविडोऽस्ति भावात्मकः सम्बन्धः। सूर्यास्तमभिप्रेतुं 'अस्तंगमना' दि शब्दा अपिर विशिष्टमर्थं द्योतयन्ति।

निखिलापि 'कालगणना ज्योतिषे शास्त्रे सूर्यचन्द्रायत्ता। स्वचित् सौरमानेन क्वचिच्च चान्द्रमानेनारभूते कालगणना। चन्दार्कसाक्षित्वं सुस्पष्टं

गणितस्य परिगणने। सूर्यं चन्द्रमसमुद्दिश्यैव देवयानं च प्रकल्प्यते। कृष्णपक्षे हि चान्द्रे मासे पितरः तर्प्यन्ते यमश्चाराध्यते। पितृणां सम्बन्धः कृष्णपक्षेण चन्द्रमसा वा योज्यते। आर्यभाषायां चन्द्रवाचिनः प्रायः सर्वे शब्दा 'मा' धातुनिष्पन्नाः दृश्यन्ते। ते च शब्दा मानं गणनं वा इत्यादिकं कालसंख्याविषयकम् अर्थमभि-प्रयन्ति। नैषा क्रिया केवलं वैदिके वाङ्मये एव अर्थमेनमभिव्यनक्ति अपितु सर्वास्यपि प्राचीनासु आर्यभाषासु। क्रियाव्यवहारेणानेनेदमेव शक्यते आकलयितुं यत्प्राचीने काले चन्द्रःदेवासीत् कालगणना। तस्यैव च एकः पूर्णचक्रो मास इति। विविधानामार्य-देवशास्त्राणां सूर्यचन्द्रयोः पारस्परिकसम्बन्धाध्यनेन रुचिराः परिणामाः प्राप्यन्ते। आर्याणां सूर्यचन्द्रयोः लिङ्गान्तरेषु कल्पना सुप्राचीना। जर्मनेएंश्लोसेक्सने लिथु आयिनभाषायां च सूर्यवाचिनः शब्दाः स्त्रीलिङ्गेषु प्रयुञ्जाना दृश्यन्ते, चन्द्रमसश्च पुलिङ्गे। ग्रीकलैटिनभाषासु तु विपर्यासोऽस्य लभ्यते। द्वयोरेतयोः तत्र कल्पना क्वचिद् भ्राताभगिनीरूपे क्वचिच्च पतिपत्निरूपे क्रियमाणा अवलोक्यते। योरोपीयकथाशास्त्रे सूर्यचन्द्रौ विशिष्टं स्थानं भजतः। बहूनामाख्यानानां नायकौ तत्र द्वावेव स्तः। इदमत्रावधेयम्। यमयमीसंवादे द्वयोः सम्बन्धः भ्रातृभगिनीरूपः। न सूर्यचन्द्रवदुभयरूपः। याचितेऽपि विवाहसम्बन्धे यस्या न यमः तां याचनां भ्रातृभगिन्योः स्वीकरोतीति अन्वेष्टव्योऽत्र कश्चित्सामाजिकः संघातः। निषिध्यते तत्र भ्रातृभगिन्योः विवाहसम्बन्धः। पूर्वं केषुचिज्जनजातिषु भगिनीविवाहः प्रशस्यते स्म। दृश्यते हि अवेस्ता-साहित्ये (न तु मूलावेस्तायां) यिमयिमकयोः वैवाहिकः सम्बन्धः। वैदिके साहित्ये समीचीनः हि स सम्बन्धः। सम्बन्धविशेषं पुरस्कृत्याख्यानमिदमद्यापि जीवति यमद्वितीयेति नाम्नां। कार्तिकमासस्य शुक्लद्वितीयां तिथिः हिन्दूषु 'भैयादूज' इति पर्वणि प्रथिता। यस्मिन् दिने भ्राता भगिनीमुपगच्छति यमभगिन्यां सूर्यपुत्र्यां यम्यां यमुनायां वा स्नानमाचरतः द्वावेव।

प्रो. उलरिष् श्नाइडरमहोदयस्तु अस्य यमयमीसूक्तस्य कमपि कर्मकाण्डीयं महत्त्वमनुसन्धातुं यतते। स एकस्मिन् शोधनिबन्धे प्रमाणयति यत्प्राचीने काले यमलौ विषमलिङ्गौ जातकौ अनिष्टसूचकौ मन्यते स्म। भूत्वापि भ्रातृभगिन्या तौ मातुः गर्भाशये संश्लिष्य दिवसतः। यथा श्रुयते[23] 'गर्भे नु नौ जनिता दम्पती कर्देवः सविता। समाने योनौ सह शेष्याय'। इदमत्र प्रकीर्तयति स बुधः

यद्युग्मजातकयोः जन्ये अनिष्टनिवारणाय द्वौ मंत्रपाठकौ मंत्रान् एतान् पठन्ति। मन्यते च मंत्रोऽयं युग्मजातकदोषनिवारणायैव कल्प्यते इति।

कठोपनिषदि श्रूयते[24] यमः तत्त्वोपदेष्टा। तत्र स उद्दालकस्य नचिकेतसः मृत्युविषयकान् प्रश्नान् उत्तरयति। नेदानीं यावतन्नरकाधिपतित्वेनोपकल्पितः। 'ये ये प्रेते विचिकित्सा मनुष्ये' गूढविद्याया उपदेष्टा वस्तुतो विहाय यमं कोऽन्यः स्यात्सम्भवः। वोच्यते तत्र 'वक्ता चास्य त्वाहनान्यो न लभ्यः' इति। णिष्वपि यमः मुक्तिज्ञानस्य उपदेष्टृत्वेन स्मर्यते[25]। यथा-'यमस्तुष्टं ततस्तस्मै मुक्तिज्ञानं ददौ परम्' इति।

सर्वप्रथमं रामायणे यमस्य घोरं भीमं च रूपमुपन्यस्तम्। रामायणे-पुराणेष्वपि यमवशगा हि मृत्युः। स च राजा नरकस्य पापिनानुशास्ता दण्डधरः। महाभारते तु धर्मो यमश्च पर्यायौ। पुराणेषु सर्वत्र यमस्य यमदूतानां च भयानकं स्वरूपमवलोक्यते। न तथापि कठोपनिषद्गतं वैदुष्यप्रकर्षकं व्यक्तित्वं यमस्य पुराणेषु तिरोहितम्। तदेतपरीक्षितं यमविषयकमाख्यानम्। वेदात्पुरापर्यन्तं तदु विविधां भूमिका निर्वहति। परीक्ष्य प्रमाणानि विद्वासो विकल्पयन्ति। यथा केचिद्यमं मृतात्मानां प्रधानं प्रतिनिधिं प्रख्यापयन्ति। अपरे तं प्राचीनं प्रथमंचैतहासिकं नृपं निरूपयन्ति। अन्ये तु तमात्मानं एव प्रतिपादयन्ति इतरे च कल्पयन्ति अस्तंगतस्य सूर्यस्य प्रतीको यम इति। मरणाधर्म त्वात्केचिच्चन्द्र एव यम इति कल्पयन्ति। सन्ति तेऽपि ये प्राकृतिकीमत्र काच्चिद् घटनां सम्भावयन्ति। न कस्यापि मतमत्र सर्वथा हेयमुपादेयं वेति। आख्यानेषु दृश्यते भौतिकं नैतिकं च संमिश्रणम्। यमस्याख्यानं तत्र स्पष्टं निदर्शनम्। वस्तुतः तत्र प्राकृतिकलौकिक-रूपयोर्भवति सापेक्षता। श्रूयते कारणं सूर्यः जगतः जीवनमरणयोः। उदयेन तस्य जीवनमस्तेन च मृत्युरभिकल्पयते। प्राकृतिके हि पिण्डे सूर्य एवाधारो यमस्य, नूनमन्त्र किञ्चित्पुरातने सर्गसंघटनाया बीजमप्यन्वेष्टख्यं यथा विश्रुता तत्रावेस्तांसाहित्ये प्रलयप्रतिपादिका कथा, प्रथिता सा भारतीये साहित्ये मन्वन्तररूपेण। यमनं हि यमनस्य गुणधर्मः। स पूर्वे कालं भौतिकं चक्रं ततश्च नियमयति नीतिनिंयमानपीति निश्चयेनैव स कालप्रयोजकः। स्पष्टोऽत्र कालवादः काल एवानुदिनमनुक्षीय-मानजीवनः मृत्युः। नास्ति मृत्योः परं किमपि भयप्रदमिति विचित्रा-कारवेशो हि यमः पुराणप्रथितः। कालः परलोकमपि प्रभावयतीति

तत्रत्यानां प्राणिनामपि स एव यमयिता। स एव प्रथमो मृत इत्यिनश्वरत्वं कालस्य। सर्गे हि युग्मौ यमौ वा भवतः। मृत्युस्तु एकल इति यमस्य कालत्वम्। वेदे च यमस्य सूर्येण सह वेदोत्तरसाहित्ये च चन्द्रेणापि सह संयोगात्सुव्यक्तं तस्य कालरूपम्। चन्द्राकौ एव कारणं कालस्य। तत्रैवाधिष्ठिता कालगणना। यम्यारतियाचनमत्र सामाजिकसंविधानकम्। जात्यन्तरप्रचलितप्रथां प्रत्याख्यातुं तन्निषेधो विधीयते। याते हि काले सर्वं परिवर्तते सामाजिकसम्बन्धोऽपि। कदाचित्स्वरूपसम्बन्धे विशिष्यते भगिनीविवाहः, निषिध्यते चेदानीं कालात्ययेन। यमलजातकयोः कालक्षेपादत्र यमस्य प्राधान्यं पुरुषप्रधानसमाजप्रयोजनकम्। बीजमत्र नष्टसर्गस्य पुनः सृजनरूपम्। यद्यपि भवति मैथुनी-स्त्रीपुरुषसंयोगरूपा सृष्टिः तथापि निर्वाह्यो भवति तत्र नैतिको नियमः। समानः स नियमः सर्वत्र। तदेतत्सर्वमाख्यानं कालावच्छिन्ननियमानुरोधेन नियम्यंमानं दृश्यते।

**संदर्भ :**


1. *ऋग्वेदः 1 ।117 ।16*
2. *न्यायसूत्रम् 2 ।1 ।64*
3. *निरुक्त भाष्यम् 10 ।3 ।2*
4. *निरुक्त समुच्चयः 4 ।95*
5. *डिकवरी ऑफ इण्डिया-77*
6. *अमरकोषः 1 ।1 ।62*
7. *अमरकोषे महेश्वरटीका 1 ।4 ।1*
8. *सूर्यसिद्धान्तः 22 ।25*
9. *ऋग्वेदः 10 ।14 ।10-12*
10. *यजुर्वेद 30 ।21*
11. *पद्मपुराणम् 13 ।54*
12. *जैमिनीयब्राह्मणम् 1.6*
13. *शतपथब्राह्मणम् 10 ।2 ।42*
14. *निरुक्तम् 12 ।29*
15. *तैत्तिरीयाकरण्यकम् 4 ।1 ।6*

*16. शतपथ ब्राह्मणम् 5 ।4 ।1 ।23*

*17. ऋग्वेदः 10 ।14 ।16*

*18. ऋग्वेदः 10 ।135 ।7*

*19. अथर्ववेदः 11 ।4 ।11*

*20. निरुक्तभाष्यम् 5 ।4*

*21. शाखायनारण्यकम् 6 ।15*

*22. वैदिक मैथोलॉजी*

*23. अवधेयात्र निरुक्तिः 'मार्तण्ड' शब्दस्यापि*

*24. ऋग्वेदः 10 ।10 ।5*

*25. कठोपनिषद् 1 ।22*

# 21

# लौकिकच्छन्दःसु वैदिकच्छन्दसां प्रभावः

***पारसनाथद्विवेदी***

वेदोऽखिलविद्यामूलम्। स च न केवलं भारतीयवाङ्मयेषु समादृतः, किन्तु विश्वसाहित्येष्वपि स्वीयाप्रतिमप्रतिभया देदीप्यमानोऽवलोक्यते। यथा च वेदानां प्रामाणिकतां श्रद्धाभावेनाङ्गीकुर्वन्ति विद्वांसस्तथैव वेदाङ्गस्यापि महत्त्वमवलोक्यते वाङ्मयेषु। विना वेदाङाध्ययनेन वेदस्याध्ययनं दुरूहतरं स्यादिति विचार्य वेदाध्ययनेन सह वेदाङ्गाध्ययनमत्यावश्यकं मन्यन्ते विपश्चितः। अतएवोक्तं शिक्षाविद्भिः-''तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते''। षडङ्गानि भवन्ति वेदस्य। तेषु पडङ्गेषु ''छन्दः पादौ तु वेदस्य''। इति पादस्थानीयत्वात् पूजनीयं वर्तते खलु छन्दःशास्त्रम्। यथा वा भौतिकजगति पादौ विना पङ्गुः भवति मानवस्तथैव काव्यजगत्यपि पादस्थानीयच्छन्दसामभावेन पङ्गुवदाचरति कविः। यथा च भाषायां व्युत्पत्त्यै व्याकरणमेक्ष्यते तद्वत् काव्ये छन्दःशास्त्रमपि नैपुण्यायोपजायते। उक्तं चाग्निपुराणे-

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।**
**कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा।।**

मानवदेहमवाप्यापि कवित्वशक्तिः दुर्लभा भवति। यदि च कदाचिज्जायते। कवित्वशक्तिस्तत्रापि छन्दःशास्त्रस्य ज्ञानमावश्यकं स्यादिति। छन्दःशास्त्रज्ञानमन्तरेण कविः काव्यं कर्तुं न शक्नोति। अतएव वेदादिशास्त्रेभ्य इव स्मृत्यादिशास्त्रणामपि रचनाः छन्दस्येव। तथा च वैदिकलौकिकभेदेन छन्दो द्विधा। तत्र च वेदिकसाहित्यं वैदिकच्छन्दसि पुराणेतिहासस्मृत्यादिलौकिकशास्त्राणि लौकिकच्छन्दस्युपलभ्यन्ते। लौकिकच्छन्दांस्यपेक्षया वैदिकच्छन्दासि प्राचीनतमानि सन्ति। तथा च लौकिकच्छन्दःसु वैदिकच्छन्दसां प्रभावः स्फुटतया दृश्यते।

वैदिकवाङ्मये एके एकस्मादक्षरादारभ्य चतुरधिकशततमाक्षराणां छन्दांस्युपलभ्यन्ते। तेषु च सप्तछन्दांसि प्रमुखतमानि। तानि च-''गायत्र्युष्णिगनुष्टुब्बृहतीपंक्ति त्रिष्टुब्जगत्यो छन्दांसि''। तेषामष्टौ प्रभेदाः सन्ति-''दैव्यासूरीप्राजापत्यर्षीयाजुषीसाम्न्यार्ची ब्राह्मी च''। ते च निम्नाङ्कितचक्रेण स्फुटीभविष्यन्ति-

| छन्दांसि | गायत्री | उष्णिक् | अनुष्टुप् | बृहती | पंक्ति | त्रिष्टुप् | जगत | अक्षरवृद्धिः क्षयोवा |
|---|---|---|---|---|---|---|---|---|
| 1. दैवी | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 1 अक्षरवृद्धिः |
| 2. आसुरी | 15 | 14 | 13 | 12 | 11 | 10 | 9 | 1 अक्षरक्षयः |
| 3. प्रजापत्या | 8 | 12 | 16 | 20 | 24 | 28 | 32 | 4 अक्षरवृद्धिः |
| 4. आर्षी | 24 | 28 | 32 | 36 | 40 | 44 | 48 | 4 अक्षरवृद्धिः |
| 5. याजुषी | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 अक्षरवृद्धिः |
| 6. साम्नी | 12 | 14 | 16 | 18 | 20 | 22 | 24 | 2 अक्षरवृद्धिः |
| 7. आर्ची | 18 | 21 | 24 | 27 | 30 | 33 | 36 | 3 अक्षरवृद्धिः |
| 8. ब्राह्मी | 36 | 42 | 48 | 57 | 60 | 66 | 72 | 6 अक्षरवृद्धि |

पुरा वैदिकच्छन्दसां कृते छन्दः शब्दस्य लौकिकच्छन्दसां कृते वृत्तशब्दस्य व्यवहार आसीत्। वैदिकच्छन्दांसि नियताक्षराणि भवन्ति ''यदक्षरपरिमाणं तच्छन्दः'' (ऋ.सर्वा.)। न तु तत्र गणानां विधानम्। उत्तरकाले च इमान्येव छन्दांसि गणात्मकत्वेन विकसितानि भूत्वा साहित्यक्षेत्रे वृत्तनाम्ना ख्यातानि। वृत्ते तु गणविधानमावश्यकमासीत्। अष्टौ गणाः सन्ति छन्दःशास्त्रे- ''यमाताराजभानसलगाः''। संस्कृतवाङ्मये प्रायः लौकिकच्छन्दसां कृते वृत्तशब्दव्यवहारः। तथा वृत्तजातिभेदेन (वर्णिकमात्रिकमेदेन) लौकिकच्छन्दोऽपि द्वेधा। तदुक्तं छन्दोमञ्जर्याम्-

**पद्यं चतुष्पदं तच्च वृत्तजातिरिति द्विधा।**
**वृत्तमक्षरसंख्यातं जातिः मात्राकृता भवेत्।।**

काव्यशास्त्रे पादचतुष्टयस्येव एकद्वित्रिपानानामपि वृत्तान्यवलोक्यन्ते। समस्तवृत्तपर्यालोचनेन ज्ञायते यदेकमेव छन्दोऽक्षरपरिवर्त्तनेन भिन्नं छन्दो भवति। एवमन्यान्यपि छंदास्यूह्यानि। तद्वृतं च त्रिविधं भवतिं-''सममर्द्धसमं विषमं च''। उक्तं च हलायुधेन-

“सर्वावयत्वात्समं यस्य चत्वारः पादाः एकलक्षणमुक्तस्तत्समं वृत्तम्। तत्रार्द्धे समे यस्य तदर्धसमम्। सर्वावयवेभ्योऽर्धाभ्याञ्च विगतं समं यस्य तत् विषमम् (पि.सू.वृ.)।

वृत्तस्वरूपं स्पष्टतया हलायुधेनोक्तम्-

“गायत्र्यादौ छन्दसि वर्तते इति वृत्तम्। तच्च स्थिर-गुरु लघु-अक्षर-विन्यासमिष्यते (पि.सू.वृ.)।” वृत्तानामियमक्षरगणना गुरु लघुवर्णानामाधारेण भवति। उक्तञ्च-

**एकमात्रो भवेत् ह्रस्वः द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रको प्लुतो ज्ञेयः व्यञ्जनञ्चार्धमात्रकम्।।**

मात्राच्छन्दः जातिरुच्यते। यत्र च मात्रागणानां व्यवस्था-तत्राक्षर-नियमाभावात् मात्रिक (जातिः) छन्दस्त्वेन संव्यवहारः। तानि च आर्यादीनि। संस्कृतवाङ्मये वैदिकच्छन्दांस्यनुसृत्यैव लौकिकच्छन्दसां वर्गीकरणं जातम्। तथा च तेषां वैदिकसंज्ञापि प्रदत्ता। तत्र वृत्तेऽपि अक्षरैकतः प्रारभ्य षड्विंशत्यक्षराणां छन्दांस्युपलभ्यन्ते। तत्र च प्रतिपादमेकाक्षराणां वृद्धिर्भवति। इत्थं चाक्षरपरिवर्त्तनेन भिन्न-भिन्नच्छन्दासि भवन्ति। प्रत्येकच्छन्दसां नामान्यपि पृथक् पृथक् भवन्ति। षड्विंशत्यधिकाक्षराणांछन्दांसि तु मालावृत्तानि भवन्ति। इत्थं च लौकिकच्छन्दःसु वेदिकच्छन्दसां प्रभावः स्पष्टतया लक्ष्यते। निम्नाङ्कितातालिकया स्फुटीभविष्यति। छन्दसां वर्गविधानाम्-

| क्र. | वै.छन्द. | प्रत्येकपाद. अक्ष. | सम. अक्षर. | लौ.छन्द | प्रस्ता. भेदाः |
|---|---|---|---|---|---|
| 1 | उक्ता | 1 | 4 | श्रीः | 2 |
| 2 | अत्युक्ता | 2 | 8 | स्त्री | 4 |
| 3 | मध्या | 3 | 12 | नारी, मृगी | 8 |
| 4 | प्रतिष्ठा | 4 | 16 | कन्या, सती | 16 |
| 5 | सुप्रतिष्ठा | 5 | 20 | पंक्ति, प्रिया | 32 |
| 6 | गायत्री | 6 | 24 | तनुमध्या | 64 |
| 7 | उष्णिक् | 7 | 28 | कुमाललिता | 128 |
| 8 | अनुष्टुप् | 8 | 32 | चित्रपदा, अनुष्टुप् | 256 |
| 9 | वृहती | 9 | 36 | हलमुखी | 512 |

| | | | | | |
|---|---|---|---|---|---|
| 10 | पङ्क्तिः | 10 | 40 | शुद्धविराट् | 1024 |
| 11 | त्रिष्टुप् | 11 | 44 | इन्द्रवज्रा | 2048 |
| 12 | जगती | 12 | 48 | वंशस्य | 4096 |
| 13 | अतिजगती | 13 | 52 | प्रहर्षिणी | 8192 |
| 14 | शक्वरी | 14 | 56 | वसन्ततिलका | 16384 |
| 15 | अतिशक्वरी | 15 | 60 | मालिनी | 32768 |
| 16 | अष्टि | 16 | 64 | पञ्चमार | 65535 |
| 17 | अत्यष्टि | 17 | 68 | शिखरिणी, मन्द्राकान्ता | 131072 |
| 18 | धृत्ति | 18 | 72 | कुसुमितलतावेल्लिता | 262144 |
| 19 | अतिधृत्ति | 19 | 76 | शार्दूलविक्रीडित | 524288 |
| 20 | कृत्ति | 20 | 80 | सुवदना | 1048576 |
| 21 | प्रकृत्ति | 21 | 84 | स्रग्धरा | 2097152 |
| 22 | आकृति | 22 | 88 | हंसी | 4194304 |
| 23 | विकृति | 23 | 92 | मत्ताक्रीड | 8388608 |
| 24 | संकृति | 24 | 96 | तन्वी | 16777216 |
| 25 | अभिकृति | 25 | 100 | क्रौञ्चपदा | 33554432 |
| 26 | उत्कृति | 26 | 104 | भुजङ्गविजृम्भितम् | 67108864 |

# 22
# अथर्ववेदे वेदान्ततत्त्वम्

*राधावल्लभः त्रिपाठी*

ऋग्वेदो यजुर्वेदः सामवेद इति त्रयाणां वेदानां त्रयीति संज्ञा, इमे च प्राचीनाः, अथर्ववेदस्तु पश्चाद्वर्तीति केचन मन्यन्ते। नैतन्न्याय्यम्। ऐतिहासिक-दृष्ट्याऽपि अथर्ववेदगतानि बहूनि सूक्तानि ऋग्वेदस्य प्राचीनतम-सूक्तानां तुलामारोहन्ति।

मनुरपि (11/33) वेदमिमं 'अथर्वाङ्गिरसी श्रुति' रिति नाम्ना निरूपयति। छान्दोग्ये बृहदारण्यके च उपनिषदि वेदोऽयमथर्वाङ्गिरसवेद इति निगदतः।

अथर्ववेदस्य ज्येष्ठता, श्रेष्ठता प्राचीनता च परम्पराभिमता वरीवर्तीति न संशीतिः। तथाहि - श्रौतयज्ञेषु चत्वारो भवन्ति ऋत्विजः। होता, उद्गाता अध्वर्युर्ब्रह्मा चेति। तेष्वाद्यो ऋग्वेदेन, द्वितीयः सामवेदेन, तृतीयो यजुषा, तुरीयश्च ब्रह्माऽथर्ववेदेन सम्बध्यते। स चायं ब्रह्मा ऋत्विक्षु सर्वोपरिः प्रकीर्तितः। स खलु समेषामेषां ऋत्विजामधिष्ठाता। ब्रह्मज्ञानेनापि तस्य ज्येष्ठत्वं श्रेष्ठत्वं च। वैतान-सूत्रेऽयं ब्रह्मा सम्बन्धितत्वादस्य अथर्ववेदस्यापि श्रेष्ठत्वम्। तथैव समेषां वेदानां सारभूतत्वादप्यस्य श्रेष्ठता। तथाहि अथर्ववेदभाष्यभूमिकायां सायण आह-सर्वसारत्वादयं वेदः श्रेष्ठः।

**अथर्ववेदस्य मुख्यं प्रातिपाद्यं वेदान्ततत्त्वम्**

अथर्व - शब्दोऽग्निवाची। अग्निं धारयतीति अथर्ववत्। तस्य अथर्वणो वेदोऽथर्ववेदः। यद्वा - अथर्व-रूपस्य अग्निवेदस्य चयनकर्तार ऋषयोऽथर्वाणः। वाजसनेयिसंहितायां (11/32) अथर्वा अग्नेः प्रथममन्थनकर्ता निरूपितः। त्रिवेदी-महोदयस्य तु स्वाथर्ववेदभाष्यभूमिकायां गमनार्थक-थर्वधातोः थर्व शब्दो निष्पन्नः

थर्वः अस्थिरः गमनशीलो वा, न थर्वोऽथर्वः, तं शाश्वतं स्थिरं परमतत्त्वमधिकृत्य रचितो वेदोऽथर्ववेद इति स मनुते। अथर्ववेदे अथर्वाङ्गिरसवेदे वा ज्येष्ठब्रह्मणः परब्रह्मणो वा स्वरूपं निरूपयन् ऋषिः एनं वेदं परब्रह्मणो मुखं प्राह (10/7/20)। ब्रह्मज्ञानस्य निरूपणादयं वेदो ब्रह्मवेद इत्यपि कथितः। अथर्ववेदस्य ऋत्विक् ब्रह्मज्ञानपारावारपारीणो भवति, तत्सम्बन्धेनापि अथर्ववेदस्य ब्रह्मवेद इति संज्ञेति केषाञ्चिन्मतम्। चतुर्षु ऋत्विक्षु ब्रह्मा सर्वस्य याज्ञिकानुष्ठानस्य साक्षी भवति। साक्षित्वेनासौ ब्रह्मणा समतामुपैति। अयं ब्रह्मा ब्रह्मणः परमतत्त्वस्यैव वा प्रतीकभूत इति युक्तमेव वैतानसूत्रं प्रतिपादयति। गोपथब्राह्मणे चायं ब्रह्मा विद्वान् सर्वविच्च निगदितः।

मुण्डकोपनिषद् अथर्ववेदान्तर्भूता वर्तते। इयं चोपनिषद् सकलवेदान्तविद्यायाश्चूडान्तं निदर्शनम्। अस्यां हि ब्रह्मज्ञानपरम्परा प्रत्यपादि। तत्र अथर्वा ब्रह्मणो ज्येष्ठः पुत्रः। स पितुः प्राप्तां ब्रह्मविद्यां अङ्गिरसे ददौ। तस्माच्च भरद्वाजः भरद्वाजाच्च अङ्गिरसः विद्यामिमामधिजगाम।

**ओम् ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता।**
**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह।।**
**अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्।**
**स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम्।। (मुण्डकोप. 1/1,2)**

ब्रह्मणा ब्रह्मविद्यायां दीक्षितोऽथर्वा तच्छिष्यपरम्परायां च समाम्नातोऽङ्गिरा इत्युभावपि ऋषी अथर्ववेदस्य प्रवर्तकौ। इत्थं साक्षात् सम्बन्धो घटितः ब्रह्मविद्यया अथर्ववेदस्य।

अथर्ववेदप्रवर्तको घोर-आङ्गिरसो देवकीपुत्राय कृष्णाय ब्रह्मविद्यां प्रोक्तवानिति छान्दोग्योपनिषदि प्रतिपादितम्। तत्र आङ्गिरसस्य ऋषेः कथनेषु सुस्पष्टं वेदान्ततत्त्वं प्रतिष्ठितं, तदेव च देवकीपुत्रेण कृष्णेन अर्जुनाय निगदितम्। तथाहि-

स यदिशिशाषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः। अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति। अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेनं तदेति। अथ यत्तपो दानमार्जवमाहि सा सत्यवचनमिति ता अस्य दक्षिणाः। तस्मादाहुः- सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेनावभृथः। तदेतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्राय उक्त्वा वाचापिपास .....

वस्तुतोऽथर्ववेदः स्वयमेव कण्ठत आत्मानं ब्रह्मविद्याशास्त्रत्वेन प्रतिपादयति। तथाहि - अस्मिन् वेदे स्कम्भसूक्ते स्कम्भरूपेण ब्रह्मणो निरूपणं कृतम्। तस्मादेव स्कम्भतत्त्वात् सर्वे वेदा आविर्भूताः। तत्र अथर्ववेदस्तु अस्य स्कम्भरूपस्य ब्रह्मणो मुखमिति प्रोक्तम्।

**यस्मादृचो अपातक्षन् यजुर्यस्मादपाकृषन्।**

**सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।**

**अथर्ववेदस्य दार्शनिकसूक्तानि**

अथर्ववेदे प्रायः सर्वत्र दार्शनिकं चिन्तनं वेदान्ततत्त्वं वा अनुस्यूतम्, तत् तु क्वचित् स्पष्टमभिधया प्रतिपादितम्, क्वचित् गूढैः प्रतीकैः सङ्केतितम्। पण्डितदामोदरसातवलेकरेण अथर्ववेदस्य प्रायः पञ्चसप्ततिसूक्तानि ब्रह्मविद्या-प्रतिपादकानीति धिया पृथक् संकलय्य विवेचितानि। एतेषु उपनिषदां तत्त्वचिन्तनं साधु श्लिष्यति। तत्र ब्रह्मविद्याप्रतिपादकानि कानिचित् सूक्तानि सविशेषमुल्लेख-मर्हन्ति। यथा-

परमं धाम (2/1), भुवनस्पतिः (2/2/1), ब्रह्मविद्या (4/1, 5/6) आत्मविद्या (4/2), ब्रह्मौदनम् (4/34), भुवनेषु ज्येष्ठः (5/2) आत्मा (5/9, 7/1, 19/51), विराट् (8/9, 8/10), आत्मा (9/9, 9/10), ब्रह्मप्रकाशनम् (10/2), सर्वाधारवर्णनम् (10/7), ज्येष्ठब्रह्म (10/8), उच्छिष्टब्रह्म (11/7), अध्यात्मम् (11/8, 13) काण्डे नव पर्यायाः पञ्चदशकाण्डे अध्यात्मप्रकरणस्य अष्टादश-पर्यायाः सन्ति।

ओदनसूक्तम् (11/3), प्राणसूक्तम (11/4), ब्रह्मचर्यम् (11/5), पृथ्वीसूक्तं (12/1) चेत्यादिषु सूक्तेषु सामान्यजनैराधिभौतिकरूपेणैव अनुभूतानां तत्त्वानाम् आध्यात्मिकं स्वरूपं समुज्ज्वलं समुन्मीलितम्।

**दार्शनिकप्रत्ययाः**

काल-तत्त्वस्य दार्शनिकं स्वरूपं सूक्तद्वये (19/53, 54) सुस्पष्टं प्रतिपादितम्। अनेकेषु सूक्तेषु अविद्या च विद्या च मिथुनीकृत्य प्रतिपादिते। ज्येष्ठब्रह्म (10/8), उच्छिष्टब्रह्म (11/7) इति सूक्त्योः ज्येष्ठब्रह्म, उच्छिष्टब्रह्म, महत् ब्रह्म, परमेष्ठी प्रजापतिः, स्कम्भः, हंसः इत्येषां तत्त्वानां विवृतिर्विद्यते। विराट् (8/9, 8/10) हिरण्यगर्भः (4/2) इत्यादिपदैः निगूढां वेदान्तविद्यामथर्व-वेदो व्याचष्ट।

**ब्रह्मज्ञानिनः श्रेष्ठत्वम्**

ब्रह्मचर्यसूक्ते (11 ।5) ड्यूसनमहोदयस्य मतेन ब्रह्मणोऽवतारभूतो ब्रह्मशिष्यो वाऽत्र ब्रह्मचारी कथितः।

**ब्रह्मविद्या -**

ब्रह्मविद्यासूक्ते ब्रह्मणः अनादित्वं सर्वव्यापकत्वं च प्रतिपादितम्। (4 ।1) सर्वाधारवर्णनम् (10 ।7) ज्येष्ठ ब्रह्म (10 ।8) उच्छिष्टब्रह्म (11 ।7) इत्यादिषु सूक्तेषु च विशिष्य सृष्टेराधारभूतस्य परमतत्त्वस्य प्रतिपादनं विहितम्। सर्वाधारवर्णने (10 ।7) स्कम्भतत्त्वस्य प्रतिपादनं विहितम्।

स्कम्भसूक्ते स्कम्भरूपेण ब्रह्मणो निरूपणं कृतम्। तस्मादेव स्कम्भतत्त्वात् समस्तायाः सृष्टेराविर्भावो निरूपित ऋषिणा।

ज्येष्ठब्रह्मणो वर्णनं निराकारस्य निर्गुणस्य परमतत्त्वस्य स्वरूपमुन्मीलयति, उच्छिष्टब्रह्माणि विश्राम्यति च सगुणतत्त्वम्। अत एव उच्छिष्टे ब्रह्मणि नामरूपे व्याकृते समस्तश्च संसारस्तस्मिन् समाहितः।

**उच्छिष्टे नामरूपं चोच्छिष्टे लोक आहितः। (11 ।7)**

उत् उपरि शिष्यत इति उच्छिष्टम्। सातवलेकरस्तु उच्छिष्ट ऊर्ध्वभागे-ऽवशिष्टः इति व्याचक्षाणः पुरुषसूक्ते 'त्रिपादूर्ध्वमुदैत् पुरुषः पादोऽस्येहाऽभवत् पुनः'-इत्यनया उक्त्या अस्य साम्यं सङ्केतयति।

**सृष्टिचक्रं कालगतिश्च**

कालस्य आवर्तन-विवर्तनं सृष्टिचक्रस्य गतिश्च क्वचित् प्रतीकात्मकेन वर्णनेन निगूढं निरूपिताऽर्ववेदे। सर्वाधारवर्णने स्कम्भसूक्ते वा द्वयोर्युवत्योः प्रतीकमुपस्थापितम्। ते च युवत्यौ षण्मयूखमयं तन्त्रमेकं वयतः। एका तन्तून् आकर्षति, अपरा च तन्तून तत्र वयति। अस्य च वयनकर्मणोऽन्तं न कदापि भवति। एते च द्वे युवत्यौ परिनृत्यन्त्यौ अवलोकयति ऋषिः, तदा च अनयोः परस्परेण विशेषमसौ प्रत्यभिज्ञातुं न पारयति। उभयोरपि अनयोर्युवत्योरुपरि वर्तते कश्चन पुमाननयोरधिष्ठाता।

**तन्त्रमेके युवती विरूपे अभ्याकामं वयतः षण्मयूखम्।**
**प्रान्या तन्तूंस्तिरते धत्ते अन्या नाप वृञ्जाते न गमातोऽन्तम्।।**
**तयोरहं परिनृत्यतोरिव न विजानामि यतरा परस्तात्।**
**पुमानेतद् वयत्युद्गृणति पुमानेतद् विजभाराद्धि नाके।**

उपरि उद्धृतो मन्त्रः तैत्तिरीयब्राह्मणस्य

**द्वे स्वसारौ नयतस्तन्त्रमेतत्**

**सनातनं विततं षण्मयूखम्।**

**अवान्वांस्तन्यून् किरतो धत्तोऽ-**

**न्यान् नाप वृज्याते।**

अत्र उभे युवत्यौ रात्रिर्दिनं च, षण्मयूखाश्च षट् ऋतवः, तन्त्रं नाम कालचक्रम्, अस्य च कालचक्रस्य या अविरता गतिस्तस्या अपि अधिष्ठाता परमः पुरुषः कश्चन इति स्वारस्यं प्रतीयते।

कालसूक्ते कालस्य स्वरूपं प्रतीकात्मकतया ऋषिणा प्रत्यपादि, कालस्य अखण्डता सखण्डता निरपेक्षता सापेक्षता च तेन विशदीकृता। तथाहि -

**सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्यवक्षः।**

**स इमा विश्वा भुवनान्यञ्जत काल एषः स ईयते प्रथमो नु देवः।।**

(19।53।2)

**स एव स भुवन्याभरत् स एव सं भुवनानि पर्यैत।**

**पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेजः।।**

(19।53।4)

'स इमा विश्वा भूतानि प्रत्यङ्' ।

सप्तभुवनानां कालेन सृष्टिर्जायते, अतः काल एतेषां पिता। एकैश्च पुनः काल एव सृज्यत इति काल एतेषां पुत्रोऽपि। अत्र दिक्कालयोः परस्परं सापेक्षता ऋषिणा निरूपिता।

कालसूक्ते सप्तचक्राणां विवृतिर्वर्तते। सायणमतेन 'सप्त ऋतून् अनु अनुक्रमेण धारयति' ऋग्वेदेऽपि 1।164 तथा च 3।12 इति सूक्त्योः सप्तचक्रा उल्लिखिताः।

एकेश्वरवादः 'दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः।' इत्यादिमन्त्रैरथर्ववेदे एकं सद्विप्रा बहुधा वदन्ति, अग्निं यमं मातरिश्वानमाहुरिति ऋग्वेदवचोऽनुसारेण एकस्यैव परमतत्त्वस्य नाना देवा नामान्तरभूता इति तथ्यं प्रकटीकृतम्।

**सर्वात्मकता -**

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा, तत्सृष्ट्वात-देवानुप्राविशदित्यादि श्रुतिसम्मतं सर्वव्यापकत्वं परमतत्त्वस्य अथर्ववेदः साधु स्फोरयति। परब्रह्म एव विश्वरूपेण आत्मानं प्रकटीकुरुते। एत एव तद्धि नाम सर्वात्मा सर्वतनुः।

**सर्वात्मा सर्वतनुः सह यन्मेऽस्ति तेन** (5।6।13)

**स वेद पुत्रः पितरं स मातरं स पुनर्भवत् स भुवन् पुनर्भवः।**

**स द्यामौर्णमन्तरिक्षं स्वकं स इदं विश्वमभवत् स आभवत्।।** (5।1।2)

**यस्मिन् विराट् परमेष्ठी प्रजापतिर्वैश्वानरः सह पङ्क्त्या श्रितः।** (13।3।5)

इति परमतत्त्वं सर्वत्र ओतं च प्रोतं च। अत एव तस्मात् सर्वं प्रजायते, अथवा सर्वस्माद्धि तत् प्रजायत इत्युभयमपि कथनं सत्यमेव। स कालेन सम्भवति, कालश्च तस्मात् सम्भवति। अत एवाहु ऋषयः -

**स वा अह्नोऽजायत तस्मादहरजायत।**

**स वै रात्र्या अजायत तस्माद् रात्रिरजायत।।** (13।7।30)

**ब्रह्म होता ब्रह्म यज्ञा ब्रह्मणा स्वरवो मिताः।**

**अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः।।** (19।42।1)

अयं च मन्त्र 'ब्रह्मार्पणं ब्रह्महविः ब्रह्मयज्ञः सनातनः। ब्रह्मैव तेन गन्तव्यमिति श्रीमद्भगवद्गीतोक्तेः सर्वथा संश्लिष्यति।

सर्वाधारवर्णनम् (10।7) तथा ज्येष्ठब्रह्म (10।8) इति द्वयोः सूक्त्योः सर्वाधारत्वेन परं ब्रह्म प्रकीर्तितम्।

प्रथमे सूक्ते स्कम्भ आत्मा वा देवता सायणमतेन स्कम्भो नाम सनातनो देवः, स ब्रह्मणोऽपि पूर्वं वर्तते। स एव ज्येष्ठं ब्रह्म इति कथितः।

**त्रीणि पदानि निहिता गुहाऽस्य यस्तानि वेद स पितुष्पिता सन्।।**

(2।1।2)

**स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा।**

**यो देवानां नामध एक एव तं सम्प्रश्नं भुवना यन्ति सर्वा।।** (2।1।3)

**उपनिषदां मूलम्**

पञ्चमहाभूतानां, इन्द्रियाणां, प्राणतत्त्वस्य हिरण्यगर्भ-विराट्प्रभृति देवानां

च निरूपणे उपनिषद्भिः संवदति अथर्ववेदस्य प्रतिपाद्यम्। प्राणतत्त्वं चेह साधुविवृतम्। प्राणो नाम जीवः, आत्मा ब्रह्म वा उपनिषत्स्वपि कथितः। सायणमतेनात्र प्राणो नाम समष्ट्यभिमानी प्रथमसृष्टो हिरण्यगर्भः एव।

**प्राणापानौ चक्षुः श्रोत्रमाक्षितिश्च क्षितिश्च या।**

**व्यानोदानौ वाङ्मनस्ते वा आकूतिमावहन्।**

(अध्यात्मसूक्तम् 11।8।4)

**मोक्षविद्या**

अथर्ववेदकाराणां मतेन परमधामप्राप्तिर्हि नाम मुक्तिः। इदं च परमं धाम क्वचिदमृतं क्वचिच्च परमं गुहेति पदेनापि शब्दितम्। परमधामप्राप्तौ सत्यां समस्तं विश्वमेकरूपं विभाति। एतेनाद्वैतबोधं निगमयति अथर्ववेदस्य ऋषिः। परमं धाम निरूपयंश्च ऋषिराह -

**वेनश्यत् पश्च परमं गुहा यत्र विश्वं भवत्येकरूपम्।**

**इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः।।** (2/1/1)

**प्र तद् वो चेदमृतस्य विद्वान् गन्धर्वो मे परमं गुहा यद्।** (2/1/2)

**परि विश्वा भुवनान्याममृतस्य तन्तुं विततं दृशे कम्।**

**यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त।।** (2/1/5)

अमृतम् अपि समस्ते संसारे अनुस्यूतं किमपि तत्त्वमेव। अमृतस्य तन्तवः सर्वान् प्राणिनः एकसूत्रे योजयन्ते। दीक्षया तपसा चास्य परमस्य धाम्नोऽमृतस्य वा प्राप्तिर्जायते। तदुक्तम्-

**यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह।**

**अग्निर्मे तत्र नयत्वग्गिनर्मेधा दधातु मे।।** (9/43/1)

**तपसः सृष्टिमूलकत्वम्-**

विदन्त्येव विज्ञा वेदविद्याविशारदा यदुपनिषत्सु तपसो माहात्म्यं सृष्टेः प्रवर्तकत्वेन परिकीर्तितम्। परमपुरुषस्य तपसेयं सृष्टिः प्रादुर्भूता। तपश्चास्याः सृष्टेराधारभूतम्। तथाहि -

**तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे।** (अध्यात्मसूक्तम् 11/8/2)

**सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।।** 12/1/1

इत्थं च ब्रह्मविद्यानिरूपणादथर्ववेदो वेदान्ततत्त्वं सम्यगुन्मीलयतीति न

संशयः। अस्मिन् प्रतिपादितानि वेदान्तसूत्राणि नैकासूपनिषत्सु पल्लवितानीति दिक्।


**सन्दर्भग्रन्थाः**

**मूलग्रन्थाः**

*अथर्ववेद का सुबोध भाष्य भाग-1-4, पं. श्रीपाद दामोदर सातवलेकर, स्वाध्याय मंडल, पारडी, जि. बलसाड, तृतीय सं. 1989*

*अथर्ववेद - सायणभाष्य सहित, सं. शंकर पांडुरंग पंडित, मुंबई, 1995-98*

*अथर्ववेद - सायणभाष्य सहित, सं. विश्वबन्धु, विश्वेश्वरानन्द वैदिक शोध-संस्थान, होशियारपुर, 1961*

*अथर्ववेद - वैदिक यन्त्रालय, अजमेर।*

*अथर्ववेद - हिन्दी भाष्य सहित, भाष्यकार - क्षेमकरणदास त्रिवेदी, दयानंद संस्थान, नई दिल्ली, 1974*

*अथर्ववेद - अंग्रेजी अनुवादसहित, अनु.-देवीचन्द, दिल्ली।*

**संन्दर्भ ग्रन्थ**

*ब्लूमफील्ड (अनु.- डॉ. सूर्यकान्त) - अथर्ववेद एवं गोपथ ब्राह्मण, चौखम्भा संस्कृत सीरिज आफिस, वाराणसी, 1964*

*The Hyms of Atharvaveda- Translated with a Popular Commentay Vol I,II-Ralph T.H. Griffith, II Ed. 1916. E.J.Lazarus and Co. Benaras.*

*अथर्ववेद-अंग्रेजी अनुवाद, अनु.- व्हिटने, मोतीलाल बनारसीदास, दिल्ली।*

*अथर्ववेद- चुने हुए 214 सूक्तों का अंग्रेजी अनुवाद, अनु.- बलूमफील्ड सेक्रेड बुक्स ऑफ ईस्ट सं.-42।*

*अथर्ववेद का काव्य - राधावल्लभः त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी, 2007*

# 23

# संस्कृते स्तोत्रसाहित्यम्

*श्रीकिशोरमिश्रः विद्यावारिधिः*

वेदानां सामवेदोऽस्मीत्येवं भगवद्गीतासु साम्नो महिमा स्पष्टं दृश्यते। आसीदयं गान्धर्ववेदः पुरापि सहस्रशाखाभिः सहृदयानाम-मन्दानन्दसन्दोहदानदक्षः कल्पतरुकल्पः। सामवेदस्य सहस्रशाखास्वि-दङ्काले कौथुमजैमिनीयराणायनीय-संज्ञास्तिस्रः शाखा उपलभ्यन्ते। तत्र कौथुमशाखायाः भारतस्य दक्षिणोत्तरयोर्द्वयोरपि भागयोरध्येतारः समुपलभ्यन्ते। राणायनीयशाखायाः स्वशाखीयाध्येतारो न दृष्टाः। गुर्जरमद्रेषु येऽध्येतारस्त एव परस्परमुच्चारणवैलक्षण्येनान्योऽन्यं राणायनीयत्वेन व्यपदिशन्ति। जैमिनीयत्वेनात्मानं ख्यापयन्तोऽपि सन्त्यल्पीयांसो विद्वांसः। सर्वेऽप्यमी लेखतः स्वरतश्चैकरूपा अप्युच्चारणधिया विभिन्ना दृश्यन्ते। तत्र गुर्जरपाठक्रमः स्वरगतिकपाठाश्रयो, द्राविडपाठक्रमश्चान्तः स्थगितकपाठाश्रयः। गतिर्नाम सम्प्रसारणम्। एवं महाराष्ट्रीया गानपद्धतिः यज्ञकालिकप्रयोगाश्रया, पश्चिमगौडपद्धतिश्च दैशिकदर्शनाश्रयेति चतुर्णामुपलभ्यमानसामगानक्रमाणां परिचायनम्।

**सामस्वरूपम्**

'सामाथो यश्च कश्च गेष्णः स स्वरः' इत्यादिश्रुतीनां स्वारस्यमासाद्य पूर्वमीमांसादर्शनप्रवर्त्तकेन जैमिनीवर्येण, 'गीतिषु सामाख्या' इति सूत्रयता साम गीतिरूपमिति प्रतिपादितम्। ऋङ्मन्त्रस्य गानविधया प्रयोगः साम। गीतिप्रकारश्च शास्त्रैकसमाधिगम्य एवापूर्वजनक इति तु युक्तमेव। गीतिर्बहुविधा। तत्र गानसमये मन्त्राणां स्वरूपपरिवर्तननं विकारः, विश्लेषः, विकर्षणं, विरामः, अभ्यासः, लोपः, आगमः, इत्यभिरष्टभिः कारणैर्भवति। विद्यमानवर्णस्थाने वर्णान्तरोच्चारणं विकारः। सन्धिविच्छेदो विश्लेषः। ह्रस्वथाने दीर्घस्य, दीर्घस्थाने प्लुतस्योच्चारणं विकर्षणम्।

विश्रामों विरामः। द्विस्त्रिरुच्चारणमभ्यासः। वर्णानुच्चारणं लोपः। अधिकवर्णस्योच्चारणमागमः। अनन्वितस्य पदस्योच्चारणञ्च स्तोभः।

स्तोभः सार्थकनिरर्थकभेदेन द्विविधः। नृमणे, निधीमहि, अग्निष्टपति, इत्यादिकः सार्थकः स्तोभः। हाई, हाऊ, औहो, वाई, इत्यादिको निरर्थकः। द्विविधोऽप्ययं स्तोभः ऋचः पादादौ पठित अन्वयी इति, पदात् परश्चानुषङ्गी इति परिभाष्यते। सर्वे चैते स्तोभाः 'अक्षरम्' इत्यपि समाख्यायन्ते। स्तोभानामपि कर्षण-लोप-विकारा भवन्तीत्याद्यस्ति बहु विवेचितं तत्र तत्रर्क् तन्त्रादिग्रन्थेभ्योऽव-गन्तव्यम्।

साम आधारत्वेन यं शब्दराशिमुररीकरोति स मन्त्रविशेषो वैदिक-साहित्ये साम्नो योनिरित्याभिधीयते। तत्र सामवेदे गीतीनां नामानि तत्तदृष्टित्वात्तत्तन्नाम्ना, केषाञ्चन प्राप्तव्यफलनाम्ना वा प्रथितानि। यस्य साम्नो मूलं (योनिः) ऋङ् न भवति, किन्तु स्तोभपदान्येव यत्र गीयन्ते तदनृक्साम। यथा-

(1) आरण्यकपर्वणि[1] सामयोन्यां दशानुगानं कश्यपव्रतं साम बहुधा गीयते, तेषु पञ्चम प्रजापतेर्हृदयं नाम कश्यपव्रतं योनिभूताया ऋचोऽक्षरविरहेण स्तोभपदान्येव समादाय गीथेते।

(2) आनडुद्व्रते द्वे सामनी, ते द्वे अपि आरण्यकगानस्य[2] अग्निरस्मि जन्मना, इत्यस्यां गीतस्य कश्यपपुच्छसाम्नोऽन्ते अधीते स्तोभपदान्येव गृहीत्वा गीयते।

(3) सामसुपर्णे[3] दशानुगानानि, तानि सर्वाण्यपि स्तोभपदान्येव समाहृत्य गीयन्ते। न तत्र काचन योनिभूता ऋगस्ति।

**सामसंहितास्वरूपम्**

'ऋचि अध्यूढं साम गीयते'[4] इत्यादिप्रमाणसत्त्वेन साम्नां योनिभूता ऋचश्छन्दसि आर्चिके प्रायः पठ्ययन्ते। सामगानामृक्पाठाय द्वौ ग्रन्थौ विद्येते, तौ च (1) छन्द (2) उत्तरा चेति सम्प्रदायविद्भरभिधीयते। तत्र छन्दोनामके ग्रन्थे नानाविधानां साम्नां योनिभूता ऋच एव पठिताः, उत्तराग्रन्थे तु बाहुल्येन तृचात्मकानि सूक्तानि। परमेकर्चान्यारम्भ द्वादशर्चानि यावत्सूक्तान्यपि तत्र दृश्यन्ते। उत्तरायामेकस्मिन् सूक्ते योग्यृक् प्रथमा, तदित्तरायाश्चोत्तरेत्यापेक्षिकी संज्ञा। वस्तुतस्तु योन्यृक् प्रथमा भवत्वेवेति न नियमः। तृचात्मकसूक्तेषु या प्रथमा

योनिभूता तन्नाम्ना छन्दोग्रन्थस्य योनिग्रन्थः, छन्दः, छन्दआर्चिकः, पूर्वार्चिकः, इत्येवमप्यध्यापकानां समाख्यानम्। इतरस्य तु तृचादिसंघरूपस्य ग्रन्थस्योपरितनर्ङ्नामधेयेनः, उत्तरा, उत्तरार्चिकः इति प्रसिद्धिः प्रायिकी। यः कोऽपि स्वरक्रमः पूर्वार्चिकपठिताया योनेर्भवति तेनैव स्वरक्रमेण योनिभूतर्क्संयुक्तानामुत्तरार्चिकपठितानामृचां गानं भवतीति साम्प्रदायिकता अभिप्रयन्ति।

तत्र पूर्वार्चिके षट् प्रपाठका अध्याया अपि वा। प्रत्येकस्मिंश्च प्रपाठके द्वावर्धौ प्रत्येकं चार्द्धयोर्दश दशतयः। यद्यपि दशर्चमेका दशतिः सामान्यतो भवति, तथापि कासुचिद्दशतिषु न्यूनाधिक्यमृचां दृश्यते। अतः प्रायिकमिदं संज्ञापनम्। पूर्वार्चिकस्य प्रथमाध्याय आग्नेयं पर्व काण्डं वेति व्यपदिश्यते। द्वितीयमारभ्य चतुर्थपर्यन्तमध्यायाः सम्भूय ऐन्द्रं पर्व काण्डं वेति संज्ञाप्यन्ते सम्प्रदायविद्भिः। पञ्चमोऽध्यायः सौम्यं पावमानं वा पूर्व काण्डं वाभिधीयते। षष्ठोऽध्यायः आरण्यकं पर्वं काण्डं वा कथ्यते। अस्य विषये समस्ति वक्तव्यमस्माभिः।

सातवलेकरमहोदयेन पावमानपर्वावसितौ-'इति पूर्वार्चिकः (छन्दः आर्चिकः) समाप्तः'-इत्येवं निर्देश उट्टङ्कितः[5], स च नोचित इति वयं मन्यामहे। पूर्वार्चिकः षडध्यायात्मक एव मन्तव्यस्तदनन्तरमुत्तरार्चिकस्य सत्त्वात्। कुत्रापि खण्डद्वये सति पूर्वात्तरत्वेनैन व्यपदेशो भवति। एवञ्च आरण्यकाण्डानन्तरं पठितास्वृक्षु महानाम्न्य ऋच इत्येवं वक्तव्ये महानाम्न्यार्चिकः सातवलेकरमहोदयेनोल्लिखितः।[6] तदेतदाधृत्य वासुदेवशरणाग्रवालर्येणापि स स्वीकृतः।[7] परमेतौ लेखौ भ्रममूलकावेवेत्यस्माकं विमर्शः। न हि सामसंहितायामार्चिकत्रयं मध्यमार्चिकं वा कुत्राप्युल्लिखितचरम्। अथ च बलदेवोपाध्यायैरपि महानाम्नीनामृचां परिशिष्टत्त्वं यदुक्तं[8] तच्चिन्त्यम्, न ग्रन्थमध्ये परिशिष्टसंयोजनमुचितं दृष्टपूर्वं वा।

वस्तुतस्तु अग्न आयाहीत्यारभ्य पुरीषपदान्तो भागः पूर्वार्चिकस्तत्र च महानाम्न्यादिकं सर्वमन्तर्भवतीत्येष शिष्टसम्मतः सम्प्रदायविदनुगृहीतः पन्थाः। एवञ्च षष्ठाध्यायस्यादिमामिन्द्रज्येष्ठमित्युचमारभ्य पञ्चपुरीषान्तभाग आरण्यकं काण्डमिति सामसम्प्रदायसद्विज्ञानां गुरुवर्याणां श्रीरामनाथदीक्षितपादानां मतम्। वयमपि, महानाम्नीनामृचां गानमारण्यगान एव महानाम्नीपर्वत्वेनान्तर्भुक्तं दृश्यत इति संहिताभागेऽपि तस्यारण्यकाण्डान्तर्गतत्वं युक्तमिति प्रतीमः। तदेतेन महानाम्नीनामृचां परिशिष्टत्वमार्चिकान्यतरत्वञ्च व्याहन्यत इति सर्वं समञ्जसम्।

सामसंहिताया उतरार्चिकस्यापि विभाजनक्रमो द्विधा, प्रपाठकात्मक एकोऽध्यायात्मकश्चापरः, पूर्वार्चिकवत्। तत्र सङ्कलनया नवसु प्रपाठकेषु पञ्चपर्यन्तं प्रत्येकप्रपाठके द्वावर्धौ, शिष्टेषु तु प्रत्येकमर्द्धत्रयम्। एवमुत्तरार्चिके द्वाविंशतिरर्द्धाः। अध्यायक्रमेणकविंशतिरध्यायाः। इदमध्यायविभाजनं श्रौतयज्ञेषु विनियोगमनुलक्ष्य-विहितम्। तत्राद्येष्वेकादशस्वध्यायेषु दशरात्रप्रयोक्तव्यानां त्रिवृदादिस्तोमानां क्रमेणर्चामुपदेशः। द्वादशत्रयोदशाध्याययोः संवत्सरे चतुर्दशमारभ्य षोडशपर्यन्त-मेकाहे, सप्तदशाष्टादशयोरहीने, एकोनविंशे सत्रेषु, अन्त्ययोश्चाध्याययोः प्रायश्चित्तक्षुद्रप्रयोगेषु च प्रयोक्तव्याः साममन्त्राः समुक्ताः।

**गानग्रन्थाः**

एतस्याः संहिताया ऋच आश्रित्यर्षयः सामगानानि प्राकाशयन्। तानि च गानामि चतुर्षु गानपुस्तकेषु समुपदिष्टानि। तेषु प्रथमं वेयगानं ग्राम. (मे.) गेयगानापरनामधेयम्। वेयगाने त्रोणि काण्डकानि पर्वाणि वाग्नेयैन्द्रपावमाना-ख्यानि। एतदवान्तरोऽपि प्रपाठकादिक्रमेण विभागो वर्तते।

द्वितीये चारण्यगाने अर्कपर्व-द्वन्द्वपर्व-(वाचो) व्रतपर्व-शुक्रियपर्व-महानाम्नीपर्वाणीति पञ्चधा विभागः। ग्रामगेयारण्यकगाने सम्भूय प्रकृतिगानमिति संज्ञाप्येते सम्प्रदायविद्भिः। वैरूपगानमारभ्य महानाम्नीभागान्तस्यारण्यकगानभित्ति संज्ञा। वैरूपाण्यष्टौ, तत्राञ्जो वैरूपमित्याद्या गीतीनां संज्ञाः। संहितायामारण्यक-काण्डे स्थितानां योनिभूतानामृचां क्रमेणारण्यकगाने न गानानामुल्लेखो दृश्यते। ततश्चारण्यकाण्डमाधारीकृत्यारण्यगानं नास्तीति च शङ्कनीयम्। आरण्यकाण्डे बहूनि सामानि स्तोभारूढानि, आग्नेयैन्द्रपवमानपठितगर्गारूढानि, आरण्यकाण्डीयर्गा-रूढानि च। यथा वा-देवव्रतानि स्तोभारूढानि, यद्यावह इत्यादीनि पूर्वपठितास्वृक्षु गीतानि, तथा चान्यानि प्रकृतर्क्षु गीतानि। तत्र गानाधारभूता ऋचः पूर्वमधीता इति तासां गानान्यारण्यकगाने समधीयन्ते।

अथारण्यकगानस्य संज्ञापनप्रवृत्तिनिमित्तविषये किमपि विचार्यते। बृहदारण्यकोपनिषद्भूमिकायां भगवत्पादैः ''अरण्येऽधीयेरन्'' इति श्रुत्यनुमोदनेन यस्य भागस्यारण्येध्ययनं तदारण्यकमित्युक्तम्। तदेतत्सर्वमाधारीकृत्य बलदेवोपाध्यायवर्यैरूपकल्पितं[9] यद् ''ग्रामगेयगानं ग्रामे समाजे गेयं भवति, आरण्यगानोक्तानि तु सामान्यरण्ये एव गेयानि। आरण्यगानस्तोभानां वैचित्र्याद्

वैलक्षण्याच्च तेषां ग्रामेषूच्चारणेऽनर्थः सम्भाव्यते। तेषामतिपवित्रत्वादप्यरण्यस्य पूतवातावरणे एव तेषां गानं फलप्रदत्वञ्चेति''। एवमेव वासुदेवशरणाग्रवाल-महोदयेनापि गृहे ग्रामे वा गेयानि ग्रामगेयानि सामानीत्यभिप्रेतम्[10]। तदेतन्मत्तं न युक्तितर्कसहमिति वयं प्रतीमः। तथा चात्र हेतवः-

1.आरण्यगानोक्तानि सामान्यपि विभिन्नेषु श्रौतप्रयोगेषु विनियुक्तानि। सोमयागादीनां महतामपि श्रौतप्रयोगाणां कृते देवयजनप्रदेशस्तु ''उच्चतमं समय-विभ्रंशि[11], उद्धतौषधिमूले''[12] इत्याद्याचार्यवचनैर्नारण्ये कर्तुं शक्यते। न खल्वरण्ये समुद्धतौषधिमूलं वा क्षेत्रमल्पायासेन विधातुं शक्यम्। अतो ग्रामप्रदेशेष्वेव क्रियमाणेषु श्रौतयज्ञेषु आरण्यगानसाम्नां विनियोगव्याघातापत्तिः पूर्वपक्षे।

2-अग्निमीडे पुरोहितम्[13], सहस्रशीर्षा पुरुषः[14], चित्रं देवानां[15] मित्यादयः प्रथिता मन्त्रास्तेषां गानप्रयोगाश्चारण्यभागान्तर्गताः सन्ति। अन्यवेदोक्ता अपीमे मन्त्राः स्वाध्याये समुच्चार्यमाणाः, कल्पान्तरैरपि ग्राम एव क्रियमाणेषु श्रौतस्मार्तेषु पूजनसूर्योपस्थानादिषु विनियुक्ताः। त एवारण्याध्येयत्वेन सामवेदोक्ता भवन्तीति न विचारसहं भवति।

3-गृह एव गेयत्वाद् ग्रामगेयगानमित्यपि न युज्यते, ग्रामगेयसाम्नामपि श्रौतयज्ञार्थकत्वात्। न गृहस्य समाजस्य वापेक्षा भवति तेषां प्रयोगेऽपि तु देवतोद्देश्येन द्रव्यत्यागात्मकस्य यागस्यैव तत्रावश्यकता।

4-यत्तु आरण्यकगानस्य ग्रामेषूच्चारणेऽनर्थः कल्प्यते तदसमीचीनतरम्। न हीष्टप्राप्त्यनिष्टपरिहारयोरलौकिकोपायबोधकस्य वेदैकभागस्याध्ययने कुत्राप्यनर्थः कथमपि सम्भवतीत्यस्माकं सुदृढः प्रत्ययः। न चात्र प्रत्यक्षप्रमाणोपलम्भः। अथ चारणस्य पूतवातावरणे सामविशेषप्रयोगः फलाधायक इत्यपि न वक्तुं युज्यते। यागप्रयोगमन्तरेणारण्येषु साम्नामुच्चारणेऽरण्यरोदनवदरण्यनर्त्तनवद् वा न कोऽपि श्रोता द्रष्टा वा तत्रोपलभ्येत, प्रयोक्ता चोपहासपात्रं स्यात्।

अतो ग्रामेगेयारण्यकगानयोरभिधानेऽन्यदेव प्रवृत्तिनिमित्तमन्वेष्टव्यम्। तथा चास्माकं प्रयासः-

1. प्रथमगानस्य ग्रामगेयमिति संज्ञापनं सामसु स्वरग्रामप्रयोग[16]मनुलक्ष्य कृतं स्यादिति सम्भाव्यते। प्रथमगानाभिधानस्य ग्रामपदघटितत्वात् तदित्तरस्यारण्यगानमारण्यगेयगानं वेति संज्ञापनमापेक्षिकं मन्तव्यम्, न त्वन्वर्थम्।

अथवा आसमन्ताद् रण्यं रमणीयमित्येवंविधया व्युत्पत्या हृदयावर्जकत्वादारण्यकाभिधानमन्वर्थं मन्तव्यम्। आरण्यकाख्यवेदभागस्य परिचायनप्रसङ्गेस्माभिरूपस्थापितो विचारोऽप्यन्यत्र द्रष्टव्यः।

3-सातवलेकरमहोदयेनारण्यकमानस्यारम्भणे तस्य 'गेयगानम्' इत्यपरं नामधेयमपि निर्दिष्टम्।[17] कुत्रास्य मूलमिति न वयं जानीमहे, सम्प्रदायविद एवात्र प्रमाणम्। तदिदं संज्ञापनमुचितं चेत् प्रथमगानस्य वेयगानमपरस्य च गेयगानमिति नामनी भवतः। एतच्चाभिधानं पूर्वगानस्य वेयमिति (द्वयमपि वा) सायणादिभिर्व्यवहृतत्वात् प्राचीनतरं प्रतीयते, ग्रामगेयारण्यकप्रसिद्ध्यपेक्षया। ततश्च वेयगेयनामभ्यां सर्वं सुस्थं भवति।

यत्तु आरण्यगानोपद्घाते नारायणस्वामिदीक्षितैरारण्यकगानस्य ''छन्दः साम' इत्यपरं नामधेयुमुपकल्पितं, तद्दचाञ्च छन्दार्चिकत्वम्।[18] तदुपोद्बलकरूपेण च-

**''छन्दोऽभिधाभूद् व्याख्याता, व्याख्यास्यत्त्यत्तराभिधाम्''**

इति सायणोक्त उत्तरार्चिकभाष्यभूमिकास्थः कारिकांश उद्धृतः, रुद्रस्कन्दवररुचिवाक्ये चोट्टङ्किके। तदिदं मतमसमञ्जसमेवेति वयं प्रतीमः। 'छन्दः, छन्दः आर्चिकः' एव हि अन्तर्भुक्तारण्यकाण्डस्य पूर्वार्चिकस्य समग्रस्याभिधानं भवति, न केवलस्यारण्यकाण्डस्यारण्यगानस्य वा। दीक्षितैरुद्धृतया सायणोक्त्यापीदमेव स्फुटीभवति। यत्तु बलदेवोपाध्यायवर्यैर्वेयारण्यकगान-योर्योनिगानत्वमुक्तं[19], तत्रापि केषाञ्चिदस्ति। विमतिः। यतो ह्युभयत्र मार्कि 1500 गानानि सन्ति, तेषु 294 एव योनिसामानि।

तृतीयो गानग्रन्थ ऊहाख्यश्चतुर्थश्चोह्याख्यः। तदनयोनमिपदप्रयोगस्य निदानमपौरुषेयत्वादिकञ्च श्रीमद्रामनाथदीक्षितगुरुपादैरूहगोतेः भूमिकाभागे सम्यगालोचितमिति तत एवावगन्तव्यम्।[20]

संहितोपनिषद्ब्राह्मणे-'अथैषा शुद्धा संहिता भवति'[21] इत्यनेनार्चिकसंहितायाः, 'अथैषा समावर्तनीया[22]', 'अथैते आनुदेशिक्यौ[23]' इत्यनेन गानसंहितायाश्च लक्षणं कृतमथ च पूर्वार्चिकसंहितया सह ग्रामेगेयारण्यकगानयोः, उत्तरार्चिकसंहितया सह चोहोह्यगानयोः सम्बन्धः प्रदर्शितः।

पूर्वार्चिकयोनिमन्त्राः पञ्चाशदधिकषट्शत-(650) सङ्ख्याकाः।

तदनुसारेण ग्रामेगेयारण्यकगीत्योः सम्भूय चतुर्नवत्युत्तरचतुर्दशशतसङ्ख्याकानि (1494) गानानि। उत्तरार्चिकमन्त्राः पञ्चविंशत्युत्तरद्वादशशत-(1225) सङ्ख्याकाः। तदनुसारेणोहगीतौ षट्त्रिशदुत्तरनवशतसङ्ख्याक-(936)-गानानि। एवञ्चोह्यगीतौ नवाधिकद्विशतसंख्याकानि-(209)-गानानि वर्तन्ते। अत्र सङ्ख्यापरिगणने विदुषां मतभेदोऽपि दृश्यते। प्रायः सर्वेष्वपि सामसु निर्दिश्यन्ते ऋषिच्छन्दोदेवताः। परं कानिचन एतादृशान्यपि सन्ति सामानि येषु ऋष्यादयो न साम्प्रदायिकैः स्मर्यन्ते न वा तेषां निर्देशो ग्रन्थेषूपलभ्यते। यथा सामसुपर्णे[24] दश सामानि, तेष्वात्मस्वरूपं सामैकं वर्जयित्वा नवानां साम्नामुष्यादिकं नास्ति।

**साम्नामुच्चारणपरम्परा**

यागमहायागादिशुभप्रसङ्गेषु सामस्तोत्रप्रयोगे पाञ्चविभक्तिकं साप्तविभक्तिकं वा स्तोत्रगानं विभागेन प्रस्तूयते-प्रस्तावः, उद्गीथः, प्रतिहारः, उपद्रवः, निधनञ्चेति। सम्प्रदायसम्प्राप्तसस्वरगानपठनदक्षाः सामगाः गानावसरे पाञ्चविभक्तिकमेव गान स्वरयन्ति। परन्त्वन्येषां जिज्ञासूनां कृते पाञ्चविभक्तिक-गानप्रयोगो न सम्यगवगतो भवतीति दृष्टान्तपुरस्सरमत्र पाञ्चविभक्तिकगानावगमः प्रकाश्यते।

'उत्तरापादादौ पर्वप्रतिहारः सन्यार्य्यः' इति पञ्चविधसूत्रभाष्ये प्रतिपादित्तं यदन्तिमपादस्यादः वुपक्रमे पर्वप्रतिहारः स्यात्। 'इन्द्रो विश्वस्य' इत्यत्र द्व्यक्षरणः, द्वयोर्द्वयोरक्षरयोर्भिभागो भवति। यथा-'इन्द्रोऽ34' इति प्रस्तावः, 'विश्व' इत्युद्गीथः, 'स्यरा' इति प्रतिहारः, 'जति हो 2345' इत्युपद्रवः, 'इडा' इति च निधनम्। 'इन्द्रो विश्वस्य राजति' इत्येकपदा ऋक् पूर्वार्चिके समाम्नाता।[25] ग्रामेगेयगीतौ तामाश्रित्य वैराजे गाने समाम्नाते। प्रथमगानस्य स्वरूपमित्थम्-

'इ$^{3}$न्द्रो$^{2}$ऽ34।। वि$^{3}$श्व$^{4}$स्य$^{5}$रा$^{2}$ ।। ज$^{2}$ति हो$^{3}$ ऽ345इ। ।डा।।'

अत्र क्रमेण 'इन्द्रो' प्रस्तावः, 'विश्व' उद्गीथः, 'स्यरा' प्रतिहारः, 'जति' उपद्रवः, 'इडा' निधनमिति पाञ्चविभक्तिकप्रयोगस्य विभागः स्पष्टतया प्रतीयते। एवं हि सर्वेषां गानानां पाञ्चविभक्तिकप्रयोगावगमः। पञ्चविधसूत्रभाष्ये प्रस्ताव-भक्तिविषयको द्वितीयो दृष्टान्तो निर्दिष्टस्तद् यथा-वाचोव्रतपर्वारम्भे यद्गानद्वयं निर्दिष्टं तत्र द्वितीयगाने[26] हुवाई वाचाम् इति प्रस्तावः, वाचं हुवाइ इत्यन्तो वा प्रस्तावः। अनयोर्गानयोर्मूलं न ऋगपि तु स्तोभः।[27] आर्षेयब्राह्मणेऽपि तस्योल्लेखः। साप्तविभक्तिगाने तु हिकारः आदिश्चेति विभक्तिद्वयं वर्द्धते।

'इन्द्रस्य वैराजे द्वे, इत्यस्य सायणभाष्ये[28] निर्दिष्टं यदिन्द्रो विश्वस्य रा-इति तृतीयद्वितीयादिकम् इति। अस्येदं तात्पर्यम्-यदवसरे वैराजगानं गीयेत तदवसरे द्वितीयतृतीयस्वराभ्यां प्रारम्भः करणीय इति। गानप्रयोगे सप्तस्वराणां निर्देशः सामविधानब्राह्मणे शिक्षाग्रन्थेषु च समुक्तः। तदनुसारेण स्वरसंयोजना क्रियते चेद् गान्धर्ववेदस्य स्वरसङ्गतिः सुतरां सुखावहा भवति। एवञ्च साममन्त्रनिबद्धगानानां, कतिपयस्थलेषु योन्यृचमन्तरापि स्तोभादिवर्णपदवाक्यप्रदानेन सामगानानां स्वरूपं सङ्ग्रथितं परमकारुणिकैर्ऋषिप्रवरैः।

**सामस्वरसञ्चारस्तत्प्रदर्शनञ्च**

नारदीयशिक्षायां सप्तसामस्वरा इत्थं संलक्ष्यन्ते-[29]

**यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः।**
**यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः।।**
**चतुर्थः षड्ज इत्युक्तः पञ्चमो धैवतो भवेत्।**
**षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः।। इति**

इम एव क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रा-तिस्वार्याः, क्वचिच्च क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चमा-न्त्याः गान्धर्ववेदे पञ्चम-मध्यम-गान्धार-र्षभ-षड्ज-निषाद-धैवताः प्रसिद्धाः। अत्र नारदीयोक्ते क्रमे धैवतनिषादयोर्विपर्यासो विद्वद्भिः समन्वेतव्यः। सामस्वराणां करवीणास्पर्शेण प्रदर्शनमेवमुक्तं नारदेन-[30]

**अङ्गुष्ठस्योत्तमे क्रुष्ट अङ्गुष्ठे प्रथमः स्वरः।**
**प्रदेशिन्यां तु गान्धार ऋषभस्तदनन्तरम्।।**
**अनामिकायां षड्जस्ते कनिष्ठायां तु धैवतः।**
**तस्याधस्ताच्च योऽन्यस्तु निषादं तत्र निर्दिशेत्।।इति।**

तदिदमाधृत्यास्माभिः सम्प्रदायसमाराधकसमादृतस्वरसञ्चारे सामवेदीय-स्वरप्रदर्शनं स्फटी क्रियते।

सामसंहितायां तु मध्यमगान्धारर्षभास्त्रय एव स्वराः क्रमेण स्वरितोदात्तानुदात्ता भवन्ति। सामगाने मध्यमगान्धारर्षभषड्जधैवतनिषादपञ्चमाः इति क्रमेण सप्त स्वराः क्रियन्ते। तत्र मध्यमाख्यप्रथमस्वरेऽङ्गुष्ठस्य स्वरप्रदर्शनार्थं हस्तो रिक्त एव स्थाप्यते। गान्धारेऽङ्गुष्ठेन प्रदेशिन्याः मध्यं पर्व स्पृश्यते। ऋषभेऽङ्गुष्ठेन मध्यमाङ्गुलिपर्व, षड्जेऽनामिकामध्यपर्व, धैवते कनिष्ठिका-मध्यपर्व, निषादे कनिष्ठिकामूलम्, पञ्चमे प्रदेशिन्यग्रञ्च स्पृश्यते।

यस्य वर्णस्योपरि, एवंविधं चिह्न तस्येषद्दीर्घमुच्चारणं, प्रदेशिनीमध्यस्य संस्पर्शेन किञ्चित् पीडनं, हस्तस्य तिर्यग्भावश्चापि स्वभावतः किञ्चिद् भवति। यत्र दण्डरेखासदृशं-चिह्नं तत्र प्रदेशिनीमारभ्य कनिष्ठिकापर्यन्तानामङ्गुलिपर्वणां स्पर्शनम्। यत्र$^{1}_{2}$ एतच्चिह्नं भवति तत्र पूर्ववत् प्रदेशिनीमारभ्य कनिष्ठिकान्तं कनिष्ठिकामारभ्य प्रदेशिनीं यावच्च स्पृष्ट्वा मध्यमां करान्तःक्षिप्त्वा ब्राह्मतीर्थसंस्पृष्टां कुर्वन्ति। यत्रक$_{3}$ एवविधं लक्ष्म तत्र मध्यमाग्रमारभ्य मूलं यावत् स्पर्शः। यत्र $^{1111}_{2345}$ एवंविधः स्वरसञ्चारस्तत्र प्रदेशिन्या अग्रमारभ्य कनिष्ठिका यावदङ्गुलीनामग्रस्पर्शः। यत्र वर्णस्योपरि-9 अङ्कितं तत्र प्रदेशिनीमूलमारभ्याग्रं यावत् स्पर्शः।

यत्र वर्णोपरि र अक्षराङ्कनंस्तत्र वामहस्तेन परिगणनमङ्गुलीनामन्तः-प्रक्षेपद्वारा कनिष्ठिकामारभ्यामन्त्रान्तम्। एवं हि विशिष्टः स्वरसञ्चारः सामगेषु। तथा चोच्चारणेऽपि विशेषः। यथा विरामे विसर्गस्य सानुनासिकोच्चारणम्, अनुनासिकस्योच्चारणञ्चङकारसदृशमेव प्रायशः। दीर्घस्य ऋकारस्य रे इत्येव-मुच्चारणम्, हृस्वस्यापि ऋकारस्य षकारहकारयोर्योगे रे इत्येवंविधमुच्चारणं भवति। एवमन्यदपि परम्परागतोच्चारणवैशिष्ट्यं विद्यते तच्च श्रुतिवचोविसरैः पवित्रिता-धरेभ्यो वैदिकेभ्य एवावगन्तुं शक्यत इत्यलं पल्लवितेन।

वेदान्तरेषु तु सप्तस्वराण्येतानि त्रिष्वेवान्तभर्वन्ति। तथा च याज्ञवल्क्य-शिक्षायाम्-

**उच्चौ निषादगान्धारौ नीचावृषभधैवतौ।**
**स्वरितप्रभवा ह्येते षड्जूमध्यमपञ्चमाः।। इति।**

सङ्गीतरत्नाकरेऽपि -

**द्विश्रुतिकौ निषादगान्धारौ त्रिश्रुतिकावृषभधैवतौ।**
**चतुष्कश्रुतिका ह्येते षड्जमध्यमपञ्चमाः।।इति।**

गान्धर्ववेदः सामवेदस्याङ्गरूप उपवेदो वेति वर्त्तमानसङ्गीतशास्त्रस्यापि मूलं सामगानं वर्तते। एवञ्च समन्वयरीत्या लोकव्यवहारपद्धत्या च वेदमन्त्राणां गानप्रणालिका सङ्गीतकोविदैरादरणीया भवेत्। प्राचीनसस्वरपाठप्रणालिकामनुस-रत्नः श्रुतिमुखास्तु वन्द्याः समादरणीया एवेति।

**संदर्भ :**


*1. आ. गा. 142 पृ. 390 ।*

*2. आ. गा. 147 पृ. 393 ।*

*3. आ.गा. 156 पृ. 397 ।*

*4. छा.उ. 1/6/1*

*5. सा. सं. पृ. 64 ।*

*6. सा. सं. पृ. 71 ।*

*7. सा. त. भू. पृ. 6 ।*

*8. वै. सा. सं. पृ. 153 ।*

*9. वै. सा. सं. पृ. 162 ।*

*10. सा. त. भू. पृ. 5 ।*

*11. का. श्रौ. 7 ।1 ।11 ।*

*12. का. श्रौ. 7 ।11 ।13 ।*

*13. आ.गा. 605 ।*

*14. आ.गा. 617 ।*

*15. आ.गा. 629 ।*

*16. द्र.ना.शि.-सप्तस्वरास्त्रयो ग्रामाः ।*

*17. ग्रा.गा.पृ. 307 ।*

*18. आ.गा.भू.पृ. 3 ।*

*19. वै.सा.सं.पृ. 161 ।*

*20. ऊ.गा.भू.पृ. 26 ।*

*21. सं.उ.ब्रा. 1 ।8 ।*

*22. सं.उ.ब्रा. 2 ।1 ।*

*23. सं.उ.ब्रा. 3 ।1 ।*

*24. आ.गा. 156 पृ. 397 ।*

*25. सा.सं. 456 ।*

*26. आ.गा. 168*

*27. स्तो.पं. 1 ।2*

*28. आ.ब्रा. 4 ।11 ।10*

*29. ना.शि. 4 ।1*


*30. ना.शि. 1 ।6 ।3*


Sagar
The Gour City





ISSN : 2229-5577
Peer Reviewed Journal



सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)